RASHTRIYA SANSKRIT SANSTHAN, NEW DELHI
(*Kendriya Sanskrit Vidyapeetha, Tirupati Series No. 42.*)

PAKṢATĀ

OF

SRI GAṄGEṢOPĀDHYĀYA

with **DĪDHITI** of Sri Raghunāthaśiromaṇi

AND

DĪDHITI - PRAKĀŚIKĀ of Sri Gadādhara - Bhaṭṭācārya



KENDRIYA SANSKRIT VIDYAPEETHA
TIRUPATI
1985

First Edition : *1911*
Second Edition : *1930*
Reprinted by Offset Process : *1985*

Copy Rights Reserved

Price : Rs. Rs 18=00

Published for the
RASHTRIYA SANSKRIT SANSTHAN
MINISTRY OF EDUCATION
GOVERNMENT OF INDIA
NEW DELHI

By

Dr. N. S. RAMANUJA TATACHARYA
PRINCIPAL I/c
KENDRIYA SANSKRIT VIDYAPEETHA
TIRUPATI

Printed by N.R. Vijayaraghavan by Offset Process at Udhaya Printers, Madras-600033.

राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

(केन्द्रीयसंस्कृतविद्यापीठग्रन्थमाला-संख्या ४२)

श्रीगङ्गेशोपाध्यायविरचिता

पक्षता !

श्रीरघुनाथशिरोमणि विरचितया **दीधित्या**

श्रीगदाधरभट्टाचार्यकृतया **दीधितिप्रकाशिकया** च अलंकृता



केन्द्रीयसंस्कृतविद्यापीठम्

तिरुपतिः

१९८५ Rs 18 = 00

प्रथमं प्रकाशनम् १९११

द्वितीयं प्रकाशनम् १९३०

पुनर्मुद्रणम् १९८५

सर्वेऽधिकाराः राष्ट्रियसंस्कृतसंस्थानेन स्वायत्तीकृताः

शिक्षा मन्त्रालयान्तर्गत
नवदेहलीस्थ–राष्ट्रियसंस्कृतसंस्थानस्य कृते
तिरुपतिस्थ–केन्द्रीयसंस्कृतविद्यापीठस्य
प्राचार्येण डा. एन्. एस्. रामानुजताताचार्येण
प्रकाशितम्

उदयप्रिन्टर्स्, मद्रास् – ३३
इत्येतैः पुनर्मुद्रितं च

पक्षता

उपोद्घातः

व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिः इत्यनुमितेः लक्षणमुक्त्वा अनुमितिहेतुभूतज्ञानविषयीभूतव्याप्तिलक्षणं पूर्वपक्षसिद्धान्तरूपेण निरूप्य ततः पक्षधर्मतानिरूपणं प्रतिज्ञाय पक्षताश्रयवृत्तित्वरूपायाः पक्षधर्मतायाः पक्षताघटितत्वेन पक्षतायां विवादसद्भावेन तन्निरूपणे कृते तदाश्रयवृत्तित्वरूपा पक्षता सुगमेत्याशयेन पक्षतानिरूपणमत्र ग्रन्थे क्रियते मणिकारैः।

तत्र 'आदौ संदिग्धसाध्यधर्मत्वं पक्षत्वम्' इति प्राचीनमतमनूद्य साध्यसंशयरूपायाः पक्षतायाः विशेषणत्वम् उपलक्षणत्वं वा न संभवतीति प्रतिपाद्य साधकबाधकमानाभावस्य सिषाधयिषाया वा पक्षतात्वमिति मतमनूद्य निरस्य सिषाधयिषाविरहविशिष्टसिद्ध्यभावः पक्षतेति सिद्धान्तितं मणौ।

दीधितिकारैः मणिग्रन्थं यथावद् व्याख्याय यत्र अविरलक्रमेण सिषाधयिषासिद्धिपरामर्शानुमितयो भवन्ति तत्र अनुमित्यव्यवहितप्राक्क्षणे सिषाधयिषाविरहविशिष्टसिद्धेरेव सत्त्वेन तदभावरूपा पक्षता न निर्वहतीत्याक्षेपमुद्भाव्य मणिस्थसिषाधयिषापदं सिषाधयिषायोग्यतापरम्, अतः सिषाधयिषायोग्यताविरहविशिष्टसिद्ध्यभावः पक्षतेति मिश्राणां व्याख्यानमुपन्यस्य ततः "सिषाधयिषाविरहविशिष्टस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नसिषाधयिषाविरहविशिष्टसिद्ध्यभावः पक्षता" इति सार्वभौमपरिष्कारमनूद्य तस्य बहुधा दूषणं विधाय तदनन्तरं "सिषाधयिषाविरहविशिष्टस्य सिद्ध्यनुमानातिरिक्तसाधकमानयोरन्यतरस्याभावः पक्षता" इति उपाध्यायमतं निरस्य सिद्ध्युत्तरानुमितौ सिषाधयिषा हेतुरस्त्वित्याक्षिप्य निराकृतम्।

ततः पक्षता नानुमितिहेतुरिति प्राभाकराणां मतमुपन्यस्तम् ।

गदाधरभट्टाचार्यैश्च दीधितेः प्रतिपदव्याख्यानं कुर्वद्भिः तत्र तत्र स्वमेधाविलासेन बहून् विचारान् प्रकटय्य पण्डितकुलं सुबहु उपकृतम् । अस्य ग्रन्थस्य यथावदध्ययनेन भावविशेषं कतिचिदेव विज्ञातुमीशते । 'पक्षता प्राणघातिनी' इति प्रथा अन्वर्था । विशेषतो दक्षिणापथे पठन-पाठनसंप्रदाये प्रथितस्यास्य ग्रन्थस्य पृथक्तया मुद्रणं बहुभ्यः संवत्सरेभ्यः पूर्वं काञ्चीपुर्यां सुदर्शनमुद्रणालये संपन्नम् । तस्याः प्रतयः अधुना अलभ्याः । अतः विद्यापीठेनानेन पुनर्मुद्रणं क्रियते । एतदर्थं स्वीकृति-दानेनानुगृहीतवद्भ्यः प्रथमप्रकाशकसुपुत्रेभ्यः श्री गाधि – कृष्णमाचार्य-स्वामिभ्यः कृतज्ञतां निवेदयामि । प्रकाशनसमितिद्वारानुमतिं प्रापय्य मुद्रणार्थद्रविणादिव्यवस्थां संपादितवतां राष्ट्रियसंस्कृतसंस्थाननिदेशकानां उपकारं सर्वदा स्मरिष्यामः । सम्यक् पुनर्मुद्रितवतां उदयप्रिण्टर्स् अधिकारिणां भगवान् वेंकटेश्वरो मङ्गलानि वितनोतु ।

तिरुपतिः
20-10-85

एन्. एस्. रामानुजताताचार्यः



श्रीरस्तु ।

श्रीहयग्रीवाय नमः ।

शास्त्रमुक्तावळी ।

तत्त्वचिन्तामणौ

पक्षता ।

—(*)—

❀ व्याप्तिनिरूपणानन्तरं पक्षधर्मता निरूप्यते ।

[दीधितिः ।]

अनुमितिलक्षणैककार्यानुकूलत्वसङ्गत्या व्याप्त्यनन्तरं पक्षधर्मतां निरूपयितुमाह— व्याप्ती ति ।

[गदाधरीयम् ।]

मूले व्याप्तिपक्षधर्मतयो स्सङ्गत्यप्रदर्शनेन न्यूनतां परिजिहीर्षुः तयोरेककार्यकारित्वरूपां सङ्गतिं प्रदर्शयन् **व्याप्त्यनन्तर** मित्यादिमूल मवतारयति- अनुमिती ति । **अनुमितिलक्षणम्**— अनुमितित्वरूपं यत् एकं कार्यम् , तदनुकूलत्वसङ्गत्या— तत्प्रयोजकत्वरूपसङ्गत्या ; प्रयोजकत्वं च कारणतावच्छेदकस्यापीति व्याप्तिपक्षधर्मतयोः परामर्शनिष्ठ कारणतायामवच्छेदकत्वेनानुमित्यजनकत्वेपि न क्षतिः ।

यद्यपि पक्षताया न कारणतावच्छेदकघटकत्वम् , तामनन्तर्भाव्य पर्वतादिवृत्तित्वज्ञानत्वेनैवानुमितिजनकत्वात् ; तथापि पक्षताया अनुमितौ स्वातन्त्र्येण कारणतया तदुपलक्षितधर्मिवृत्तितायाः कारणतावच्छेदक तया तद्घटितविशिष्टस्यैककार्यानुकूलत्वमक्षतमेवेति ध्येयम् ।

निरूपयितु मिति । निरूपणम्— प्रतिपत्त्यनुकूलव्यापारः; एवंच पक्षधर्मताघटकपक्षतानिरूपणस्यापि पक्षधर्मताप्रतिपत्त्यनुकूलत्वेन तन्नि रूपणमक्षतमेवेति मूले पक्षतानिरूपणेपि **पक्षधर्मतां निरूपयितु** मित्यस्य

* " व्याप्त्यनन्तर " मिति पाठे अनुपपत्तिर्गादाधर्यामुद्घाटितेति ध्येयम् ।

तत्र न तावत्सन्दिग्धसाध्यधर्मत्वं पक्षत्वम्; सन्देहो हि न विशेषणम्; परामर्शपूर्वं लिङ्गदर्शनव्याप्तिस्मरणादिना तस्य नाशात् ।

सन्दिग्धे ति ।

नाऽसङ्गतिः । पक्षे धर्मत्वं यस्या इति व्युत्पत्त्या पक्षताधर्मता पदं पक्षीयधर्मविशेषरूपपक्षतापरमिति केचित्; तच्चिन्त्यम्; तथात्वे लिखनसंक्षेपनिर्बन्धिनो दीधितिकारस्य "पक्षतां निरूपयितु" मित्यस्योपेक्षायां बीजाभावात् । व्याप्तीती ति । व्याप्तिनिरूपणानन्तर मिति मूलपाठाभिप्रायेण; "व्याप्तयनन्तर" मिति पाठे च तत्र इकाराभावात् 'प्रत्यक्षे' त्याद्युपेक्ष्य प्रत्यक्षवित्यादिरीत्या प्रत्यक्षोपजीवकत्वा दिति ग्रन्थधारकस्य तथाविधलिखनस्याऽसङ्गत्यापत्तेः । तत्रेति मूले तत्पदं पक्षधर्मतापरम्, सप्तम्यर्थश्च घटकत्वम्; अन्वयश्चास्य पक्षत्व मित्यनेनेत्यवधेयम् । सान्दग्धे त्यादिग्रन्थस्य सन्दिग्धः साध्यरूपो धर्मो यत्रेति व्युत्पत्त्या विषयतया साध्यीभूतधर्मसन्देहवत्त्वं तादृशसन्देह पर्यवसितं पक्षत्वमित्युक्तौ तत्र साध्ये धर्मत्वनिवेशनमफलम् । धर्मपद सार्थक्याय स्वस्मिन् सन्दिग्धं साध्यधर्मत्वं- बहुव्रीहिबलात्साध्यनिरूपित धार्मत्वपर्यवसितं पक्षत्वमित्युक्तौ साध्ये सन्दिग्धं धर्मत्वं यस्य तत्वं पक्षत्वमित्युक्तौ च साध्यनिरूपितधर्मित्वस्य पक्षधर्मत्वस्य वा यत्राप्रसिद्धिः तत्र वक्ष्यमाणानुपपत्तिप्रयोजकं तत् । एवं साध्यकोटिकसंशयस्य निवेशे साध्यं पक्षवृत्ति न वा? साध्यं पक्षनिष्ठात्यन्ताभावप्रतियोगि न वा? इत्यादि

[दी] यत्र साध्यस्य यादृशसम्बन्धावगाहिनिर्णयनिबर्त्यो य स्संशयः स तत्र तादृशसम्बन्धेन साध्यानुमितौ पक्षतेत्यर्थः । तेन न पक्षसाध्यविशेष्यकसंशयाननुगमः ।

संशयासंग्रहः; तादृशसंशयोपादाने च पक्षस्साध्यवा न्नवेत्यादि संशयादनुमित्यनुपपत्तिः, अतो धर्मत्वांशं परित्यज्य केवलान्वयिग्रन्थे मणिकृतैव वक्ष्यमाणं तथाविधसकलसंशयानुगमप्रकारं दर्शयति– यत्रे ति । **यत्र**– यद्धर्मावच्छिन्ने; सप्तम्यर्थो निर्णयान्वयि विशेष्यित्वम् । **साध्यस्य**– साध्यतावच्छेदकावच्छिन्नस्य; षष्ठ्यर्थः प्रकारित्वन ; तस्यापि निर्णये ऽन्वयः । **तत्र**—तद्धर्मावच्छिन्ने; सप्तम्यर्थोऽनुमित्यन्वयि विशेष्यित्वम् । **तादृशसम्बन्धेन साध्यानुमितौ**— तादृशसंसर्गावच्छिन्नसाध्यतावच्छेद कावच्छिन्नविधेयताकानुमितौ । **पक्षता**— जनकीभूतेत्यर्थः, पक्षविशेष्यक साध्याभावविशिष्टबुद्धाविव साध्यधर्मिकपक्षावृत्तित्वपक्षनिष्ठाभावप्रतियोगित्व विशिष्टबुद्धावपि पक्षस्साध्यवानिति निश्चयस्य प्राचीनमते प्रतिबन्ध कत्वा त्साध्यं पक्षवृत्ति न वेत्यादिसंशयसंग्रहः; एवंच शुद्धपर्वतत्वावच्छि न्नोद्देश्यतानिरूपितशुद्धसंयोगसम्बन्धावच्छिन्नशुद्धवह्नित्वावच्छिन्नविधेयता - कानुमितित्वावच्छिन्नं प्रति पर्वतत्वावच्छिन्नविशेष्यतानिरूपितसंयोगसंस र्गावच्छिन्नवह्नित्वावच्छिन्नप्रकारताशालिनिश्चयत्वावच्छिन्नप्रतिबन्धकताकसं - शयो हेतुरिति पर्यवसितम् । तादृशनिश्चयप्रतिबद्धत्वस्य यथाश्रुते घटादि विषयकसमूहालम्बनात्मक वह्न्यादिनिश्चयप्रतिबध्यघटादिसंशयसाधारणत्वा त्तादृशनिश्चयत्वावच्छिन्नप्रतिबन्धकताप्रवेशः । अवच्छिन्नत्वं च अन्यून वृत्तित्वम् ; न तु स्वरूपसम्बन्धविशेषः; तेन वह्निसामान्याभावविशिष्ट बुद्धौ महानसीयत्वादिविषयतामनन्तर्भाव्य वह्निमान् महानसीयवह्नि मानित्यादिसकलज्ञानसाधारणवह्नित्वावच्छिन्नवत्तानिश्चयत्वेनैव प्रतिबन्ध कताकल्पनात् 'महानसीयवह्निमान् वह्निसामान्याभाववान्वा पक्ष '

इत्याकारकसंशयं प्रति महानसीयवह्नित्वावच्छिन्नप्रकारताशालिनिश्चयत्वे नाऽप्रतिबन्धकत्वेपि न तथाविधसंशयस्य महानसीयवह्नित्वावच्छिन्न साध्यकानुमितौ पक्षतात्वानुपपत्तिः न वा महानसीयवह्न्यभावादिविशिष्ट बुद्धिप्रतिबन्धकतावच्छेदककोटौ वह्नित्वावच्छिन्नप्रकारत्वादेर्निविष्टत्वेपि वह्नि मानित्याद्यनुमितौ महानसीयवह्निमान् न वा पक्ष इत्यादिसंशयस्य पक्षतात्वापत्तिः; इत्थं च आहार्यस्य भ्रमत्वज्ञानास्कन्दितस्य च निश्चयस्याप्रतिबन्धकतया ऽनाहार्यत्वम् भ्रमत्वज्ञानानास्कन्दितत्वं च निश्चय विशेषणं देयम्; अतो न तथाविधनिश्चयत्वान्यूनवृत्तिप्रतिबन्धकत्वप्रसिद्धिः. पर्वतो वह्निमान्नवेत्यादेः कस्यापि ज्ञानस्य धर्मान्तरावच्छिन्नविशेष्यकान्य संसर्गकान्यधर्मावच्छिन्नप्रकारकनिश्चयसाधारणसंयोगसंसर्गक वह्नित्वाद्य-वच्छिन्नप्रकारकनिश्चयत्वाद्यन्यूनवृत्तिप्रतिबन्धतात्वं न सम्भवतीति प्रकृत पक्षतावच्छेदकावच्छिन्नविशेष्यतानिरूपितत्वादेः प्रकारतानिवेशकरणम्. उप नीतभानात्मकबाधनिश्चयस्यापि साध्यवत्तानिश्चयसामान्यनिवर्तनीयतया भ्रमत्वज्ञानास्कन्दितस्य च तस्यानुमित्यविरोधितया, तथाविध बाधदशाया मनुमित्यापत्तिः, अतस्संशयत्वनिवेशनम् । नच पक्षसाध्यविशेष्यकसंशयसा धारणस्य अनतिप्रसक्तस्य संशयत्वस्य दुर्वचतया पुनरननुगमतादव स्थ्यमिति वाच्यम् , बाधनिश्चयनिवर्तनीयत्वस्यैवात्र संशयपदेन विवक्षणीयत्वात । केवलान्वयिसाध्यके च साध्ये पक्षनिष्ठाभावप्रतियोगित्वनिश्चय एव सुलभो बाधः, एकविधबाधोपादानेनैव विविधसंशयानुगमसम्भवात्तदननुगमो न दोषाय; अनुगमस्यापि कथंचित्सम्भवाच्च ।

यत्तु पक्षसाध्यवैशिष्ट्यावगाहित्वं संशयपदेन विवक्षितमिति नाननुगमः; साध्यं पक्षवृत्ति न वेति साध्यविशेष्यकसंशयस्यापि तथात्वादिति; तदसत् ;— तथा सति साध्यपक्षवैशिष्ट्यानवगाहिनः साध्यं पक्षनिष्ठाभावप्रतियोगि न वेति संशयस्यासंग्रहात । नच केवलान्वयिस्थले

साध्यं पक्षवृत्ति न वेत्यादिसंशयादेव अनुमित्युत्पत्त्या तथाविधसंशया संग्रहो न दोषायेति वाच्यम् ; प्रमेयत्वं पक्षनिष्ठात्यन्ताभावप्रतियोगि न वेत्यादिसंशयस्य केवलान्वयिग्रन्थे मणिकृतैव संगृहीततया तद्विरोधात् ।

वस्तुतस्तु- तादात्म्येन प्रमेयपक्षकवाच्यसाध्यकस्थले तादृशसंशया प्रसिद्धिः;- तादात्म्यसम्बन्धेन पक्षसम्बन्धित्वाभावरूपकोट्यप्रसिद्धेः । नच साध्ये पक्षनिष्ठाभावप्रतियोगित्वसंशयस्य पक्षतात्वेप्युक्तस्थले पक्षतावच्छेदकसामानाधिकरण्यप्रात्रेणानुमितेरुद्देश्यत्वे पक्षतावच्छेदकावच्छेदेन वर्तमानभेदप्रतियोगित्व-कोटिकसंशयस्यैव साध्यवत्तानिर्णयप्रतिबध्यतया पक्षतात्वमङ्गीकर्तव्यम् ; तच्च न सम्भवति, प्रमेयत्वावच्छेदेन वर्तमानभेदाप्रसिद्ध्या कोट्यप्रसिद्धेरिति वाच्यम् ;— घटपटोभयत्वावच्छिन्नभेदस्य प्रतियोगिन्यपि प्रत्येकं वर्तमानतया तादृशभेदस्यैव पक्षतावच्छेदकावच्छेदेन वर्तमानस्य प्रसिद्धेः । तत्र पक्षतावच्छेदकावच्छिन्नवृत्तिकाभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वतादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकत्वोभयत्वावच्छिन्नतदभावकोटिकसंशयस्य पक्षतात्वोपगमाच्च । एवमप्रसिद्धसाध्यकव्यतिरेक्यनुमानस्थले साध्यवैशिष्ट्यावगाहिसंशयानुपपत्तेस्तत्र साध्यात्मकाभावप्रतियोगिनि पक्षवृत्तित्वादिसंशयस्यैव पक्षतात्वस्योपगन्तव्यतया संशयपदेन साध्यपक्षवैशिष्ट्यावगाहित्वनिवेशनासम्भव इति ।

अथ वह्निव्याप्यधूमसाध्यकस्थले महानसीयवह्नित्वाद्यवच्छिन्नसाध्यकस्थले च 'वह्निमान् वा पक्ष' इत्येतादृशसंशयस्य पक्षतात्वप्रसङ्गः, साध्यवत्तानिश्चयप्रतिबध्यत्वात् । न च सिद्धसाधनस्थले अनुमितिवारणमेव पक्षताहेतुत्वकल्पनप्रयोजनम् , एवंचोक्तसंशयस्य पक्षतात्वोपगमेपि सिद्धिदशायामनुमित्यापत्त्यसम्भवात्तस्य पक्षतात्वमिष्टमेवेति वाच्यम् ; साध्यतावच्छेदकावच्छिन्नसाध्यतदभावान्यतरस्मिन् पक्षसम्बन्धावगाहिसन्देहस्यैव प्राचीनैः पक्षतात्वोपगमात् ; अन्यथा बाधसाधारणरूपेण पक्षतात्वोप-

गमेपि सिद्धिकालेनुमितिवारणसम्भवाद्बाधवारकसंशयत्वनिवेशस्य निष्प्रयो जनकत्वापत्तेः । न च तादृशसंशयस्य वह्निव्याप्याद्यभाववत्तानिश्चयरूप बाधाप्रतिबद्धत्वतया नातिव्याप्तिरिति वाच्यम् ; वह्निव्याप्याभावाभाव वान् पर्वतः पर्वतो वह्निमान्नवेति संशयस्य तादृशबाधनिश्चयप्रतिबध्य तया तावतापि तद्वारणासम्भवात् ।

यत्तु-प्रकृतसाध्यतावच्छेदकावच्छिन्नविषयताघटितधर्मावच्छिन्नप्रति बध्यतानिवेशा न्नोक्तातिप्रसङ्गः, वह्न्यभावविशिष्टज्ञानत्वाद्यवच्छिन्नाया वह्निव्याप्यवत्तानिश्चय प्रतिबध्यताया अवच्छेदककोटौ वह्निव्याप्य त्वावच्छिन्नविषयताया अनन्तर्भावादिति, तन्न;- वह्न्यभावादिसाध्यक स्थले वह्निमान्नवेत्यादिसंशयासंग्रहप्रसङ्गात् , वह्निविशिष्टबुद्धित्वाद्यवच्छि न्नाया वह्न्यभावादिनिश्चयप्रतिबध्यताया अवच्छेदकगर्भे वह्न्यभाव त्वाद्यवच्छिन्नविषयताया अनिवेशात् ; यत्र च वह्निव्याप्यत्वाद्यवच्छिन्न स्यैव पक्षत्वं साध्यत्वं च तत्र वह्निव्याप्यो वह्निमान्नवेति संशय वारणस्याशक्यत्वात् ।

यत्तु— साध्यवत्ताज्ञानप्रतिबन्धकतावच्छेदकविषयताघटितधर्मा वच्छिन्नत्वेन प्रतिबध्यताया विशेषणीयतया वह्निव्याप्यवत्ताज्ञानं प्रति वह्न्यभावादिनिश्चयत्वेनाप्रतिबन्धकतया तद्विषयताया स्साध्यवत्ताज्ञान प्रतिबन्धकतावच्छेदकत्वविरहेण नातिप्रसङ्ग इति; तदपि न;— तावतापि महानसीयवह्निसाध्यकस्थले महानसीयवह्न्यभावाभाववान् पर्वतो वह्निमान्नवेति संशयवारणासम्भवात् ।

अत्रोच्यते;— संशयत्वं स्वनिष्ठविषयताघटितधर्मावच्छिन्नप्रति बन्धकतानिरूपितप्रतिबध्यताशालित्वम् ; ज्ञानभेदेन विषयताभेदानभ्युप गमात्संशयनिष्ठवह्निमत्पर्वतनिरूपितविषयताया अपि प्रत्येकं निश्चय

वृत्तित्वात्प्रतिबन्धकतावच्छेदकघटकत्वोपपत्तिः; वह्न्यादिसाध्यकस्थले वह्न्यभाववान् पर्वतो घटवान्नवेति संशयस्य तादृशधर्माक्रान्तस्य साध्यवत्तानिश्चयप्रतिबद्धस्य च वारणाय साध्यवत्तानिश्चयप्रतिबद्धत्वतावच्छेदकावच्छिन्नत्वेन निरूपितसंशयत्वघटकप्रतिबध्यता निवेशनीया; घटादिमत्ताज्ञानत्वावच्छिन्नप्रतिबध्यताया अतथात्वान्नातिप्रसङ्गः . तत्र वह्न्यभाववान्नवेति संशयस्य पक्षतात्वमिष्टमेव, तस्य वह्निः पक्षनिष्ठाभावप्रतियोगी न वेति संशयसमशीलत्वात् । स्वनिष्ठविषयतायां बाधप्रतिबध्यतावच्छेदकत्वं निवेशनीयम्, तेन वह्निव्याप्यसाध्यकस्थले वह्निमान्न वा पक्ष इत्येतादृशसंशयस्य व्युदासः; तत्र वह्निव्याप्याभावाभावत्वेन व्याप्यस्य पृथग्भानेपि संशयत्वघटकीभूतस्वनिष्ठवह्निमत्पक्षविषयताया वह्निव्याप्याभावनिश्चयप्रतिबध्यतावच्छेदकत्वविरहात् । एवं च वह्न्यभाववान् पर्वतो घटवान्नवेत्यादौ व्यावृत्त्यसम्भवेपि शुद्धवह्नित्वावच्छिन्नसाध्यकस्थले वह्न्यभाववान् पक्ष इत्येतादृशबाधनिश्चयप्रतिबध्यस्य महानसीयवह्निमान्न वा पक्ष इत्येतादृशसंशयस्य पक्षतात्ववारणाय साध्यवत्तानिश्चयप्रतिबध्यतावच्छेदकावच्छिन्नत्वनिवेशनं सफलमिति ध्येयम् । एतेन अवच्छेदकावच्छेदेनानुमितौ पक्षतावच्छेदकसामानाधिकरण्यमात्रेण कोटिद्वयावगाहिनो निश्चयस्यावच्छेदकावच्छेदेन साध्यादिमत्तानिश्चयप्रतिबध्यत्वेपि निरुक्तसंशयत्वाभावेन न पक्षतात्वमिति संक्षेपः ।

अथ अवच्छेदकावच्छेदेन कोटिमवगाहमानस्य कोटिद्वयसमुच्चयस्य पक्षतात्वापत्तिः, तस्याप्युक्तरूपाक्रान्तत्वात्; न च विरोधावगाहित्वानिवेशात्तद्वारणमिति वाच्यम्; कुत्रचित्किंचित्प्रतियोगिकविरोधभानस्य समुच्चयेप्यक्षतत्वात्; साध्यतदभावादिविरोधावगाहित्वस्य प्रत्येकं सकल

संशयसाधारण्यासम्भवादिति चेन्न; संयोगादेरव्याप्यवृत्तिताज्ञानदशायां तद्वत्त्वग्रहविषयीभूतधर्मिणि तदभावादिग्रहोत्पत्त्या तद्वत्ताज्ञानस्य तद्भाववत्ताज्ञानप्रतिबन्धकतायां अव्याप्यवृत्तित्वज्ञानस्योत्तेजकतामपेक्ष्य व्याप्यवृत्तितावगाहित्वेनैव प्रतिबन्धकतोपेयते; व्याप्यवृत्तित्वञ्च अनवच्छिन्नाधारताकत्वम् , सर्वत्र प्रतिबन्धकज्ञाने तादृशाधारताया अन्ततः कोट्यो स्संसर्गविधयैव भानमुपेयते; एवंच समुच्चयनिष्ठकोटिविषयता न विपरीतज्ञानप्रतिबन्धकतावच्छेदिका, व्याप्यवृत्तित्वविषयत्वानिरूपितत्वात् ; अत्र उक्तसंशयत्वनिरुक्तौ स्वपदेन समुच्चयोपादानासम्भवेन तस्य पक्षतात्वापत्तिविरहात् ।

अथ वा- स्वघटितधर्मावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकीभूता या स्वनिरूपकतावच्छेदकधर्मावच्छिन्ननिरूपितविरोधविषयतानिरूपितप्रकारिता सामानाधिकरण्यसम्बन्धेन तद्विशिष्टप्रकारितैव संशयत्वम् ; तच्च समुच्चयव्यावृत्तम् , समुच्चये विरोधाभावेन कोटित्रयविषयतयोर्विरोधविषयत्वानिरूपितत्वात् , संशयेचान्ततः कोट्योः संसर्गतयापि परस्परविरोधभानोपगमेन सकलसंशयसंग्रहः , यदंशे संशयत्वं तत्कोटिविरोधस्यैवोक्तरूपेणोपादानसम्भवात् न वस्त्वन्तरविरोधभानमादायातिप्रसङ्ग इति ।

केचित्तु— साध्यनिश्चयसाध्याभावनिश्चयप्रतिबध्यतावच्छेदकविशेष्यताशालित्वं समुदितार्थः; संशये च धर्मिणि उभयप्रकारतानिरूपितैकविलक्षणविषयता समुच्चयवैलक्षण्यायोपाय्यत इति तादृशविषयतायां विभिन्नरूपेण उभयनिश्चयप्रतिबध्यतावच्छेदकतया नासम्भव इत्याहुः ; तच्चिन्त्यम् ।

[दी] न वा सम्बन्धान्तरेण सन्देहे निर्णीतसम्बन्धेन पक्षत्वम् , न वा तमःप्रभृतिषु

प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतदभावकोटिकज्ञानत्वादिकमुपेक्ष्य निरुक्तरूपेण संशयनिवेशनप्रयोजनं दर्शयति— **तेन न पक्षे** ति । पक्षविशेष्यकस्य पक्षस्साध्यवान्न वेत्यस्य साध्यविशेष्यकस्य साध्यं पक्षवृत्ति न वेत्यस्य संशयस्याननुगमः; तथा सति फलस्याविलक्षणतया व्यभिचारेण कारणता भज्यतेति भावः । इदमुपलक्षणम् ; साध्यवद्भेदादिकोटिकसंशयाननुगमोपि बोध्यः ।

विशिष्य सम्बन्धनिवेशप्रयोजनं दर्शयति— **न वे** ति । **सम्बन्धान्तरेण**— तत्सम्बन्धातिरिक्तसम्बन्धेन; **सन्देहे**— सन्देहदशायाम् ; **निर्णीतसम्बन्धेन**— पक्षांशे साध्यीयसंसर्गविधया तत्कालीननिर्णयविषयीभूततत्सम्बन्धेन । एतदनन्तरं "अनुमिता" विति पूरणीयम् । तत्सम्बन्धेन संशयासत्त्वेपि तत्सम्बन्धेन सिद्धिशून्यकाले इष्टापत्तिसम्भवा **निर्णीते** त्युक्तम् । सम्बन्धमनिवेश्य साध्यनिर्णयसामान्यनिवर्त्यत्वनिवेशेऽप्रसिद्धि प्रसङ्गः; यत्किंचिन्निर्णयनिवर्त्यत्वं यत्किंचित्संसर्गकनिश्चयसामान्यनिवर्त्यत्वं वा यदि निवेश्यते ? तदाऽयमतिप्रसङ्गो बोध्यः । धर्मत्वांशानिवेशनप्रयोजनमाह- **तमःप्रभृतिष्वि** ति । **स्व**धर्मत्वसंशयविषयसाध्यकत्वं पक्षत्वमित्युक्तौ धर्मत्वनिवेश्यवृत्तिसाध्यकघटादिपक्षकस्थले न पक्षतावैकल्यम् , घटादिसमवेतत्वस्य प्रसिद्धया गगनादौ तत्संशयसम्भवादिति तमःप्रभृतिपर्यन्तानुधावनम् ; तथा च साध्ये सम्बन्धान्तरेण पक्षवृत्तित्वसंशयदशायां निर्णीतसम्बन्धेनानुमितिवारणाय प्रकृतसाध्यतावच्छेदकसम्बन्धेन स्ववृत्तित्वसंशयस्यावश्यं निवेशनीयतया तमःप्रभृतिसमवेतत्वस्याप्रसिद्धया साध्ये पक्षवृत्तित्वसन्देहमादायापि न तत्र पक्षत्वोपपत्तिरिति

नाप्युपलक्षणम्; अव्यावर्तकत्वापत्तेः । नापि साधकबाधकमानाभावः, उभयाभावस्य प्रत्येकं सत्त्वेपि सत्त्वात् । नाप्यभायद्वयं तथा, बाधकमानाभावस्य व्यर्थत्वात् । हृदादेः पक्षत्वेपि बाधहेत्यसिद्ध्यादेरवश्यकत्वेनानुमित्यनुत्पादात्। नापि साधकमानाभावः; " श्रोतव्यो मन्तव्यो निदिध्यासितव्य " इति श्रुत्या समानविषयकश्रवणानन्तरं मननबोधनात्, प्रत्यक्षदृष्टेष्यनुमानदर्शनात , एकलिङ्गावगतेपि लिंगान्तरेण तदनुमानाच्च। 'श्रोतव्य श्रुतिवाक्येभ्यो मन्तव्य श्चोपपत्तिभिः' इति स्मरणात॥

[दी] समवायेनाकाशादिसाधने तद्वैकल्यम् । संशययोग्यतां निरस्यति- नापी ति । साधकबाधकमाने- सिद्धिबाधौ ।

भावः । स्वरूपसम्बन्धेन तमोवृत्तित्वस्य प्रसिद्ध्या तेन सम्बन्धेन अनुमितौ नानुपपत्तिः, अत स्समवायेने ति । पक्षे साध्यीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नधर्मितासंशयस्य पक्षतात्वे तमःप्रभृतिषु वृत्तिमत्साधने नानुपपत्तिः, अत आकाशादी ति । तद्वैकल्यम्- पक्षतावैकल्यम् ।

सन्देहोनुमितौ हेतुः? विशेषणतया पक्षधर्मताज्ञाननिष्ठायां तज्ज नकतायां अवच्छेदकः? अथ वा उपलक्षणतया तादृशजनकतायामव च्छेदकः? तत्राद्यं पक्षद्वयं दूषयति- मूले सन्देह इति। विशेषणम्- अपेक्षणीयानुमित्यव्यवहितप्राक्सत्ताकं अनुमितिकारणं विशेषणविधया कारणतावच्छेदकं वेति याक्त्! परामर्शपूर्वं तस्य संशयस्य नाशा दित्यन्वयः। यत्रादौ लिङ्गदर्शनं ततो व्याप्तिस्मरणं तदभिप्रायेण लिङ्ग दर्शनस्य यत्र तयोर्विपरीतक्रमः, तदभिप्रायेण व्याप्तिस्मरणस्य नाश कत्वमभिहितम्; अत एकत्रोभयोर्नाशकत्वासम्भवेपि न क्षतिः। आदिपदेन यत्र संशयानन्तरक्षणे व्याप्तिस्मरणाद्यनुगुणज्ञानान्तरोत्पादः तदनन्तरमेव व्याप्तिस्मरणादिः तत्रत्यतादृशज्ञानसङ्ग्रहः।

द्वितीयं दूषयति- नोपलक्षण मिति। अव्यावर्तकतापत्तेः- सिद्धिकाले अनुमित्यवारकतापत्तेः। तत्कालीनपरामर्शस्यापि कालान्तरीण संशयविषयधर्मिवृत्तित्वावगाहितया सामग्र्या अक्षतत्वादिति भावः।

अथ साध्यसन्देहोऽनुमितौ हेतुरेव, लिङ्गदर्शनव्याप्तिस्मरणादिना पूर्वोत्पन्नसंशयनाशेपि तदनन्तरं परामर्शाव्यवहितप्राक्क्षणजातसंशयान्तरा देव अनुमितिरिति कल्प्यते; नचानुत्पन्न एव संशये यत्न स्वसामग्रीव शात्परामर्शोत्पत्तिस्तत्र अनुमित्यनुत्पादप्रसङ्गः, परामर्शकाले तदुत्तरं च विशेषदर्शनरूपप्रतिबन्धकवशेम संशयोत्पादासम्भवादिति वाच्यम्; फलानुरोधेन सर्वत्रैवानुमित्युपधायकपरामर्शाव्यवहितप्राक्क्षणे संशयोत्पाद कल्पनात्. यत्र संशयोत्पादप्राक्क्षणे परामर्शसामग्री प्रमाणसिद्धा, यत्र वा परामर्शसामग्रीपूर्वक्षणे संशयजनकधर्मिज्ञानाद्यभावः प्रमाणिकस्तत्र परामर्शानन्तरं साध्यस्य प्रत्यक्षनिश्चय एवोपगम्यते, तत एव प्रवृत्त्या द्युपपत्तेः; तत्रानुमिनोमीत्यनुव्यवसायस्याप्यगत्या भ्रमत्वमेव कल्प्यते; अनुगतानुगतसिषाधयिषाभावकूटविशिष्टसिद्धयभावस्या ऽनुमितिहेतुत्वा-

पेक्षया संशयहेतुतायां लाघवात् . संशयहेतुत्वोपगमे बाधनिश्चयदशायां संशयाभावादेवानुमितिवारणसम्भवात् नानाविधबाधाभावस्य अनुमितौ हेतुत्वाकल्पनेनानुमितिसामग्रीप्रतिबन्धकतायां तदनिवेशेन च लाघवात् . जनकज्ञानविरोधितयैव च बाधादीनां हेत्वाभासत्वोपपत्तेः. संशयस्य च कार्यतावच्छेदककोटौ कारणवैशिष्ट्यं निवेश्य विशिष्य तादृशतादृश संशयत्वेनैव हेतुता वाच्या, अतो दीधितिकारदार्शितरूपस्य स्वत्वघटित ताया उक्तयुक्त्या आवश्यकत्वात् प्रतिबध्यतादीनां स्वस्वावच्छेदक भेदेन भिन्नानामननुगमाच्च शब्दानुगममात्रपर्यवसानेपि न क्षतिः। संशयस्य बाधसाधारणतदभाववत्ताज्ञानत्वेन कारणत्वम्, न तु पक्षधर्मिकसाध्यतदभावो भयप्रकारकज्ञानत्वरूपसंशयत्वेन; गौरवात् । बाधनिश्चयदशायां च नानुमित्या पत्तिः, प्रत्यक्षादिसाधारणालौकिकविशिष्टबुद्धित्वावच्छिन्नं प्रति बाधनिश्चय प्रतिबन्धकताया आवश्यकत्वादिति तु न श्रद्धेयम् ; बाधनिश्चये अप्रा माण्यग्रहसत्त्वे अनुमित्यापत्तेः, अप्रामाण्यग्रहाभावस्य संशयजनकतायां प्रयोजनविरहेणानिवेशात्, साध्यसन्देहे अप्रामाण्यग्रहसत्त्वेप्यनुमित्युप गमे क्षतिविरहात्, संशये अप्रामाण्यनिश्चयसत्त्वे अनुमित्यनुत्पादेपि संशये विषयसंशायकस्य अप्रामाण्यसंशयस्यार्किंचित्करतया तत्र अप्रामाण्य निश्चयत्वावच्छिन्नाभावस्यैव निवेशनीयतया अप्रामाण्यशङ्कास्कन्दित बाधनिश्चयादनुमितेर्दुर्वारत्वात् इति चेन्न;– प्रत्यक्षादिना निर्णीतस्यापि साध्यस्यानुमित्सया अनुमितेरानुभाविकत्वात्, संशयस्य पक्षतात्वे तद नुपपत्तेः। अनुभवापलापे विशेषदर्शनमूलकप्रत्यक्षादेव सर्वत्र प्रवृत्त्यादि सम्भवे अनुमानप्रामाण्यस्यैव विलोपापत्तेः . पक्षधर्मताप्रत्यक्षव्याप्तिस्मरण योरविरलक्रमेणोत्पत्त्यनन्तरं यत्र परामर्शः तत्र व्याप्तिस्मरणकालीनपक्ष धर्मताज्ञानस्यापि विशेषदर्शनतया तस्य पूर्वं सत्त्वेन तत्र व्याप्ति स्मरणानन्तरं संशयाभावात्। एवमप्रसिद्धसाध्यकस्थले संशयासम्भवादनुमि त्यनुपपत्तेः, संशयानन्तरजातसिद्ध्यात्मकपरामर्शादनुमित्यापत्तेश्चेति संक्षेपः।

[दी] केवलान्वयिनि च पक्षनिष्ठाभावप्रतियोगित्वधीरेव सुलभो बाधः ।
ननु तत्रापि

संशयनाशेपि यावन्न निर्णय स्तावत्पर्यन्तं संशययोग्यताया अनपायात्तस्या एव पक्षतात्वं सम्भवतीति तदनिराकरणे मूलस्य न्यूनता, अतो **नापी**ति मूलमेव संशययोग्यतानिराकरणपरतया व्याचष्टे– **संशययोग्यता**मिति । साधकबाधकमानपदस्य सिद्धिबाधहेतुरूपयथाश्रुतार्थपरत्वे सवदनुमित्यनुपपत्तिः; अनुमितिपूर्व सिद्धिबाधहेतुभूतचक्षुरादेस्सिद्धिहेतुभूत परामर्शस्य च सर्वत्रैव सत्त्वात् , अतस्तत्पदं सिद्धिबाधपरतया व्याचष्टे- **साधके** ति । यद्यपि बाधकमानपदस्य बाधजनकसामग्रीपरत्वेपि न क्षतिः, बाधसामग्र्यनन्तरक्षणे कदाप्यनुमितेरनुत्पादात् ; तथापि बाध जनकतामात्रेण तत्सामग्रीपरत्वे तदवच्छिन्नाभावस्य हेतुता लभ्यते, तत्र चोक्तैवानुपपत्तिः; बाधसामग्रीत्वेन तत्परत्वं च विना लक्षणां न निर्वहतीति लक्षणाया आवश्यकत्वे बाध एव लक्षणोचितेत्यभिप्रायेण इदम् ।

ननु पक्षे साध्याभावनिश्चयस्य बाधतया केवलान्वयिनि साध्याभावाप्रसिद्धया बाधाप्रसिद्धिरिति तदभावघटितपक्षतावैकल्यम्, अत आह- **केवलान्वयिनिचे** ति । **पक्षनिष्ठे** ति । " साध्ये " इत्यादिः । **धीः**- निर्णयः । **सुलभो बाध** इति । तथा च तादृशबाधाभावस्यैव पक्षतावटकत्वान्नानुपपत्तिरिति भावः । **सुलभ** इत्यनेन तत्राभावांशे साध्यप्रकारकभ्रमात्मकबाधस्यापि कदाचित्कस्यचित्पुरुषस्य प्रसिद्धया तदभाव घटितत्वमपि पक्षतायास्सम्भवतीति सूचितम् ।

व्याप्तिस्मरणादिना पूर्वानुमित्सानाशस्थले अनुमितमुपपाद्य **सिषाधयिषाविरहेपी**त्यादिग्रन्थमवतारयति–**नन्वि** ति । **तत्रा**पि– परामर्शपूर्व

सिषाधयिषितसाध्यधर्मा धर्मी पक्षः, अथ

पुनरनुमित्सा ततः परामर्शान्तरं स्मरणात्मकाद्वा परामर्शादनुमितीष्टसाधनताविषयकादनुमित्सा ततोनुमिति रिति फलबलात्कल्पनीयमित्यत आह– **सिषाधयिषे** ति ।

अनुमित्सानाशस्थलेपि । **पुनरनुमित्सा**— परामर्शानन्तरं अनुमित्सान्तरम् । ननु परामर्शानन्तरोत्पन्नेच्छाजनकज्ञानेनेच्छाजननसमकालं परामर्शस्य नाशात् तादृशेच्छातः कथमनुमितिरित्यत : आह— **ततः परामर्शान्तर** मिति ; विनश्यदवस्थापन्नानुमित्सयाऽनुमितिमुपपाद्य अविनश्यदवस्थयाप्युपपादयति– **स्मरणात्मकाद्वे** ति । चाक्षुषादिपरामर्शस्यानुमित्यंशे इष्टसाधनताप्रकारकसमूहालम्बनरूपत्वं न सम्भवति, स्वायोग्यमुख्यविशेष्यकज्ञानजनने इन्द्रियस्याऽसामर्थ्यात् ; अतस्तस्य तथात्वमुपेक्ष्य तन्मूलकव्याप्यवत्पक्षगोचरसंस्कारात्पूर्वानुमित्साजनकेष्टसाधनताज्ञानाहितसंस्कारसहकृतात् समूहालम्बनस्मरणात्मकपरामर्शान्तरस्य अनुसरणम् । **स्मरणे** त्युपलक्षणम् ; तथाविधमानसपरामर्शोपि बोध्यः ।

ननु कल्पकाभावान्नैतादृशकल्पनासम्भव इत्याशंकां परिहरति— **फलबला** दिति । सिषाधयिषारूपकारणं विना अनुमित्यात्मककार्यानुदयबलादित्यर्थः । **सिषाधयिषाविरहेपी** ति मूलस्य "अनुमातु" रित्यादिः; तेनेश्वरस्य सिषाधयिषायास्तत्रक्षतत्वेपि न क्षतिः. इच्छारूपपक्षतायां आत्मनिष्ठप्रत्यासत्त्यैव हेतुतेत्यभिप्रायेणेदम् । नच तत्रापि पूर्ववत्फलबलादनुमित्सां कल्पयित्वा अनुमितिरशक्योपपत्तिका, तत्र तदभावस्यानुभवसिद्धतया कल्पनाऽसम्भवात् ; पूर्वं कदापि यस्य मेघानुमितिर्नासीत्तेन तत्रेष्टसाधनतायां अगृहीतत्वेन तद्गोचरानुभवस्यचासम्भवेन तदनुमित्सा सामग्र्या एव दुर्घटत्वाच्च ।

[दी] नचानुमितिजनकेच्छैव पक्षता, सा च क्वचित्स्वनिष्ठैव सर्वत्रेश्वरनिष्ठैव सुलभेति वाच्यम् ; तस्या नित्यत्वेन सिद्धौ सत्यामपि पक्षता प्रसङ्गात् । नच तस्यास्तदानीं न तज्जनकत्वम् , तद्धि न योग्यता, अनपायात् ; न तदुपधानम् , अनुमितेः पूर्वं तद भावात् । न तत्सामग्रीसमवधानम् , कारणमात्रस्य पक्षताकुक्षि-

---

विषयनिष्ठप्रत्यासत्त्यैवानुमित्साया हेतुता वाच्येत्यभिप्रायेण उक्त स्थले पक्षतोपपत्तिं दीधितिकृदाशङ्कते— नचे ति । इच्छैव-- समानाधिकरणव्यधिकरणसाधारणेच्छामात्रमेव । स्वनिष्ठैव— अनुमातृसमवेतैव । तस्याः- ईश्वरेच्छायाः । पक्षताप्रसङ्गा दिति । तथा च सिद्धचनन्तर मनुमित्यापत्तिरित्यर्थः । तदानीम्— सिद्धिदशायम् । नतज्जनकत्व मिति । तथाचानुमितिजनकत्वविशिष्टेच्छात्वेनैव हेतुता वाच्या; कारणतावच्छेदक विशिष्टस्य प्राक्सत्त्वमेव फलोपधाने तन्त्रमिति नातिप्रसङ्ग इति भावः ।

अनुमितिजनकत्वेन जनकत्वे आत्माश्रयसत्त्वेपि स्फुटत्वात्तमुपेक्ष्य दूषणान्तरमाह— तद्धी ति । योग्यता—स्वरूपयोग्यता । अनपाया दिति । कारणतावच्छेदकधर्मरूपयोग्यतायास्सर्वदैव सत्त्वादित्यर्थः । तदुपधानम्— तद्वैशिष्ट्यम् । तदभावात्- अनुमितिवैशिष्ट्याभावात् । तथाच अनुमित्युत्पादनियामिकाया अनुमितिविशिष्टेच्छायाः प्रागसत्त्वेन अनुमितेरेवानुपपत्तिः । इदमुपलक्षणम् ; अनुमित्यनन्तरं अनुमित्या पत्तिरपि बोध्या ।

नन्वनुमितिजनकतावच्छेदका यावन्तो धर्माः प्रत्येकं तदवच्छिन्न कूटविशिष्टत्वरूपतत्सामग्रीसमवधानमेवेच्छाविशेषणं देयम्; तच्च कार्यान्यव हितप्राक्क्षण एवेति नातिप्रसङ्ग इत्याशंकामपनुदति- न तत्सामग्री ति । कारणमात्रस्यैवे ति । तथाच परामर्शाद्यसत्त्वदशायामीदृशपक्षतावि रहा देवानुमितिवारणसम्भवात्परामर्शादीनां हेतुताविलयप्रसङ्ग इति भावः ।

[दी] निक्षेपप्रसङ्गात्, शेषवैयर्थ्यात्, तदानीं सामग्रीविरहप्रयोजकव्यति रेकप्रतियोगिनः कारणान्तरस्य वक्तव्यतापातात्च ।

ननु सामग्रीसमवहितेच्छात्वेन न पक्षतावा हेतुत्वमुपेयते, सामग्री षटकहेतूनां मिथो विशेष्यविशेषणभावे विनिगमनाविरहात् तेषां स्वतन्त्रकारणतयैवातिप्रसङ्गस्य वारितत्वात् ; किंत्वीश्वरेच्छामादायैव सिद्धिकाले पक्षताव्यवहारवारणाय पक्षपदप्रवृत्तिनिमित्तत्वमेव तादृप्येणोपेयते, अतो नायं दोष इति दूषणान्तरमाह- शेषे ति । अनुमितिसामग्र्या एव पक्षतात्वसम्भवेन इच्छारूपविशेष्यभागस्य निष्प्रयोजनकत्वादित्यर्थः

अत्रचेष्टापत्तौ दूषणान्तरमाह- तदानी मिति । परामर्शादिसमव हितसिद्धिदशायाम् । अन्वयश्चास्य सामग्रीविरहे त्यनेन । वक्तव्यत्वा पातात्- सामग्रीमध्यनिवेशापातात् ; तथाचैतादृशकारणं सिषाधयिषा विरहविशिष्टसिद्धयभाव एव । एवंचैतस्यैव पक्षतात्वमस्तु, अलं कारणान्त रस्य पक्षताकुक्षिनिःक्षेपेणेति सिद्धान्तलक्षण एव पर्यवसानमिति भावः ॥

सिद्धान्तलक्षणे — सिध्युत्तरक्षणे सिषाधयिषाधीनानुमितेरुपपादनाय सह कृतान्तं साधकज्ञानविशेषणमुपात्तम् ; तच्च तदैवोपपद्यते- यदि सिद्धि सिषाधयिषापरामर्शानां त्रयाणां अनुमित्यव्यवहितपूर्वक्षणे अवस्थितिस्त म्भवति ? नचैवमुपपद्यते, आत्मयोग्यविशेषगुणानां द्विक्षणमात्रावस्था यित्वात् त्रयाणां युगपदनवस्थानात् । नच यत्रापेक्षाबुद्ध्यात्मकस्य परामर्शस्य साध्यनिश्चयस्य वा प्रथमसुत्पाद स्तत्रैव तृतीयक्षणे त्रयाणा मवस्थानं सम्भवतीति वाच्यम्, अपेक्षाबुद्धेः क्षणत्रयावस्थायित्वमङ्गी-कुर्वाणैस्तदव्यवहितोत्तरक्षणे तदधिकरणे विशेषगुणोत्पादानभ्युपगमात् ; अन्यथा स्वसमानाधिकरणस्वानन्तरोत्पन्नविशेषगुणात्मक नाशक बलात्तस्या अपि तृतीयक्षणे विनाशापत्तेरित्याशंकापरिजिहीर्षया सिद्ध्यात्मकसमूहालम्बनपरामर्शस्थले तादृशविशेषणप्रयोजनं दर्शयति—

तथा हि:- मुमुक्षोश्शब्दादात्मावगमेपि मननस्य मोक्षोपयोगित्वेन सिद्धिविषयानुमितीच्छयात्मानुमानम् ; अत एव "प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः" "न हि करिणि दृष्टे चीत्कारेण तमनुमिमतेनुमातारः" इति वाचस्पतिमिश्रवचनयोरविरोधः, अनुमित्सातद्विरहाभ्यां तदुपपत्तेरिति चेन्न;- सन्देहवत्परामर्शपूर्वं सिषाधयिषाया अभावात्, योग्यतायाश्चानिरूपणात्, सिषाधयिषाविरहेपि घनगर्जि-

---

[दी] सिषाधयिषे ति । यत्रानुमित्सानन्तरं साध्यतद्व्याप्यविशिष्ट पक्षस्मरणं अनुमितीष्टसाधनताविषयकताद्दशस्मरणाद्वानुमित्सा,

---

यत्रे त्यादिना । अनुमित्सान्यवहितोत्तरक्षणे विशिष्टपक्षप्रत्यक्षं न सम्भवति, इच्छोत्पत्तिकाले ज्ञानानुत्पत्त्या विशेषणज्ञानघटितसामग्रीविरहात् ; इच्छापूर्वक्षणे तादृशसामग्रीसमवधाने इच्छासामग्र्यपेक्षया प्रत्यक्षसामग्र्याः बलवत्त्वेन तस्या एव पूर्वोत्पादासम्भव इत्यतो विशिष्टस्मरणानुधावनम् । न्यूनताभङ्गाय परामर्शपूर्वोत्पन्नेच्छास्थले प्रयोजनमुक्त्वा तदनन्तरोत्पन्नेच्छास्थले तद्दर्शयति- अनुमिती ति । यत्रे त्यनुषज्यते । इच्छासामग्रीसम्पत्तये अनुमितीष्टसाधनताविषयके ति । तादृशस्मरणात्-

तेन मेघानुमानात्, स्वकारणाधीन तृतीयलिङ्गपरामर्शबलेन अनयोर्विसानु मानाच्च । उच्यते;- सिषाधयिषाविरह सहकृतसाधकमानाभावो यत्र स पक्षः,

---

अनुमित्सापूर्वकालोत्पन्नविशेषणस्मरणाद्वानुमित्साकालोत्पन्नेन्द्रियसन्नि कर्षसहिता त्साध्यतद्व्याप्यविशिष्टपक्षप्रत्यक्षं तदनन्तरंचानुमिति स्तत्र पक्षतासम्पत्तये **सहकृतान्तं** साधकमानविशेषणम् ।

साध्यतद्व्याप्यविशिष्टपक्षस्मरणात् । पूर्वोक्तयुक्त्या चाक्षुषादिपरामर्शस्या नुमिताविष्टसाधनतावगाहित्वासम्भवात् यत्र परामर्शाव्यवहितपूर्वक्षणे इष्ट साधनताज्ञानं तत्र तत्पूर्वक्षण एव फलेच्छासम्भवेन तस्याः परामर्शो त्पत्तिसमये नाशात्तदुत्तरमनुमित्साया असम्भवेनेष्टसाधनताविषयकपरामर्श स्यावश्यकत्वात् स्मरणपर्यन्तानुधावनम् । न्यूनतापरिहाराय प्रत्यक्षस्थले प्रयोजनमाह— **अनुमित्सापूर्वे** ति । अत्रापि यत्रे त्यनुषज्यते । प्रत्यक्षा त्मकभूनादिविशेषणज्ञानस्थले तज्जनकसन्निकर्षादितः तदुत्तरक्षणे विशिष्ट प्रत्यक्षमेव भविष्यति, नत्विच्छा ; विनश्यदवस्थसन्निकर्षाद्विशेषण प्रत्यक्षानुधावने च प्रयासगौरवम्, अतो विशेषणस्मरणपर्यन्तानुधावनम् । अनुमित्सापूर्वकाले परामर्शजनकसन्निकर्षादिसत्त्वे तस्या एवानुत्पत्तिः, अतो **ऽनुमित्साकालोत्पन्नेन्द्रियसन्निकर्षसहिता** दिति । **सहकृता न्तम्**- सहकृतान्तभागोपस्थाप्यसिषाधयिषाविरहवैशिष्ट्यम् ; तस्याभाव विशेषणत्वे सिषाधयिषादशायां तदभावविशिष्टस्य सिद्धचभावस्यासम्भवा त्सिद्धौ सत्यामसत्यां चानुमित्यनुपपत्तिः,अत **स्साधकमानविशेषण** मिति।

सिषाधयिषा च तत्साध्यविशिष्टतत्पक्षविषयकत्वप्रकारकानुमितिविषयकेच्छा,

---

सिषाधयिषापदस्य सिद्धीच्छासामान्यपरत्वे यत्किञ्चिद्बोधरं ज्ञानं जायतामितीच्छाबलात्सिद्धिकाले अनुमित्यापत्तिः । नचानुमित्युत्पत्त्यापि तादृशेच्छाविषयसिद्धेः तत्रानुमितिरिष्टैवेति वाच्यम् ; प्रकृतानुमित्युत्पत्त्यैव यादृशेच्छाया विषयसिद्धिस्तादृशेच्छासत्त्व एव सिद्धिकाले अनुमितेरानुभाविकत्वादुक्तेच्छायाश्चान्तत उपस्थितपदार्थगोचरमानसज्ञानेनापि विषयासिद्धचाऽकिंचित्करत्वादित्यत स्सिषाधयिषापदार्थं व्याचष्टे- सिषाधयिषाचे ति । घटविशिष्टपर्वतविषयकानुमितिर्जायतामित्येतादृशेच्छासत्त्वे सिद्धिसत्त्वे वह्न्यनुमित्यनुत्पादा त्तत्साध्यविशिष्टे ति । तत्सम्बन्धेन त त्साध्यतावच्छेदकावच्छिन्नविशिष्टेत्यर्थः । तेन कालिकसम्बन्धेन वह्निवि शिष्टपर्वतविषयकानुमितिर्जायतां द्रव्यत्वावच्छिन्नविशिष्टपर्वतविषयकानु मितिर्जायतामित्येतादृशेच्छासत्त्वेपि न सिद्धिकाले संयोगादिना वह्नित्वा वच्छिन्नस्यानुमितिः. वह्निविशिष्टमहानसविषयकानुमितिर्जायतां वह्निवि शिष्टद्रव्यत्वावच्छिन्नविषयकानुमितिर्जायतामितीच्छाबलात्पर्वतो वह्निमानित्य नुमित्यनुत्पादात् तत्पक्षके ति । तत्पक्षतावच्छेदकावच्छिन्नेत्यर्थः ।

नच यत्किञ्चिद्बोधरं ज्ञानं जायतामितीच्छाबलादिव आलोकवान् पर्वत इत्याद्यनुमितिसामग्रीदशायां वह्निमत्पर्वतविषयकानुमितिर्जायतामिती च्छाबलादपि सिद्धिसत्त्वे वह्न्यनुमितिर्न जायते , तत्कालीनसिद्ध्य प्रतिबद्ध्यालोकानुमित्युत्पत्त्यैव तादृशेच्छाविषयसिद्धेरित्युक्तरूपेणाधीच्छाया उत्तेजकत्वं न सम्भवतीति वाच्यम ; साध्यविशिष्टपक्षनिरूपितविलक्षण विषयिताप्रकारकत्वेनैव इच्छाया उत्तेजकत्वोपगमात् . आलोकवान्पर्वत इत्याद्यनुमितेर्वह्निविशिष्टनिरूपितविलक्षणविषयताशून्यत्वेन तदुत्पत्त्या ता दृशविषयताप्रकारकेच्छाविषयसिद्ध्यसम्भवात् । साध्यविशिष्टपक्षनिरूपि-

[दी] यत्किंचिद्गोचरं ज्ञानं जायतामितीच्छायामपि सिद्धिसत्त्वेऽनुमित्यनुत्पादात् .

तत्वं च साध्यावच्छिन्नपक्षनिष्ठानिरूपकताकत्वम् , अतो ह्रदो वह्निमानित्यादौ साध्यविशिष्टपक्षाप्रसिद्धावपि न तादृशविषयतायास्तत्प्रकारकेच्छायाश्चाप्रसिद्धिः, ह्रदादिनिष्ठतादृशभ्रमवृत्तिविषयतानिरूपकत्वस्यापि ह्रदांशे प्रकारीभूतवह्न्याद्यवच्छिन्नत्वात् ।

वस्तुतस्तु- तत्साध्यविशिष्टतत्पक्षविषयकत्वे त्यनेन तत्साध्यतावच्छेदकावच्छिन्नतत्संसर्गावच्छिन्नविधेयतानिरूपिततत्पक्षतावच्छेदकावच्छिन्नोद्देश्यताकत्वं विवक्षितम् ; अतो वह्निमान्पर्वतो घटवानित्याद्यनुमितिसामग्रीदशायां पूर्वोक्तयुक्त्या वह्निविशिष्टपर्वतविषयकानुमितिर्जायतामित्येतादृशेच्छाबलात्पर्वतादिपक्षकवह्न्यादिविधेयकानुमित्यनुत्पादेपि न क्षतिः । तादृशोद्देश्यतात्वेन च तादृशोद्देश्यताकत्वप्रकारकत्वं विवक्षणीयम् ; तेन केवलपर्वतत्वावच्छिन्नोद्देश्यतात्वेन तादृशोद्देश्यताप्रकारकानुमित्सादशायां पर्वते अन्यानुमितिसामग्रीसत्त्वे वह्नेस्सिद्धिसत्त्वे न वह्न्यनुमित्यापत्तिः. एवं पक्षतावच्छेदकादिनिष्ठानवच्छिन्नत्वावगाहित्वमपि निवेशनीयम् ; अन्यथा जातिमान्वह्निव्याप्यवानिति परामर्शकाले पर्वतो वह्निव्याप्य धूमवान् पर्वतो वह्निमानिति सिद्धिसत्त्वे अनवच्छिन्नत्वानवगाहीच्छा काले पर्वतो वह्निमानित्यनुमित्यापत्तिः. पर्वतो वह्निव्याप्यवानिति परामर्शकालीन- जातिमान्वह्निव्याव्यवानिति परामर्शशून्यकालीनानवच्छिन्नत्वानवगाहीच्छानां च तत्तद्व्यक्तित्वेनोत्तेजकत्वमिति बोध्यम् ।

साध्यविशिष्टपक्षविषयकत्वप्रकारकत्वनिवेशनप्रयोजनं दर्शयति— यत्किंचि दिति । यत्किंचिद्विषयकत्वप्रकारकत्वं निवेश्यापि यत्किंचिज्ज्ञानं जायतामित्यादीच्छावारणं सम्भवतीति यत्किंचिद्गोचरत्वप्रकारकेच्छानु-

[दी] अनुमितित्वाद्यप्रकारिकायामपि प्रत्यक्षाद्यतिरिक्तं पर्वते वह्निज्ञानं जायतामितीच्छायां प्रत्यक्षाद्यनन्तरं अनुमित्युत्पादाच्च ।

वाचनम् । नचेच्छापूर्वं यत्किंचिद्गोचरज्ञानस्यावश्यसिद्धत्वात्तादृशेच्छैव न सम्भवति, ज्ञानगोचरेच्छायां स्वरूपसत्त्याः स्वविषयसिद्धेरेव विरोधित्वात्; तदुक्तम्- " न हि ज्ञाने जाते ज्ञानेच्छा भवतीति" ति वाच्यम्; एतदुत्तरवर्तियत्किंचिद्गोचरं ज्ञानं जायतामित्याद्याकारकेच्छाया एव विवक्षितत्वात् ।

नन्वनुमितित्वप्रकारकत्वं निवेश्यैव तथाविधेच्छावारणसम्भवे किं गुरुतरसाध्यविशिष्टपक्षविषयकत्वप्रकारत्वनिवेशेनेत्यत आह- **अनुमितित्वाप्रकारिकायामपी** ति । प्रत्यक्षाद्यात्मकसिद्धिदशायां पर्वते वह्निज्ञानं जायतामित्याकारकेच्छा न सम्भवति, तद्विषयीभूतप्रत्यक्षादिसिद्धेरेव सिद्धत्वात्, अतः **प्रत्यक्षाद्यतिरिक्त** मिति । शाब्दादिरूपसिद्धौ सत्यां प्रत्यक्षाद्यतिरिक्तज्ञानं जायतामित्यादीच्छाया उत्पादासम्भवात् **प्रत्यक्षाद्यतनन्तर** मिति । प्रत्यक्षादिरूपसिद्ध्यनन्तरमित्यर्थः । आदिपदाभ्यां शाब्दादिसिद्धिकालीनानां शाब्दान्यज्ञानं जायतामित्यादीच्छानां संग्रहः । **अनुमित्युत्पादाच्चे** ति । तथाचानुमितित्वप्रकारकत्वं निवेशयितुमशक्यमेव, तादृशेच्छानामसंग्रहप्रसङ्गादिति भावः । इदमुपलक्षणम्— अनुमितित्वप्रकारकत्वनिवेशेपि घटानुमितिर्जायतामितीच्छाकाले सिद्धिसत्त्वे वह्न्याद्यनुमितिवारणाय प्रकृतसाध्यादिविषयकत्वप्रकारकत्वनिवेशनमावश्यकम्. नच प्रकृतसाध्यादिविषयिणी या अनुमितिस्तद्विषयकत्वनिवेशेनापि दर्शितेच्छावारणसम्भव इति वाच्यम्; दर्शितेच्छाया अपि घटाद्यनुमितित्वेन वह्न्यादिगोचरसमूहालम्बनानुमितिविषयकत्वात्. नचानुमितित्वप्रकारकत्वानिवेशे अनुमितिरेव यत्र प्रत्यक्षत्वादिना इच्छाविषयस्तत्रानुमित्यापत्तिरिति वाच्यम्; इष्टत्वात्. अनुमितौ प्रत्यक्षत्वभ्रमदशायामेव तादृशे

च्छाया उत्पादात्. तस्या अनुमितित्वप्रकारकेच्छासमशीलत्वादिति हृदयम्। नचानुमितित्वप्रकारकत्वस्यानिवेशे पर्वते वह्नेः प्रत्यक्षतः सिद्धौ शाब्द सामग्र्यां च सत्यां प्रत्यक्षातिरिक्तं ज्ञानं जायतामितीच्छासत्त्वे अनुमित्या पत्तिरिति वाच्यम् ; तत्र पक्षतासत्त्वेप्यनुमितित्वप्रकारकेच्छाविरहविशिष्ट समानविषयकशाब्दसामग्र्याः प्रतिबन्धकत्वादेवानुमितिवारणसम्भवात् ।

अथ सिद्धिदशायां पर्वते वह्नेरन्यत् ज्ञानं जायतामितीच्छा सत्त्वे अनुमित्यापत्तिः ; तस्या अप्यनुमितिविषयकत्वात् ; नचेष्टापत्तिः, तदुत्तरं पर्वतो वह्निमानित्यादिमानसाद्युत्पत्त्यापीच्छाविषयसिद्धेस्तादृशेच्छाया यत्किंचिद्बोधरं ज्ञानं जायतामित्येतादृशेच्छातुल्यत्वात्. नच प्रत्यक्षेच्छाविशिष्टप्रत्यक्षसामग्रीरूपप्रतिबन्धकसत्त्वान्नानुपपत्तिरिति वाच्यम् ; प्रत्यक्षत्वादिप्रकारकेच्छाविशिष्टायां एव मानसादिसामग्र्या अनुमितिप्रतिबन्धकत्वात् ; अन्यथा सिद्धिशून्यकालेपि तादृशेच्छासत्त्वे अनुमित्यनुत्पादप्रसङ्गात्। नचोक्तयुक्त्या वह्निविधेयकत्वावगाहित्वानिवेशस्यावश्यकत्वाद्वह्निप्रकारकत्वावगाहिदर्शितेच्छाबलान्नानुमितिप्रसङ्गः, अनुमितिनिष्ठतद्विधेयकत्वावगाहीच्छादशायां च जायत एवानुमितिः, विधेयतायाः प्रत्यक्षे अप्रामाणिकतया तत्प्रकारकेच्छाया अनुमित्युत्पत्त्यैव विषयसिद्धेरिति वाच्यम् ; विधेयतायाः प्रत्यक्षव्यावृत्तत्वे तत्प्रकारिकायाः प्रत्यक्षान्यत्वाप्रकारिकाया अपीच्छायाः प्रत्यक्षसिद्धिकाले सम्भवात्प्रत्यक्षान्यत्वप्रकारकेच्छापर्यन्तानुधावनस्य दीधितिकृतो निर्बीजत्वात् । नच विधेयता प्रत्यक्षव्यावृत्तैव, तदवगाहित्वसूचनायैव उपदर्शितेच्छाऽऽकारे प्रत्यक्षान्यत्वोल्लेख इति वाच्यम् ; एवमपि वक्ष्यमाणस्य "शाब्दसिद्धिकाले अशाब्दज्ञानं जायतामितीच्छाबलेन अनुमितिर्जायते, न तु प्रत्यक्षसामग्रीकाले" इत्यस्य सङ्गमयितुमशक्यत्वात् तादृशेच्छायाः प्रत्यक्षव्यावृत्त विधेयत्वावगाहित्वे प्रत्यक्षसामग्रीकालेपि तद्बलादनुमित्यौचित्यात्तदनवगाहित्वे सिद्धावप्यनुत्तेजकत्वात् ।

[दी] यादृशयादृशेच्छासत्त्वे सिद्धौ सत्यामनुमितिस्तत्तदभावसमुदायस्य

अत्रोच्यते;— अनुमितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानामनुमिति विषयकेच्छात्वेनैवानुगमः . पर्वते वह्नेरन्यज्ज्ञानं जायतामित्याद्याकारकेच्छा काले सत्यां सिद्धौ तथाविधोपनीतभानसामग्र्यां च अनुमितेर्वारणाय तथा विधेच्छाव्यक्तीनां तत्तद्व्यक्तित्वेन प्रतिबन्धकता कल्प्यत इति न दोष. । नच तासां तत्तद्व्यक्तित्वेनानन्तप्रतिबन्धकताकल्पनमपेक्ष्यानुमितित्वादिरूप प्रकारविशेषमन्तर्भाव्यैवानुमित्सानामुत्तेजकत्वमुचितमिति वाच्यम् ; तथा सति पर्वते वह्नेरन्यज्ज्ञानं जायतामितीच्छाकाले तथाविधोपनीतभान विरोधिघटाद्यनुमितीच्छाविशिष्टतत्सामग्रीसत्त्वेपि सिद्धौ सत्यां वह्न्यनुमि त्युपपत्तये तादृशेच्छाव्यक्तीनां तत्तद्व्यक्तित्वेन सिद्धावुत्तेजकत्वापत्त्या तदभावसहस्रस्य मिथो विशेषणविशेष्यभावे विनिगमनाविरहेण सिद्धि प्रतिबन्धकतानन्त्यप्रसङ्गात् ।

ननु — साध्यविधेयकत्वावच्छिन्नपक्षोद्देश्यकत्वप्रकारकेच्छाया उपादाने पक्षोद्देश्यकत्वावच्छिन्न साध्यविधेयकत्वप्रकारकेच्छाया असंग्रहः, एवं विषयानुपरक्तानुमिति विषयिण्याः अनुमिति· र्जायतामितीच्छाया अपि निरुक्तरूपेणासंग्रहः ! नच सा असंग्राह्यैव , असिद्धसाध्यान्तरानुमितिसामग्र्यामसत्यां तद्बलादपि सिद्धस्य प्रकृतसा ध्यस्यानुमितेस्तदिच्छाविषयसिद्ध्यनुरोधेनावश्यकत्वादित्यत आह— **यादृश यादृशे** ति । असत्यां सिद्धौ यत्किंचिद्गोचरं ज्ञानं जायतामित्यादीच्छा सत्त्वे अनुमित्युत्पादा त्तासांचानुत्तेजकत्वा **त्सिद्धौ सत्या** मिति । **तत्तदिच्छाभावसमुदायस्ये** ति । साध्यविशेषविशिष्टपक्षविशेषाद्यवगाहि त्वप्रकारकेच्छानां तत्तदवगाहित्वप्रकारकानुमितिगोचरेच्छात्वेनानुगमस्य एकैकाभावा निवेश्यन्ते, अतथाविधानामनुमितिर्जायतां प्रत्यक्षान्यज्ज्ञानं

[दी] विशेषणत्वादिच्छाया अननुगमेपि न क्षतिः ।

जावतामित्याद्याकारकेच्छानां तु यद्व्यक्तिसत्त्वे सिद्धिसत्त्वेनुमितिस्तद्व्यक्तित्वावच्छिन्नाभावा एव निवेशनीयाः, अन्यथा अतिप्रसङ्गात् ; तत्कालीन सिद्धिभेदा एव वा । एतेन तत्कालीनसंयोगविभागादिव्यक्तिविशेषाभाव निवेशमादाय विनिगमनाविरहो निरस्तः । सामानाधिकरण्यसम्बन्धेन तदत्यन्ताभाववैशिष्ट्यनिवेशापेक्षया तत्तत्सिद्धिभेदानां विशेषणताविशेष सम्बन्धेन वैशिष्ट्यनिवेशे प्रतियोगितावच्छेदकसम्बन्धानिवेशेन च लाघवम् । सिद्ध्युत्तरं तथाविधेच्छोत्पत्तिकाले अनुमित्यापत्तिस्तु इच्छा सामग्र्याः अनुमितिविरोधित्वादेव न सम्भवतीति ध्येयम् ।

इदन्त्ववधेयम्– तादृशेच्छभावसमुदायस्य न तत्समुदायत्वेन निवेशः, समुदायत्वस्य दुर्वचत्वात् । नच तावन्मात्रविषयकधीविषयत्वं तत् , तावत्त्वस्य दुर्वचत्वात् . तावदभावविषयकबुद्धेस्तत्तदभावविषयकत्वेन निवेशे तदपेक्षया लाघवेन तत्तदभावानां तत्तदभावत्वेन सिद्धावेव निवेशयितुमुचितत्वात्तत्तदभावानां मिथो विशेषणविशेष्यभावानापन्नानां निवेशे अवच्छेदकभेदात्प्रतिबन्धकताभेद इति एकविशिष्टापरत्वेनैवाभावानां निवेशनीयत्वात् . अत्र च विशेष्यविशेषणभावे विनिगमनाविरहेपि न क्षतिः, गत्यन्तराभावात् . तावदभावमात्रविषयकधीविषयत्वेन निवेशेपि ज्ञाने तत्तदभावविषयितानां एकविशिष्टापरत्वेनैव विशेषणीयतया विशेषण विशेष्यभावे विनिगमनाविरहस्यावश्यकत्वादिति ।

इच्छाया अननुगमेपि— एकरूपेण सर्वासामिच्छानामुपादानासम्भवेपि । **न क्षतिः**— न सिषाधयिषाविरहविशिष्टसिद्धयभावस्यानुमितिहेतुत्वानुपपत्तिः; तावदभावविशिष्टसिद्धयभावस्यानुगतत्वादिति भावः ।

इदमत्रावधेयम् ; वह्निविशिष्टपर्वतमहानसोभयानुमितिर्जायता मित्याकारकेच्छानामपि तत्साध्याविशिष्टतत्पक्षावगाहित्वप्रकारकतया पर्वते वह्निसिद्धिकाले महानसपक्षकानुमितिसामग्र्यामसत्यां तादृशेच्छाबला त्पर्वते वह्न्यनुमित्यापत्तिः. अनुमित्यंशे तत्साध्यविशिष्टतत्पक्षविषयकत्वा न्ययर्तिकाचिद्विषयकत्वाप्रकारकत्वविशेषणस्येच्छायां निवेशे वह्निविशिष्टं पर्वतं महानसं चानुमिनुयामित्यादिसमूहालम्बनेच्छाया असंग्रहप्रसङ्गः, वह्निविशिष्टपर्वतविषयिणी महानसाविषयकानुमितिभिन्नानुमितिर्जायता मित्याद्याकारकेच्छाबलादुपदर्शितस्थले अतिप्रसङ्गस्याशक्यवारणताचेतीच्छा विषयतावच्छेदकतायाः पर्याप्तिनिवेशनमावश्यकम् ; तथा च वह्निवि शिष्टपर्वतानुमितिर्भवत्वित्यादीच्छायास्तत्साध्यविशिष्टतत्पक्षविषयकानुमिति त्वपर्याप्तविषयतावच्छेदकताकेच्छात्वेनैवोत्तेजकत्वं पर्यवसितम् ; अनुमिति त्वानन्तर्भावे तादृशेच्छायास्तत्साध्यविशिष्टतत्पक्षविषयकत्वपरिसमाप्तविष यतावच्छेदकताकत्वाभावेनाशक्यसंग्रहत्वात् . एवंचानुमितित्वप्रत्यक्षान्य ज्ञानत्वादिप्रकारकेच्छानामनुमितिविषयकत्वरूपेण संग्रहाभिधानमसङ्गतम् . नच तत्कल्पं परित्यज्यैव यादृशयादृशे त्याद्यभिधानमिदानीमनुमितित्व प्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानां पृथक्पृथगभावनिवेशनमेवाभिप्रेत मिति वाच्यम् ; पक्षान्तरत्वसूचक- वाकाराद्यभावात् ।

अथानुमितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानामनुगम एव सम्भ वति; तथा हि; तत्साध्याविशिष्टतत्पक्षविषयकानुमितित्वपर्याप्तावच्छेदकता कत्वं तादृशधर्मघटकपरिसमाप्तावच्छेदकताकत्वं तत्साध्यविशिष्टतत्पक्षवि षयकत्वानुमितित्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपक विषयताकत्व मेव पर्यवसितम् . एवंच तत्र तत्साध्यविशिष्टतत्पक्षविषयकत्वप्रत्यक्षान्यज्ञा नत्वादिनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपकविषयताकेच्छात्वादिनाप्रत्य क्षान्यज्ञानत्वादिप्रकारकेच्छानां पृथगुत्तेजकत्वापेक्षया निरुक्तधर्मघटकानुमिति

त्वनिष्ठावच्छेदकताभिन्नावच्छेदकतायामेव प्रत्यक्षान्यज्ञानत्वादिनिष्ठावच्छेदक ताभिन्नत्वनिवेशनमुचितम्; लाघवात्. इत्थं च तादृशरूपेणैव प्रत्यक्षान्यज्ञान त्वादिप्रकारकेच्छानामपि संग्रहस्सम्भवति. नच वह्निविशिष्टपर्वतविषयकं जायतामित्याकारकेच्छायास्सिद्ध्यधीनसंस्कारोत्पत्त्यैव चरितार्थाया वारणाय विषयतायामनुमितित्वावच्छिन्नत्वनिवेशनस्यावश्यकतया न तत्संग्रह इति वा च्यम् ;समवायेन किंचिदवच्छिन्नत्वं निवेश्यैव तादृशेच्छानां वारणसम्भवादिति चेन्न;- एवं सति पक्षांशे साध्यावगाहित्वेनानुमितिविषयकेच्छानामुक्तरूप समशीलरूपान्तरेणोत्तेजकत्वापेक्षया तादृशावच्छेदकतायामेव पक्षांशे साध्यावगाहित्वीयावच्छेदकताभिन्नत्वमपि निवेश्यताम्, तावतैव तत्सं ग्रहस्यापि सम्भवादिच्छांया अननुगमाभिधानासङ्गतिः । नच विषयतायां साध्यविशिष्टपक्षावगाहित्वाद्यवच्छिन्नत्वविशेषणमावश्यकम्, अन्यथा अ न्यानुमितिसामग्रीसमवहितानामनुमितिर्जायतामित्याकारकविषयविशेषानुपर क्तानुमितीच्छानां वारणासम्भवादिति अन्यानुमितिसामग्र्यसमवहितता दृशेच्छानां तत्तद्व्यक्तित्वेनैवोत्तेजकत्वस्योपगन्तव्यतया उत्तेजकानामन नुगमाभिधानं सम्भवतीति वाच्यम्; तादृशेच्छाव्यक्तीनां तत्तद्व्यक्तित्वेन प्रतिबन्धकतयैवातिप्रसङ्गवारणसम्भवेन तासां वारणानौचित्यात्. साध्य विशिष्टपक्षावगाहित्वावच्छिन्नत्वमधिकमनुमितिनिष्ठविषयतायां निवेश्य द र्शितसामग्र्यसमवहित तथाविधेच्छानां तत्तद्व्यक्तित्वेनोत्तेजकताकल्पने गौरव प्रसङ्गात्, अन्यानुमितिसामग्रीकालीनतादृशेच्छानां तत्कालीनतत्तदात्म वायुसंयोगादिव्यक्तीनां विनिगमनाविरहेण प्रतिबन्धकताप्रसंगवत्तादृश सामग्र्यभावकालीनतथाविधेच्छानामुत्तेजकत्वमतेपि विनिगमनाविरहेण त त्तदिच्छाकालीनसंयोगविशेषाणामुत्तेजकताप्रसंगस्य दुर्वारत्वात् । अथ वा उक्तानुगतरूपेणोत्तेजकीभूतायामिच्छायां अनुमितिर्जायतामित्याकारकान्या नुमितिसामग्रीसमवहितेच्छाव्यक्तीनां भेदा एव निवेश्याः, न तु तासां प्रतिबन्धकत्वमिति तत्तदिच्छाभेदनिवेशस्थले तत्कालीनवायुसंयोगभेद-

निवेशे च नोपपत्तिः, इच्छायां तद्भेदस्याव्यावर्तकत्वात् . तत्तत्संयोगाभावानां वैशिष्ट्यस्य निवेशे च वैशिष्ट्यस्य सामानाधिकरण्यरूपतया साक्षात्सम्बन्धेनेच्छाभेदनिवेशे लाघवस्यैव विनिगमकत्वात् ;

अत्राहुः— उक्तसकलेच्छानां निरुक्तरूपेणानुगमेपि एतत्क्षणानन्तरक्षणे अनुमितिर्भवत्वित्याद्याकारकेच्छनामेव निरुक्तेन रूपेणासंग्रहात्तत्तद्व्यक्तित्वेन पृथगभावात् निवेशनीयाः तादृशक्षणवृत्तित्वाद्यवच्छेदकता भेदमुक्तावच्छेदकतायां निवेश्य तत्संग्रहे कालान्तरेपि तथाविधेच्छाबलादनुमित्यापत्तिः. कालान्तरे अनुमित्युत्पत्त्या च तादृशानुमित्साविषयासिद्धेरिष्टापत्त्ययोगादित्यननुगमाभिधानसङ्गतिः । नच कालान्तरीणतादृशेच्छानां तत्तद्व्यक्तित्वेन प्रतिबन्धकतया तादृशेच्छाबलादनुमित्यापत्तिवारणसम्भव इति वाच्यम् ; उपदर्शितैकैकधर्मप्रकारकैकैकानुमित्साव्यक्तीनां तत्तद्व्यक्तित्वेनोत्तेजकत्वापेक्षया तत्समानप्रकारककालान्तरीणबहुतरेच्छाव्यक्तीनां तत्तद्व्यक्तित्वेन प्रतिबन्धकत्वे गौरवात्. नचैवमपि प्राथमिकस्य साध्यविशिष्टपक्षविषयित्वप्रकारकत्वविशेषणाभिधानस्यासङ्गतिर्दुर्वारैवेति वाच्यम् ; अनुमितिनिष्ठविषयतायां साध्यविशिष्टपक्षविषयत्वाद्यन्यप्रकारानवच्छिन्नत्वनिवेश एव तात्पर्यात् ।

वस्तुतस्तु— साध्यविशिष्टपक्षविषयकत्वप्रकारकत्वनिवेशनमावश्यकम् , अन्यथा किंचिज्ज्ञानं जायतां यत्किंचिद्गोचरं ज्ञानं जायतामित्यादीच्छावारणासम्भवात् ; तत्संग्रहे तादृशीनां सर्वासामिच्छानां तत्तद्व्यक्तित्वेन प्रतिबन्धकत्वे गौरवात् . अनुमितिर्जायतामित्यादीच्छानां च पृथगनुमितित्वादिपर्याप्तविषयतावच्छेदकताकेच्छात्वेनैवोत्तेजकता . अन्यानुमितिसामग्रीसमवहिततादृशेच्छानां च तत्तद्व्यक्तित्वेन प्रतिबन्धकत्वमेवेति सर्वं समंजसम् ।

[दी] धूमेन वह्निमनुमिनुयामितीच्छायामालोकपरामर्शादसत्यामपि सिद्धौ यदि नानुमितिः तदा तदन्यमात्रलिंगकसिद्धीच्छा

ननु धूमेन पर्वते वह्निमनुमिनुयामित्याकारकेच्छाबलाद्धूमलिङ्गकानुमित्युत्पत्त्या तत्साधरणरूपेणैव सिषाधयिषाणां सिद्धावुत्तेजकताया आवश्यकत्वात् तत्सत्त्वे सिद्धिकाले असत्यपि धूमपरामर्शे आलोकादि परामर्शादनुमित्यापत्तिः, पक्षतायां अक्षतत्वादित्यत आह– **धूमेने** ति । भिन्नलिङ्गकेच्छासत्त्वे सिद्धिदशामात्र एव यदि नानुमितिस्तदा तादृशेच्छायाः प्रतिबन्धकत्वं न सम्भवतीत्यतः **असत्यामपि सिद्धा** विति । तत्रानुमितेस्सन्दिग्धतया **यदी** ति । **तदे** ति । " तल्लिंगकानुमिता" विति शेषः । **तदन्यमात्रे** ति । तदन्यमात्रलिंगकत्वप्रकारकसिद्धीच्छेत्यर्थः । धूमलिंगकानुमितिरालोकलिंगकानुमितिश्च जायतामित्याकारकसमूहालम्बनेच्छाकाले आलोकादिपरामर्शादनुमित्युपपत्तये **मात्रे** ति । तदन्यमात्रलिंगकत्वप्रकारकत्वं च तल्लिंगकत्वाप्रकारकत्वे सति यत्किंचिल्लिंगकत्वप्रकारकत्वम् ; अतः प्रमेयसामान्यलिंगकस्थले तदन्याप्रसिद्धावपि न दोषः । तल्लिंगकत्वाप्रकारकत्वं च तल्लिंगकत्वप्रकारकतानिरूपिततत्साध्यविशिष्टतत्पक्षविषयकत्वावच्छिन्नानुमितिनिष्ठविशेष्यताकान्यत्वम् ; अतः आलोकेनेंधनं धूमेन तु वह्निमनुमिनुयामित्यादीच्छादशायामालोकादिलिंगकवह्न्याद्यनुमितेर्नापत्तिः. आलोकलिंगकत्वप्रकारकताशरीरे च वास्तवालोकादिप्रकारता न निवेशनीया, किंत्वालोकत्वाद्यवच्छिन्नप्रकारतैव ; अन्यथा आलोकत्वादिना धूमत्वादिना च धूमादिकमालोकादिकंचावगाहमानयोरिच्छयोरालोकलिंगकानुमित्यादौ प्रतिबन्धकत्वतदभावयोरापत्तेः । द्रव्येणानुमिनुयामित्यादीच्छाया आलोकलिंगकानुमित्यविरोधित्वोपपत्तये चालोकत्वाद्यवच्छिन्नत्वस्थाने आलोकाद्यवृत्तित्वेनाज्ञायमानधर्मावच्छिन्नत्व

मेव निवेश्यम् ; द्रव्यत्वादेरालोकत्वादिविरुद्धत्वभ्रमदशायां तादृशेच्छाया विरोधित्वोपपादनाय आलोकत्वादेरालोकादिवृत्तित्वज्ञानशून्यकालीनाया आलोकेनानुमिनुयामित्यादीच्छाया अविरोधित्वोपपत्तये च वास्तवालोकादि वृत्तित्वस्य तेन रूपेण ज्ञायमानत्वस्यचोपेक्षणम् । धूमत्वादेरालोकाद्यवृत्ति त्वाग्रहदशायां धूमेनानुमिनुयामितीच्छाया आलोकादिलिंगकानुमित्यविरो धित्वमिष्टमेव , विरोधित्वं च तादृशेच्छाया धूमत्वादावालोकत्वादि विरुद्धत्वग्रहदशायामेव ।

वस्तुतस्तु- द्रव्यं नालोक इत्यादिज्ञानशून्यकालीनानामालोको द्रव्यमित्या दिज्ञानकालीनानां वा इच्छानां तत्तद्व्यक्तित्वेन भेदकूट एव स्वातन्त्र्येण प्रतिबन्धकतावच्छेदके अनुप्रवेशनीयः, तेनोक्तकरूपे कालान्तरीणपुरुषा न्तरीणज्ञानवारणाय स्वसमानकालीनत्वस्वसमानाधिकरणत्वयोः ज्ञान विशेषणत्वप्रौढ्ये स्वपदेन फलीभूतानुमित्युपादाने यादृशयादृशानुमिति दशायां क्वचिदपि धर्मे नालोकावृत्तित्वज्ञानं प्रसिद्ध्यति, तत्र स्व समानाधिकरणस्वसमानकालीनालोकत्वादिविरुद्धत्वज्ञानाविषयधर्मवल्लिङ्गकत्व प्रकारकानुमित्साभिन्नानुमित्साभावरूपकारणाप्रसिद्धिः, स्वत्वाननुगमेन कार्य कारणभावस्य तत्तद्व्यक्तिविश्रामश्च; भेदप्रतियोग्यनुमित्सोपादाने च आलोकेन द्रव्येण वानुमिनुयामित्याद्याकारकयादृशेच्छासमानाधिकरणसमान कालीनज्ञानाप्रसिद्धिः, तादृशेच्छायास्तथाविधभिन्नत्वेनालोकलिङ्गकानुमिति प्रतिबन्धकत्वापत्तिरिति परास्तम् । यद्वा- आलोको द्रव्यमित्यादिज्ञान विशिष्टद्रव्यत्वादिमल्लिङ्गकत्वप्रकारकेच्छात्वेन आलोको न द्रव्यमित्यादिज्ञान विरहविशिष्टतादृशेच्छात्वेनैव वा द्रव्यत्वादिमल्लिङ्गकत्वप्रकारकेच्छाः अनु गमय्य तद्भेदाः प्रतिबन्धकतावच्छेदके निवेशनीयाः; वैशिष्ट्यं चैक-क्षणावच्छिन्नैकात्मवृत्तित्वम्, भेदस्य कालिकाव्याप्यवृत्तित्वोपगमात्तादृशज्ञान शून्यकालीनानां द्रव्येणानुमिनुयामित्यादीच्छानां विशिष्टभिन्नतया प्रतिबन्ध-

कत्वोपपत्तिः. द्रव्यत्वावच्छिन्नेनानुमिनुयामित्याद्याकारिकाणां द्रव्यत्वांशे लिंगतावच्छेदकत्वावगाहिनीनां तु न द्रव्यत्वादिमद्विषयकपरामर्शजन्यत्वरूपद्रव्यत्वादिमल्लिंगकत्वप्रकारकत्वम् , विषयतायामेव तत्र द्रव्यत्वाद्यवच्छिन्नत्वभानाल्लिंगांशे द्रव्यत्ववत्त्वानवगाहनात्; अतस्तथाविधेच्छानामालोकत्वाद्यवच्छिन्नलिंगकानुमितिविरोधित्वमक्षतमेव , आलोकत्वाद्यवच्छिन्नेनानुमिनुयामित्यादीच्छानां तादृशानुमित्यविरोधित्वोपपत्तये चालोकत्ववल्लिंगकत्वाद्यप्रकारकत्ववदालोकत्वाद्यवच्छिन्नलिंगकत्वाद्यप्रकारकत्वमप्यालोकत्वाद्यवच्छिन्नानुमितिप्रतिबन्धकतायां निवेशनीयम्; पर्वते वह्निमनुमिनुयामित्याकारकलिंगविशेषजन्यत्वानवगाहीच्छानामविरोधित्वोपपत्तये किंचिल्लिंगकत्वप्रकारकत्वनिवेशनम् । तदर्थश्च किंचिल्लिंगकत्वप्रकारतानिरूपिततत्साध्यविशिष्टतत्पक्षविषयकत्वावच्छिन्नविशेष्यताकत्वम्; अतो धूमेनेन्धनमनुमिनुयामित्याकारकेच्छानां नालोकादिलिंगकवह्न्याद्यनुमितिविरोधित्वम् ।

इदमत्रावधेयम्; — आलोकलिंगकधूमलिंगकानुमितिर्जायतामित्याद्याकारकेच्छादशायां न केवलालोकपरामर्शादनुमितिः; तथाविधानुमितेस्तादृशेच्छाया अविषयत्वात् धूमालोकोभयलिङ्गकानुमित्युत्पत्त्यैव तादृशेच्छाविषयसिद्धेः । एवं धूमलिंगकवह्न्यनुमितिरालोकलिंगकवह्निघटोभयानुमितिश्च जायतामित्याद्याकारकेच्छाकाले घटाद्यनुमितिसामग्र्या मसत्यामालोकपरामर्शसत्त्वे वह्न्यनुमितिर्न जायते, घटाद्यविषयकानुमित्युत्पत्त्या तादृशेच्छाविषयासिद्धेः , अतस्तथाविधेच्छानां तत्र तत्र प्रतिबन्धकता निर्वाहाय तल्लिङ्गकत्वतत्साध्यविशिष्टतत्पक्षविषयकत्वानुमितित्वादिप्रकारताभिन्नप्रकारत्वानिरूपितविशेष्यताशून्यत्वमेव तल्लिंगकत्वाप्रकारकत्वेत्यनेन विवक्षणीयम्; उक्तस्थलेचालोकलिंगकत्ववह्न्यनुमितित्वादिप्रकारतानिरूपितविशेष्यता तादृशप्रकारतातिरिक्तधूमलिंगकत्वादिप्रकारतानिरूपितैव ;

[दी] कामिनीजिज्ञासावत्

समूहालम्बन एव प्रकारताभेदेन विशेष्यताभेदात्; अन्यथा समूहालम्बनेच्छातस्तादृशेच्छावैलक्षण्यानुपपत्तेः । तथा च तादृशेच्छानां तथाविधप्रकारत्वानिरूपितविशेष्यताशून्यत्वेन प्रतिबन्धकत्वनिर्वाहः । आलोके नानुमितिजायतां धूमेन पर्वते वह्निमनुमिनुयामित्याकारकसमूहालम्बनेच्छानां तादृशविशेष्यताशून्यत्वविरहेपि आलोकलिंगकान्यानुमितिसामग्रीकालीनतथाविधेच्छानां तत्तद्व्यक्तित्वेन पृथक्प्रतिबन्धकत्वोपगमान्न तादृशानुमितिसामग्रीदशायां तादृशेच्छाबलादालोकलिंगकानुमित्यापत्तिः. पर्वते वह्निमनुमिनुयां धूमेन च पर्वते वह्निमनुमिनुयामित्याकारकसमूहालम्बनेच्छायाः प्रामाणिकत्वे तत्रालोकपरामर्शादनुमितिर्भवत्येव; एवं च लिंगविशेषजन्यत्वानवगाहीच्छानां विशेषणदळेनैव वारणे धूमेन घटमनुमिनुयामित्याकारकेच्छावारणमेव विशेष्यदळप्रयोजनम् । तदर्थश्च न किंचिल्लिङ्गकत्वप्रकारतानिरूपिततत्साध्यविशिष्टतत्पक्षविषयकत्वावच्छिन्न विशेष्यताकत्वम्; तथा सति धूमेनानुमिनुयामित्याकारकविषयविशेषानुपरक्तानुमितीच्छानामसंग्रहापत्तेः । किन्तु किंचिल्लिंगकत्वतत्साध्यविशिष्टतत्पक्षविषयकत्वानुमितित्वादिप्रकारताभिन्न प्रकारत्वानिरूपित विशेष्यताकत्वमेव विशेष्यदळेन विवक्षणीयम् । धूमेन घटमनुमिनुयामितीच्छावद्धूमेन वह्नि घटोभयमनुमिनुयामित्यादीच्छाया अप्यालोकलिंगकवह्न्याद्यनुमित्यविरोधित्वमिष्टमेव । सिद्धौ च तादृशेच्छाया अनुत्तेजकतया सिद्धिकाले तादृशेच्छाबलादसत्यामालोकलिंगकानुमितीच्छायां न तादृशानुमितिरिति दिक् ।

एकलिंगकेच्छाकालीनोभयलिंगकपरामर्शजन्यानुमितौ व्यभिचारवारणप्रकारश्च पुनरग्रे दर्शयिष्यते । ननु स्वविषयसजातीयज्ञाने इच्छाया विरोधित्वमदृष्टचरमित्यत आह- **कामिनीजिज्ञासावदिति** । यथा कामिनी प्रत्यक्षादिगोचरेच्छा घटादिविषयकप्रत्यक्षादौ प्रतिबन्धिका तथेत्यर्थः ।

[दी] पृथक्प्रतिबन्धिका; यदि च तत्रानुमितिः, तदा सिद्धिसत्त्वे तत्रानुमितिवारणाय तल्लिंगकानुमितीच्छा तदन्यमात्रलिंगकानुमितीच्छातिरिक्तानुमितीच्छा वा वाच्या ।

पृथक्प्रतिबन्धिकेति। पक्षतासमवधानदशायामनुमित्यनुत्पादप्रयोजिकेत्यर्थः। तथा चोक्तस्थले पक्षतासत्त्वेपि क्षतिविरहात्तादिष्टमेवेति भावः । ननु कामिनीजिज्ञासास्थले कामिनीभिन्नविषयकज्ञानानुत्पादस्य सर्वानुभवसिद्धतया तत्र तस्याः प्रतिबन्धकत्वमस्तु; सिद्ध्यसत्त्वे धूमादिलिंगकानुमितीच्छा दशायामालोकलिंगकवह्न्यनुमित्यनुत्पादस्तु नानुभाविकः, तथा सति तुल्य युक्त्या घटाद्यनुमित्साप्रत्यक्षादिगोचरेच्छादशायामपि तदनुत्पादस्य तथात्व प्रसक्तेः; नह्यत्र कमपि विशेषमीक्षामाह इत्यभिसन्धायोक्तापत्तिवारणाय कल्पान्तरमनुसरति- **यदि चे** ति । तथा चान्यलिंगकानुमितीच्छायाः प्रतिबन्धकत्वमसम्भावितमेवेति भावः । **तत्रे** ति। अन्यलिङ्गकानुमित्सास्थल इत्यर्थः। **तल्लिंगकानुमितीच्छा**- तल्लिङ्गकत्वप्रकारतानिरूपिततत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वावच्छिन्नविशेष्यताकेच्छा । **वाच्या**— सिषाधयिषापदेन विवक्षणीयेत्यर्थः । नन्वेवं लिंगविशेषानुपरक्तानुमितीच्छाकाले सिद्धौ सत्यामनुमित्यनुपपत्तिरत आह- **तदन्यमात्रलिंगके** ति । धूमेनालोकेन च अनुमिनुयामित्यादिसमूहालम्बनेच्छाकाले आलोकादिलिंगकानुमित्युपपत्तये **मात्रे** ति। तथा च तल्लिंगकतत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वाप्रकारका सती या किंचिल्लिंगकतत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वादिप्रकारकेच्छा तदन्यतत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वादिप्रकारकेत्यर्थः । लिंगविशेषोपरक्तानुमितीच्छासंग्रहाय सत्यन्तम् । आलोकेनेन्धनमनुमिनुयां धूमेन च वह्निमनुमिनुयामित्याकारकेच्छाबलादालोकलिंगकवह्न्यनुमित्यापत्तिवारणाय तत्र साध्यादिनिवेशः । लिंगविशेषानुपरक्तानुमितीच्छाकाले पर्वते वह्न्यनुमिनुयां धूमेनेन्धनमनुमिनुयां इत्याद्याकारकसमू-

[दी] लिंगविशेषेणापि नियन्त्रितं पक्षत्वम् ।

हालम्बनेच्छाकालेचालोकादिलिङ्गकवह्न्यनुमित्युपपत्तये विशेष्यदलम् । यत्किंचिद्गोचरं ज्ञानं जायतामितीच्छावारणाय चरमदलम् । यद्यप्यालोकधूमोभयलिंगकवह्निविशिष्टपर्वतविषयकानुमितिर्जायतामालोकेन वह्निघटोभयविशिष्टपक्षविषयकानुमितिर्धूमेन वह्निविशिष्टपर्वतविषयकानुमितिश्च जायतामित्यादीच्छावारणाय तल्लिंगकत्वतत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वादिप्रकारताभिन्नप्रकारत्वानिरूपितविशेष्यताकान्यत्वमेव सत्यन्तेन विवक्षणीयम् ; तथा च लिङ्गविशेषानुपरक्तानुमितीच्छायां तादृशविशेष्यताकान्यत्वविरहात्किंचिल्लिङ्गकत्वादिप्रकारकत्वनिवेशनमफलमेवेति तथाविधविशेष्यताशालित्वेनैवेच्छायाः उत्तेजकत्वमुचितम् ; तथापि तादृशविशेष्यताशालीच्छायामेव तदन्यमात्रे त्यादिग्रन्थतात्पर्यमिति । शेषं पूर्वोक्तदिशाऽवसेयम् । धूमालोकोभयलिङ्गकानुमितौ च धूमलिंगकत्वालोकलिंगकत्वतत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वादिप्रकारताभिन्नप्रकारत्वानिरूपितविशेष्यताशालीच्छात्वेन स्वातन्त्र्येणोत्तेजकत्वम् ; तेनोभयलिंगकानुमितीच्छादशायां उभयलिंगकपरामर्शादनुमित्युपपत्तिः ; धूमालोकभस्मभिरनुमिनुयामित्यादीच्छाकाले तदुभयलिंगकपरामर्शादनुमित्यापत्तिवारणञ्च ।

नन्वेवं धूमालोकलिङ्गकानुमितिसाधारणैकपक्षतायां असम्भव इत्याशङ्क्याह— लिङ्गविशेषेणापी ति । लिंगभेदेनापि पक्षत्वं भिन्नमेवेत्यर्थः । अपिः साध्यादिभेदसमुच्चायकः । तत्प्रदर्शनं च दृष्टान्तार्थम् । तथा च साध्यादिभेदेनेव लिंगभेदेनापि पक्षताभेदो न क्षतिकर इति भावः । नन्वेवं लिंगभेदेन पक्षताया अननुगमात्तस्या व्यभिचारेणानुमितिरूपानुगतकार्ये हेतुत्वासम्भवः ; न च तत्तत्साध्यकत्वादिवत्तत्तल्लिंगकत्वस्यापि कार्यतावच्छेदके निवेशान्न व्यभिचार इति वाच्यम् ; तावताप्यालोकादिलिंगकानुमितीच्छाधीनधूमालोकोभयादिविषयकसमूहालम्बनपरामर्शजन्यानुमितौ धू-

मादिलिंगकानुमितीच्छाविरहविशिष्टसिद्धयभावव्यभिचारस्य दुर्वारत्वात्। दृशानुमितावपि धूमादिलिङ्गकपरामर्शजन्यत्वरूपधूमलिंगकत्वस्याक्षतत्वात् । न च यत्र धूमलिंगकानुमितीच्छाया उत्तेजकता तत्रालोकलिङ्गकानुमितीच्छानामपि तत्तल्लिंगकपरामर्शविशिष्टानामुत्तेजकत्वोपगमान्नोक्तस्थले व्यभिचार इति वाच्यम् ; तथा सति तत्तद्धूमलिङ्गकेच्छाया अपि धूमलिङ्गकपरामर्शविशिष्टाया एवोत्तेजकत्वौचित्यात् ; सर्वसाधारणैकपक्षताया एव सुवचतया लिंगविशेषेणापी ति ग्रन्थासङ्गतिरिति चेन्न; धूमलिंगकेच्छाविरहविशिष्टसिद्धिविशिष्टान्यानुमितित्वमेव तादृशसिद्धयभावजन्यतावच्छेदकम् ; तादृशसिद्धिविशिष्टत्वं च स्वसामानाधिकरण्यावच्छिन्नस्वान्यव्यवहितोत्तरोत्पत्तिकत्वसम्बन्धेन. उक्तसमूहालम्बनस्थलीयानुमितिस्तु तथाविधसिद्धिविशिष्टैवेति न तत्र व्यभिचारः, सिद्धिकाले असत्यां तल्लिंगकसिषाधयिषायामुक्तस्थल इव न धूमपरामर्शादनुमित्यापत्तिः धूमादिलिंगकेच्छाविरहविशिष्टसिद्धयभावघटितधूमादिपरामर्शघटितकारणस्तोमस्यैव कार्योत्पत्तिप्रयोजकत्वोपगमात्समूहालम्बनस्थले आलोकपरामर्शादिघटितसामग्रीत एव कार्योत्पत्तिनिर्वाहात् ।

अथात्र अव्यवहितोत्तरत्वमवश्यं तृतीयक्षणसाधारणं स्वध्वंसाधिकरणकालध्वंसानधिकरणत्वे सति स्वाधिकरणकालध्वंसाधिकरणत्वरूपं वाच्यम् ; अन्यथा यत्र क्रमेण सिद्धयात्मकधूमालोकोभयलिङ्गकपरामर्शधूमलिंगकेच्छानुमितयः तत्रानुमित्युत्पत्त्यधिकरणक्षणस्यालोकलिङ्गकेच्छाविरहविशिष्टसिद्धयधिकरणक्षणध्वंसाधिकरणक्षणध्वंसाधिकरणत्वेन तदुत्पत्तिकानुमितेरुक्तसम्बन्धेन तादृशसिद्धिविशिष्टान्यत्वात् तादृशसिद्धयभावस्य व्यभिचारतादवस्थ्यात् ; एवं च यत्र क्रमेण सिद्धयात्मकधूमपरामर्शधूमलिंगकेच्छानुमितयः तत्रत्यानुमितेर्धूमादिलिंगकेच्छाविरहविशिष्टसिद्धिविशिष्टत्वेन पक्षतोक्तार्थानुपपत्तिरिति चेन्नः — तादृशसिद्धिविशिष्टत्वं तादृश

स्वाधिकरणक्षणध्वंसोत्पत्त्यधिकरणक्षणोत्पत्तिकत्वसम्बन्धेन वाच्यम् ; उक्त समूहालम्बनस्थले च अनुमित्यव्यवहितपूर्वक्षणस्यालोकलिंगकेच्छाविरह विशिष्टसिद्ध्यधिकरणत्वात्तादृशक्षणध्वंसोत्पत्त्यधिकरणक्षणोत्पत्तिकत्वमनुमिते रिति न व्यभिचारः. एवं सिद्ध्यात्मकधूममात्रपरामर्शजन्यानुमितेर्धूमलिंगकेच्छाविरहविशिष्टसिद्ध्यधिकरणप्रथमक्षणध्वंसोत्पत्त्यधिकरणक्षणोत्पत्तिक-त्वाभावात्पक्षताकार्यत्वनिर्वाहः । अथ वा स्वाव्यवहितपूर्वकालावच्छिन्न तल्लिंगकेच्छाविरहविशिष्टसिद्ध्यभावाधिकरणतावि.शिष्टसमवाय एव तादृश सिद्ध्यभावकार्यतावच्छेदकसम्बन्ध इति न कोपि दोषः । अथ वा स्व वृत्तिकृतिमत्त्व स्ववृत्तिप्रागभावप्रतियोगित्व स्वसामानाधिकरण्यैतत्त्रितय सम्बन्धेन तादृशसिद्धिविशिष्टान्यत्वं तादृशसिद्ध्यभावजन्यतावच्छेदक मिति न कोपि दोषः । अथ वा तादृशसिद्धिविशिष्टत्वं तादृशस्वाधिकरण क्षणत्वावच्छिन्नध्वंसाधिकरणक्षणोत्पत्तिकत्वसहितोत्तरत्वसम्बन्धेन वाच्यम् ; उक्तसमूहालम्बने च तादृशसिद्ध्यधिकरणक्षणत्वावच्छिन्नध्वंसाधिकरणमनु मित्युत्पत्तिक्षण एवेति तद्ध्वंसानधिकरणक्षणोत्पत्तिकत्वमनुमितेरिति न व्यभिचारः । सिद्ध्यात्मकधूममात्रपरामर्शजन्यानुमितेर्धूमलिंगकेच्छाविरह विशिष्टसिद्ध्यधिकरणक्षणत्वावच्छिन्नध्वंसाधिकरण द्वितीयक्षणध्वंसानधिकरण क्षणोत्पत्तिकत्वविरहात्तद्विशिष्टसिद्धिविशिष्टान्यत्वमव्याहतमेवेति ।

एवं यत्र धूमपरामर्शानन्तरं तदप्रामाण्यावगाह्यालोकपरामर्शस्तदु त्तरमनुमितिस्तत्रानुमितेरप्रामाण्यज्ञानाभावविशिष्टधूमपरामर्शविशिष्टत्वरूपा प्रामाण्यज्ञानाभावाविशिष्टधूमपरामर्शजन्यतावच्छेदकाक्रान्तत्वादव्यवहितपूर्व क्षणे चाप्रामाण्यज्ञानाभावविशिष्टधूमपरामर्शासत्त्वेन प्रसक्तस्य व्यभिचा रस्य एतादृशैर्वर्त्मभिरेव वारणमवसेयम् । लिंगोपधानमते च न कदा चिदप्यनुमित्यनुपपत्तिः, तन्मते धूमविशिष्टपर्वतत्वाद्यवच्छिन्नविशेष्यकव ह्यनुमितित्वादेरेव धूमलिंगकेच्छाविरहविशिष्टसिद्ध्यभावजन्यतावच्छेदक

[दी] तल्लिंगकानुमितौ सिद्धिकालीनतल्लिंगकानुमितीच्छाविरह विशिष्टान्यलिंगकानुमितीच्छैव वा प्रतिबन्धिका ।

त्वादुक्तसमूहालम्बनस्थले च आलोकवान् पर्वतो वह्निमानित्याकारकानुमिते रेवोपगमेन व्यभिचारानवकाशादिति ।

धूमेनानुमिनुयां आलोकेनानुमिनुयामित्यादिसकलेच्छासाधारणरूपेणैव सिषाधयिषाणां सिद्धावुत्तेजकत्वम् ; तथा च धूमालोकादिलिंगकनिखिलानुमितिसाधारणी एकैव पक्षता ; उक्तस्थलेऽतिप्रसङ्गभङ्गाय च प्रतिबन्धकान्तरमेव कल्प्यत इत्याशयेनाह- तल्लिंगके ति । असत्यां सिद्धावन्यलिंगकानुमितीच्छासत्त्वे अनुमित्युपपत्तये सिद्धिकालीने ति । सामानाधिकरण्यसम्बन्धेन सिद्धिविशिष्टेत्यर्थः । समूहालम्बनेच्छाकाले सिद्धिसत्त्वे अनुमित्युपपत्तये तल्लिंगकानुमितीच्छाविरहविशिष्टे ति । तल्लिंगकत्वादिप्रकारतान्यप्रकारत्वनिरूपितविशेष्यताकेच्छाविरहविशिष्टार्थकम् । तेन धूमालोकोभयलिंगकवह्न्यनुमितिर्जायतामित्याद्याकारकेच्छाबलात्सिद्धिकाले न केवलालोकलिंगकानुमितिप्रसंगः ; न वा आलोकेन वह्निमटोभयानुमितिः; धूमेन वह्न्यनुमितिर्जायतामित्येतादृशेच्छाकाले सिद्धिसत्त्वे केवलालोकादिपरामर्शात्केवलवह्न्याद्यनुमित्यापत्तिः । यद्यपि तादृशप्रकारत्वनिरूपितविशेष्यताकान्यत्वस्येच्छाविशेषणत्वोपगम एव समूहालम्बनस्थले अनुमितिरुपपादयितुं शक्यते, तथापि ज्ञानेच्छयोर्युगपदुत्पादमङ्गीकुर्वतां नवीनानां मते यत्र सिद्ध्युत्पत्तिकाले धूमलिंगकानुमितीच्छायास्तद्द्वितीयक्षणे च आलोकलिङ्गकेच्छाया उत्पादस्तत्रालोकलिंगकानुमित्युत्पत्तये तादृशविशेष्यताशालीच्छाविरहविशिष्टपर्यन्तानुधावनम् । लिंगविशेषानुपरक्तानुमितीच्छानामपि निरुक्तोत्तेजकतावच्छेदकाक्रान्ततया तादृशेच्छायाः प्रतिबन्धकत्वाप्रसक्तेः अन्यलिंगके ति सम्पातायातम्

सिद्धिविशिष्टेच्छामात्रस्य प्रतिबन्धकत्वे सिद्धिविशिष्टघटतदनुमित्यादि गो चरेच्छाकालीनाननुगतेच्छाव्यक्तीनां तत्तद्व्यक्तित्वेनाभावानां निवेशनीय तया गौरवमिति तत्साध्यविशिष्टतत्पक्षविषयकत्वप्रकारकानुमितीच्छात्वेनैव विशेष्यीभूतेच्छानिवेशो बोध्यः ।

वस्तुतस्तु तत्साध्यविशिष्टतत्पक्षविषयकत्वादिप्रकारकत्वादिकमपि अन्यलिंगकेच्छायां न निवेश्यम् , घटादीच्छाकालीनाननुगतेच्छानां भव न्मतेपि सिद्धावुत्तेजकताया वक्तव्यतया साम्यात् . मन्मते तत्र घटादी च्छासाधारणरूपेणैवानुमितीच्छाया उत्तेजकत्वोपगमादुक्तस्थले पक्षता निर्वाहेण तादृशाननुगतेच्छानां अन्यलिंगकेच्छायामेवोत्तेजकत्वात् । अत्र च तादृशगुरुधर्मावच्छिन्नाभावस्य लिंगभेदेनानन्तकारणतानां पक्षताकार णतान्तरस्य च कल्पनामपेक्ष्य लिंगभेदेन तल्लिंगकानुमितीच्छाविरहविशिष्ट सिद्धित्वरूपलघुधर्मावच्छिन्नाभावहेतुताकल्पनस्यैव साधुत्वेन पूर्वपक्षस्यैव सम्यक्तया वाकारोऽनिर्भरसूचनायेति वदन्ति ।

परे तु अन्यलिंगकत्वप्रकारकानुमित्यासमवहितसिद्धिदशायामननुगता नुमित्साबलात्तल्लिंगकानुमित्युपपत्तये सिद्धौ तादृशेच्छाभावकूटवैशिष्ट्यनिवे शेन पूर्वमते गौरवम् , एतन्मते चान्यलिंगकानुगतानुमित्सारूपोत्तेजकबला देव तत्रानुमित्युपपत्तौ सिद्धौ तादृशाभावानिवेशात् । न चैतन्मतेप्यन्य लिंगकानुगतानुमित्साप्रतिबन्धकतायामेव तासामुत्तेजकत्वस्यावश्यकतया साम्यमिति वाच्यम् , यतो यत्राननुगतसाध्यानुमित्सात्मकसमूहालम्बनेच्छा रूपा एवान्यलिंगकानुमितीच्छाः तत्रान्यलिंगकानुमितीच्छायां तादृशेच्छा व्यक्तिभेदा एव निवेशनीयाः, सिद्धौ तु सामानाधिकरण्यसम्बन्धेन तद त्यन्ताभावस्तत्र च तत्कालीनसंयोगादिव्यक्तीनामभावनिवेशनमादाय विनि गमनाविरहेण गौरवम् . न च पूर्वमतेपि तत्तत्सिद्धिव्यक्तिभेदा एव सिद्धौ निवेशनीयाः, न तु तदिच्छाभाव इति न विनिगमनाविरहाबकाश

[दी **साधकमानम्**-साध्य[वत्ता]निश्चयः। पाषाणमयत्वादिना पर्वते तेजस्त्वादिना वह्नेः सिद्धावपि पर्वतत्वेन तत्र वह्नित्वेन तस्यानुमितेर्धर्मित्वसाध्यत्वयोरवच्छेदकावनुप्रवेशनीयौ;

इति वाच्यम् ; सिद्धेरनन्तरं यत्र यत्र तादृशसमूहालम्बनेच्छाव्यक्तीना मुत्पत्तिस्तत्र तत्र तादृशसिद्धिभेदानां सिद्धौ निवेशे इच्छोत्पत्तिकाले अनुमित्यापत्तेः . ज्ञानेच्छयोर्युगपदुत्पादमते इच्छासामग्र्या ज्ञानाविरोधित्वात् . यादृशस्थले च सिद्धिजननकाले प्रतिबन्धकोत्तेजकेच्छयोरेकस्या अपरव्यक्तेश्च तत्पूर्वमुत्पत्तिस्तत्र द्वितीयक्षणे अनुमित्युपपत्तये एतन्मतेपि तत्तत्सिद्धिभेदाः अन्यलिंगकेच्छाविशेषणीभूतसिद्धयंशे निवेश्यन्ते , न त्वन्यलिंगकेच्छायां तद्विशेषणसिद्धौ वा तदिच्छात्यन्ताभावाः अतो न तत्तत्कालीनसंयोगादिव्यक्तयभावनिवेशनमादाय विनिगमनाविरहप्रसङ्ग इत्याहुः ।

साधकमानपदस्य सिद्धिकारणपरत्वे पूर्वोक्तदोषप्रसङ्गात् तद्व्याचष्टे– **साधके** ति । **साध्य[वत्ता]निश्चयः**- प्रकृतपक्षसाध्यवैशिष्ट्यावगाहि निश्चयः । ' पाषाणमयो वह्निमान्पर्वतस्तेजस्वी ' त्याकारकासमानप्रकारक निश्चयदशायां पर्वतो वह्निमानित्याकारकानुमितेरनुभवसिद्धतया यथाश्रुते च तदनुपपत्तेः प्रकारविशेषं निवेशयति- **पाषाणमयत्वादि** नेति । तत्र- **पर्वते**; **तस्य**– वह्नेः; **धर्मित्वसाध्यत्वयोः**- उद्देश्यत्वविधेयत्वयोः ; **अनुप्रवेशनीया** वित्यस्य "पक्षताशरीर" इत्यादिः । तथा च पर्वतत्वाद्यवच्छिन्नोद्देश्यतानिरूपितसंयोगादिसंसर्गावच्छिन्नवह्नित्वाद्यवच्छिन्नविधेयताकानुमितिं प्रति तद्रूपावच्छिन्नविशेष्यतानिरूपिततत्संसर्गावच्छिन्नतद्रूपावच्छिन्नप्रकारताशालिनिश्चयत्वावच्छिन्नस्य सिषाधयिषाविरहेण विशिष्टस्याभावो हेतुरिति पर्यवसितम् । पर्वतो वह्निमानित्यादिसिद्धिदशायां वह्निमान् पर्वतो घटवानित्याद्यनुमित्युदयात्प्रतिबध्यतावच्छेदककोटौ प्रकारतामुपेक्ष्य विधेय-

[दी] यदि च पर्वतत्वसामानाधिकरण्येन एकत्र साध्यसिद्धावपि विनानुमित्सां अन्यत्र

तानिवेशनम् । विधेयता च वह्निमनुमिनोमीत्याद्यनुव्यवसायनियामकः पक्षतावच्छेदकव्यावृत्तो विषयताविशेषः । स्वरूपतः पर्वतत्ववह्नित्वादि प्रकारकसिद्धिदशायां जातिमान्वह्निमान् पर्वतो जातिमद्वह्नित्याद्यनुमित्युत्पत्त्या, शुद्धपर्वतत्ववह्नित्वादिप्रकारकसिद्धिदशायां विषयिण्यास्तु न्दरपर्वतो वह्निमान्, पर्वतस्सुन्दरवह्निमानित्याद्यनुमितेरुत्पत्त्या च प्रतिबध्यादिशि पर्वतत्वावच्छिन्नेत्यादिना किंचिदविशेषितपर्वतत्वादिपर्याप्तावच्छेदकताकत्वमेव विवक्षणीयम्; तदर्थश्च पर्वतत्वादिनिष्ठनिरवच्छिन्नावच्छेदकत्वानिरूपकत्वम् . (तेन पर्वतो वह्निमानिति सिद्धिदशायां जातिमान्पर्वतो जातिमद्वह्निमानित्याद्यनुमितेर्नानुपपत्तिः .) पर्वतो वह्निमानित्याद्यनुमितौ जातिमान्वह्निमान्पर्वतो जातिमद्वह्नित्यादिसिद्धेरप्रतिबन्धकतया प्रतिबन्धकदिश्यपि पर्वतत्वावच्छिन्नेत्यादिना किंचिदविशेषित तत्तदवच्छिन्नत्वमेव विवक्षणीयम्। तदर्थश्च निरवच्छिन्नतद्वृत्त्यवच्छेदकताकत्वमित्यवधेयम् ।

ननु पर्वतत्वावच्छिन्नविशेष्यताकानुमितौ पर्वतत्वावच्छिन्नविशेष्यताकसिद्धेः प्रतिबन्धकत्वे पर्वतत्वेन एकपर्वतविशेष्यकसिद्धिदशायां तेन रूपेणान्यपर्वते साध्यानुमित्यनुदयापत्तिरत आह- यदि चेति । पर्वतत्वांशे अवच्छेदकत्वावगाहि यत्किंचिद्व्यक्तिविशेष्यकसिद्धिदशायां तेन रूपेण धर्म्यन्तरे अनुमित्यनुत्पादस्य निर्विवादतया **सामानाधिकरण्येने** ति । **एकत्र**—एकधर्मिणि । अनुमित्सासत्त्वे विशेषणाभावादेव विशिष्टाभाव निर्वाहात् धर्मिविशेषनिवेशनमफलमतो **विनाप्यनुमित्सा** मिति । **अन्यत्र**—अन्यधर्मिणि । धर्मिविशेषानन्तर्भावेपि वक्ष्यमाणरीत्या सामानाधि-

[दी] तादृशानुमितिरानुभाविकी, तदा धर्मिविशेषोपि निवेश्यः; नान्यथा ।

करण्येन सिद्धिदशायामवच्छेदकावच्छेदेनानुमितौ बाधकाभावात् तादृशे ति । सामानाधिकरण्यमात्रावगाहीत्यर्थः । धर्मिविशेषोपी ति । तथा च पर्वतत्वाद्यवच्छिन्नतत्तत्पर्वतनिष्ठोद्देश्यताकानुमितौ पर्वतत्वाद्यवच्छिन्नतत्पर्वतादिविशेष्यकसाध्यवत्तानिश्चयत्वेन प्रतिबन्धकत्वमिति भावः । अन्यथा-तादृशानुमितेरानुभाविकत्वविरहे । धर्मिविशेषो निवेश्य इत्यनुषज्यते । अनुमितिर्द्विविधा, पक्षतावच्छेदकसाध्ययोस्सामानाधिकरण्यमात्रावगाहिनी, तयोरवच्छेद्यावच्छेदकभावावगाहिनी च । अवच्छेद्यावच्छेदकभावोपि क्वचित्स्वरूपसम्बन्धविशेषः; यथा मूलावच्छिन्नो वृक्षः संयोगीत्यादौ मूलादि संयोगाद्योः, तत्रान्यादृशस्य तस्य दुर्वचत्वात् । तदवगाहिन्यामेव चानुमितौ पक्षतावच्छेदकदेशकालावच्छेदेन बाधग्रहस्य विरोधितया बाधस्यासिद्धि व्यभिचारासंकरं मणिकृद्भवस्थापयिष्यति । क्वचिच्च व्याप्यव्यापकभावः । यथा पृथिवी रूपवतीत्यादौ पृथिवीत्वादिरूपाद्योः, तत्र मणिकृतैव पृथिव्यामितरभेदानुमाने अंशे घटे सिद्धसाधनमाशंक्य सर्वा पृथिवी इतर भिन्नेत्युद्देश्यप्रतीतेरभावात्पक्षतावच्छेदकनानात्वे हि तदिति समाधानस्य वक्ष्यमाणत्वात् पक्षतावच्छेदकस्य साध्यांशे धर्मिपारतन्त्र्येण प्रकारस्यावच्छिन्नत्वं सम्बन्धविधया भासते, अतोऽवच्छेदकावच्छेदेनानुमितेर्न पर्वतत्वाद्यवच्छिन्नवह्निमान् पर्वत इत्याद्याकारकता ।

अथ वा पक्षांशे सम्बन्धतया भासमानसाध्यसम्बन्धे सम्बन्धतावच्छेदकतया पक्षतावच्छेदकावच्छिन्नत्वभानम् , पक्षतावच्छेदकावच्छिन्नत्वविशिष्टसाद्धर्म्यत्वेनैव वा पक्षे तत्सम्बन्धभानमित्यन्यत्र विवेचितम् । अवच्छेदकावच्छेदेनानुमितिः पक्षतावच्छेदकसामानाधिकरण्यमात्रावगाहि सिद्धिदशायामपि जायते, न्यूनविषयकसिद्धिदशायामधिकानुमितेस्तर्वानुभवसिद्धत्वात् , अत एव तत्रावच्छेदकावच्छेदेनानुमितेरुद्देश्यता तत्र

[दी] पक्षतावच्छेदकस्य सामानाधिकरण्येन साध्यसिद्धौ सत्या मपि तदवच्छेदेनानुमितिदर्शनात् पक्षतावच्छेदकावच्छेदेन अनुमितिं प्रति तदवच्छेदेन सिद्धेः,

---

नांशतस्सिद्धसाधनं दोष इत्यतस्तदेवोपपादयति– **पक्षतावच्छेदके**ति। **सामानाधिकरण्येन** सामानाधिकरण्यमात्रेण । **तदवच्छेदेन**– पक्षतावच्छेदकावच्छेदेन । **सिद्धेः**– सिद्धेरेव । सामानाधिकरण्यमात्रावगाहि सिद्धेः प्रतिबन्धकत्वं एवकारव्यवच्छेद्यम् । अयं भावः, · पर्वतो वह्नि मानित्यादिसिद्धिदशायां पर्वतस्सुन्दरवह्निमानित्याकारकानुमितेरुत्पत्त्या विधेयतावच्छेदकतायाः पर्याप्तिः प्रतिबध्यतावच्छेदककोटौ निवेशनीया । एवं संयोगादिना वह्नेस्सिद्धावपि संयुक्तसंयोगादिना वह्न्याद्यनुमित्युत्पत्त्या संसर्गतावच्छेदकतायः अपि पर्याप्तिर्निवेशनीया । एवं संयोगादिना साध्यस्य दण्डोपलक्षितपुरुषादेस्सिद्धावपि विशिष्टनिरूपितसंयोगादिना दण्डिपुरुषाद्यनुमित्युत्पत्त्या संसर्गतावच्छेदकतायां अपि पर्याप्तिर्निवेशनीया । एवं चावच्छेदकावच्छेदेनानुमितौ शुद्धवह्नित्वादौ शुद्धसंयोगत्वादौ वा विधेयतावच्छेदकतायाः संसर्गतावच्छेदकतायां वा अपर्याप्ततया तादृशानुमितेर्न सामानाधिकरण्यमात्रावगाहिसिद्धिप्रतिबध्यत्वमिति ।

प्राञ्चस्तु— व्यापकतायाः संसर्गतया भाने गानाभावात्पक्षतावच्छेदकाक्रान्तयावद्व्यक्तिविषयकानुमितिरेव पक्षतावच्छेदकावच्छेदेनानुमितिरिति वदन्ति; तन्मते मणिकारोक्तन्यायेन अंशतस्सिद्धसाधनस्यानुगतरूपावच्छिन्न नानाव्यक्तिपक्षकानुमितावदोषत्वे तत्र सामानाधिकरण्यमात्रावगाहिन्यास्सिद्धेरविरोधितया पक्षतावच्छेदकव्यापकोद्देश्यताकान्यत्वमेव सिद्धिसामान्यप्रतिबध्यतावच्छेदककोटौ निवेशनीयम् । नच विषयभेदेन विषयताभेदात् पक्षतावच्छेदकावच्छेदेनानुमितेर्विषयतानामपि प्रत्येकं पक्ष-

तावच्छेदकाव्यापकत्वमेवेति तादृशविषयतायाः नानाव्यक्तिपक्षस्थले अप्रसिद्धिरिति वाच्यम् ; उद्देश्यतासम्बन्धेन पक्षतावच्छेदकव्यापकान्यत्वस्यैवानुमितिविशेषणत्वोपगमात् । दीधितिकारस्यावच्छेदकावच्छेदेन अनुमितावच्छेद्यावच्छेदकभावस्य क्वचित्स्वरूपसम्बन्धात्मकस्येव व्याप्यव्यापकभावस्यापि भानमेवानुमतम् , भागासिद्धेर्दोषत्वनिर्वाहार्थं पक्षतावच्छेदकावच्छेदेनानुमितौ पक्षतावच्छेदकावच्छेदेन हेतुमत्ताज्ञानकारणतायां आवश्यकत्वात् ; शिखरादिविशिष्टपर्वतो वह्निमानित्यादौ शिखरे हेतोस्तत्सम्बन्धस्य वा अवच्छेदकताविरहेण हेत्वसिद्धेरावश्यकतेत्याशङ्क्य पक्षतावच्छेदके अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वावगाहिन्यामनुमितौ तदवच्छेदेन हेतुमत्ताज्ञानस्य हेतुतायां भागासिद्धेर्दोषत्वार्थमुपगमेपि स्वरूपसम्बन्धरूपावच्छेदकत्वावगाहिन्यामनुमितौ पक्षतावच्छेदकावच्छेदेन हेतुमत्ताज्ञानापेक्षा नोपेयत इति समाधानस्य स्वयं अवच्छेदकत्वयोर्वस्तुनोर्भेदा दित्यनेनाग्रे वक्ष्यमाणत्वात् ; एवं व्यापकताभानस्य तदननुमतत्वे **पर्वतत्वसमानाधिकरण्येनैकत्र साध्यसिद्धा** वित्यत्रैकत्रेत्यनेनैवावच्छेदकावच्छेदेन या सिद्धिस्तत्त्वाभावलाभे तल्लाभप्रयोजकस्य **सामानाधिकरण्येने** त्युपादानस्यानर्थक्याच्च । युज्यतेचैतदेव मतम् । प्राचीनमतेप्युक्तयुक्त्या विधेयतावच्छेदकत्वादिपर्याप्तिनिवेशस्यावश्यकत्वात्तादृशोद्देश्यताकान्यत्वस्याधिक्यस्य निवेशनीयतया गौरवात् । एवं सिद्धिसामान्यशून्यतादशायां अवच्छेदकावच्छेदेनानुमितावुत्पद्यमानायां सिद्ध्यभावबलात्तत्कार्यतावच्छेदकीभूतपक्षतावच्छेदकव्यापकोद्देश्यताकान्यानुमितित्वावच्छिन्नस्यापत्तेश्च । अस्मन्मते च सिद्धिसामान्याभावकालीनायामवच्छेदकावच्छेदेनानुमितौ विशिष्टवह्नित्वे विशिष्टसंयोगत्वे वा पर्याप्तविषयताविशेषः इव शुद्धवह्नित्वे शुद्धसंयोगत्वे वा पर्याप्तोपि विषयताविशेषः स्वीक्रियते. एकज्ञानस्यैकत्र विषये विषयताद्वयोपगमे क्षतिविरहादिति सिद्धिसामान्याभावकार्यतावच्छेदकावच्छिन्नोत्पत्तिरिष्टैव । नचावच्छेदकावच्छेदेनानुमितौ व्यापकतायास्तं

स्तर्गतया भानोपगमे तादृशानुमिताववच्छेदकावच्छेदेन हेतुमत्ताज्ञानस्य पृथक्कारणत्वकल्पने गौरवम् ; एतन्मते तत्तत्पर्वतोद्देश्यकानुमितौ तत्तत्पर्वतविशेष्यकपरामर्शस्य हेतुतया अर्थवशादेव मावत्पर्वतविषयकपरामर्शा त्तथानुमितेरुत्पादात्तादृशानुमितौ परामर्शस्य स्वतन्त्रहेतुत्वाकल्पना व्यापकताया स्संसर्गविधया भानस्य क्वचिदप्यनभ्युपगमादिति वाच्यम् ; यत्रैकः परामर्शो वर्तते कतिपयपर्वतविषयकः, अन्यश्च तदितरमावत्पर्वत विषयकस्तत्राप्यवच्छेदकावच्छेदेनानुमितेरुत्पादापत्तेः । नचेष्टापत्तिः; अव च्छेदकावच्छेदेन हेतुमत्ताज्ञानं विना अवच्छेदकावच्छेदेनानुमित्यनुत्पा दस्य सर्वसम्मतत्वात्तत्र च कस्यापि परामर्शस्य भवन्मतसिद्धाया अव च्छेदकावच्छेदेन हेतुमत्तावगाहिताया असम्भवात् । एवं यत्र पक्षता वच्छेदकताघटकसम्बन्धेन पक्षतावच्छेदकमवृत्ति तत्र तेन सम्बन्धेन पक्षता वच्छेदकाक्रान्ताप्रसिद्ध्या अनुमितिद्वैविध्यानुपपत्तिश्च तन्मते । अपिचा वच्छेदकावच्छेदेनानुमितेः अवच्छेद्यावच्छेदकभावरूपाधिकविषयानवगा-हित्वे सामानाधिकरण्यमात्रेण सिद्धिदशायां तादृशानुमितेरुत्पतौ बीजा भावः; सिद्ध्यविषयीभूतधर्मिविषयकत्वस्य तद्बीजत्वे तथाविधसिद्धिदशायां सिद्ध्यविषयकतिपयपर्वतादिविषयकानुमितेरप्युत्पादौचित्यात् ।

अथ मणिकृता पक्षतावच्छेदकैक्ये अंशतस्सिद्धसाधनस्यादोषत्वोप गमेपि तदितरप्राचीनैरनुमितिमात्र एवांशतस्सिद्धसाधनस्यापि दोषत्व मुपेयते; अत एव तेषां मतमालम्ब्य मणिकृतापि शब्दानित्यत्वानुमाने ध्वन्यादावंशतस्सिद्धसाधनवारणाय वर्णात्मकत्वादिविशेषणं पक्षे निवे शितम् , अत एव गन्धादिरूपपक्षतावच्छेदकस्य पृथिव्यामितरभेदादौ साध्ये हेतुता नाचार्यैरनुमन्यते. व्याप्तिग्रह एव हेतुरूपपक्षतावच्छेदक साध्ययोस्समानाधिकरण्यभानेन सिद्धसाधनात्सकलपृथिवीविषयकानुमिते रप्ययोगात् । नचांशतस्साध्यसिद्धावप्यधिकधर्मिविषयकतया मावत्पर्वतादि

विषयकानुमित्युत्पाद उचितः, अधिकधर्मिविषयकानुमितेस्सिद्धिदशायामुत्पादे च वागनित्येत्यादिसिद्धिदशायामनित्ये वाङ्मनसे इत्यादिसमूहालम्बनानुमित्युत्पादस्याप्यौचित्यात् , न हि तत्र कस्याप्यनुमितिरभिमता ; नवीनैरपि पक्षतावच्छेदकैक्य एवांशतस्सिद्धसाधनस्यादोषत्वोपगमात् . एवं च नवीनमत एवावच्छेदकावच्छिन्नत्वावगाहितदनवगाह्यनुमितिभेदेन पक्षताद्वयस्य स्वीकरणीयतया गौरवम् । न च विशिष्टबुद्धौ, धर्मितावच्छेदकव्यापकत्वभानानुपगमे पक्षतावच्छेदकसामानाधिकरण्यमात्रावगाहिबाधदशायां तत्सामानाधिकरण्येन तादृशबाधविषयधर्मिविषयिण्याः कतिपयधर्मिविशेष्यकानुमितेरिव सकलधर्मिविषयकानुमितेरप्युत्पादौचित्यात् अवच्छेदकावच्छेदेनानुमितावुद्देश्यायामप्यंशतो बाधस्यादोषतापत्तिरिति वाच्यम् , सामानाधिकरण्यमात्रावगाहिन्यां विशिष्टबुद्धौ समानविषयकतथाविधविपरीतनिश्चयप्रतिबन्धकतायाः प्राचीनानुमततया अंशतो बाधस्य दोषतोपपत्तेः. एवं च यावत्पक्षविषयकानुमितौ यावत्पक्षविशेष्यकहेतुमत्ताज्ञानापेक्षया तद्विरोधितया भागासिद्धेरपि दोषतानिर्वाहः । एवं यत्र सकलपर्वतानां नैकपरामर्शविषयता, अपि तु परामर्शद्वयविषयता. तत्र यावत्पर्वतविषयकानुमितिरूपावच्छेदकावच्छेदेनानुमितिः प्राचीनमते इष्टैव. (नवीनमतेपि तत्र तादृशानुमितेरावश्यकत्वादिति.) अवच्छेदकावच्छेदेनानुमितौ तादृशपरामर्शस्य हेतुत्वाकल्पनेनाप्येतन्मते लाघवम् ; मैवम् अवच्छेदकावच्छेदेन विशिष्टबुद्धौ व्यापकत्वभानानुपगमे व्यापकत्वभानस्य सामानाधिकरण्येन विपरीतज्ञानप्रतिबन्धकत्वप्रयोजकत्वासम्भवेन तत्प्रयोजकस्य दुर्वचतापत्तेः । न चैवं रूपेण समानधर्मिविषयकत्वमेव विपरीतज्ञानप्रतिबन्धकत्वे बीजम् ; तथा सति पार्थिवगन्धत्वाद्यवच्छेदेन जलावृत्तित्वादिनिश्चयस्यापि शुद्धगन्धत्वाद्यवच्छेदेन तन्निश्चयस्येव गन्धो जलवृत्तिर्नवेत्यादौ गन्धत्वसामानाधिकरण्यमात्रेण जलवृत्तित्वादिसंशये विरोधितापसङ्गा

[दी] तत्सामानाधिकरण्येनानुमितिं प्रति तु सिद्धिमात्रस्यैव विरोधित्वम् ।

दुभयोरेव निश्चययोर्गन्धत्वादिना तदाश्रययावद्धर्मिणि ग्राह्याभावावगाहितायां अविशेषात् . विरोधिविषयकत्वाविशेषे धर्मितावच्छेदककोटावधिकभानस्याविरोधितावीजत्वाभावात् । द्वितीयस्य विरोधित्वे प्रथमस्यापि तथात्वौचित्यात् । नव्यमते उभयनिश्चयविषयव्यापकतयोर्भेदेन विशेषसम्भवात् । एतेनावच्छेदकावच्छेदेनानुमितौ व्यापकत्वभानापेक्षया लाघवात् यावद्धर्मिवृत्त्यखण्डैकविषयतामभ्युपगम एवोचितः, तदन्यविषयतैव सिद्धिसामान्यप्रतिबध्यतावच्छेदिका; सिद्धिसामान्याभावकालीनानुमितौ च तादृशैकधर्ममात्रवृत्तिविषयतापीष्यत इति न कोपि दोष इति परास्तम् ।

पक्षतावच्छेदकसामानाधिकरण्येन तदवच्छेदेन च वह्निसिद्धिदशायां सामानाधिकरण्यमात्रावगाहिन्यनुमितिर्न जायते , उभयोरेव सिद्धयोः पक्षतावच्छेदकवति साध्यसम्बन्धरूपतदुभयसामानाधिकरण्यावगाहितया तादृशानुमितेस्तदतिरिक्तानवगाहित्वात् ; अतस्तथाविधानुमितावुभयविधसिद्धयोरेव प्रतिबन्धकत्वं दर्शयति— **तत्सामानाधिकरण्ये**नेति । **तत्सामानाधिकरण्यमात्रेण**– पक्षतावच्छेदकसामानाधिकरण्यमात्रेण । अवच्छेदकावच्छेदेनानुमितेरपि सामानाधिकरण्यावगाहितया तद्व्यावर्तनायावच्छेद्यावच्छेदकभावावगाहित्वव्यवच्छेदार्थकं **मात्र** पदम् । अवच्छेद्यावच्छेदकभावानवगाहित्वं च न सिद्ध्यभावजन्यतावच्छेदककोटौ निवेशनीयम् ; उक्तदिशाऽऽपत्तिसम्भवात् ; पर्याप्तिनिवेशादेवोपपत्तेर्वैयर्थ्यात्येत्यवधेयम् । **सिद्धिमात्र** स्येति । **मात्र** पदं कृत्स्नार्थकम् । तथा च पक्षतावच्छेदकावच्छेदेन तत्सामानाधिकरण्येन च सिद्धिरित्यर्थः । प्रतिबन्धकता चोभयविधसिद्धयोः संसर्गतादीनां पर्याप्तिनिवेश्यैकरूप्येणैव यद्युभयसाधारणनिश्चयत्वं शक्यते निर्वक्तुम् ; अन्यथा पुनः पृथक्पृथगेवेतिध्येयम्।

[दी] इत्थं च लिङ्गभेदन्यायोप्यनुसरणीयः ।

यत्तु सामानाधिकरण्येनानुमितौ तथाविधसिद्धेरवच्छेदकावच्छेदेन सिद्धिव्यावृत्तरूपेण प्रतिबन्धकत्वेपि तत्रावच्छेदकावच्छेदेन सिद्धेर्न प्रतिबन्धकताधिक्यम् , अवच्छेदकावच्छेदेनानुमितौ तस्यापि प्रतिबन्धकत्वे कल्पनीये अवच्छिन्नसंयोगादिपर्याप्तसंसर्गताकत्वस्य प्रतिबध्यतावच्छेदके अवश्यं निवेशनीयतया अवच्छिन्नत्वातिरिक्तधर्मानवच्छिन्नसंयोगादिनिष्ठ संसर्गताकत्वस्यैव च तदर्थतया शुद्धसंयोगादिसंसर्गकानुमितिसाधारण्येन तादृशप्रतिबन्धकतयैवोपपत्तिरिति ; तदसत्- सामानाधिकरण्येनानुमिनुया मवच्छेदकावच्छेदेनानुमिनुयामित्याद्याकारकेच्छानां पृथगुत्तेजकताया वक्ष्य माणतया पृथक्प्रतिबन्धकताकल्पनस्यावश्यकत्वात् ।

ननु सिद्धिदशायां पक्षतावच्छेदकावच्छेदेनानुमिनुयामित्याकारक सिषाधयिषासत्त्वे असति चावच्छेदकावच्छेदेन हेतुमत्तापरामर्शे सामा नाधिकरण्यमात्रावगाहिपरामर्शात्तादृशानुमित्यापत्तिः, तथाविधसिषाधयिषा सत्त्वेन पक्षतायाः अक्षतत्वादित्यत आह इत्थंचे ति । इत्थंच- उक्त युक्त्या पक्षतावच्छेदकावच्छिन्नत्वतत्सामानाधिकरण्यमात्रावगाह्यनुमित्योः सिद्धयोः पृथक् पृथक्प्रतिबन्धकत्वे च । लिंगभेदन्याय इति । यथा तत्तल्लिङ्गकानुमितौ सिद्धेः प्रतिबन्धकतायां तत्तल्लिङ्गकानुमितीच्छैवोत्तेजिका, न त्वन्यविधानुमितीच्छा, तथा पक्षतावच्छेदकसामानाधिकरण्यमात्रावगाहि नीमनुमितिं प्रति सिद्धेः प्रतिबन्धकतायां तादृशानुमितीच्छैव उत्तेजिका, नत्वन्यविधानुमितीच्छेति स्वीकरणीयमिति नातिप्रसङ्ग इत्यर्थः । यदि पर्वते वह्निरित्याकारकसाध्यनिश्चयानन्तरं पर्वतो वह्निमानित्याद्याकारिकानु मितिर्जायते, तदा साध्यविशेष्यकानुमितौ साध्यविशेष्यकसिद्धेः प्रति बन्धकत्वेपि सामान्यतः साध्यपक्षवैशिष्ट्यावगाह्यनुमितौ तादृशसिद्धि त्वेन नैकं प्रतिबन्धकत्वं कल्पनीयम् , अपि तु विशिष्यैव प्रतिबन्धकता

[दी] साध्यविशेष्यकसिद्ध्यनन्तरं पक्षविशेष्यकानुमितेः प्रामाणिकत्वे तां प्रति पक्षविशेष्यिकैव सिद्धिर्विरोधिनी; एवं च पक्षविशेष्यक सिद्ध्यनन्तरमपि साध्यविशेष्यकानुमितिर्जायते तुल्यन्यायात्। समानाकारकसिद्धेः प्रतिबन्धकत्वे पर्यवसानात् ।

द्वयम्, अगत्या गौरवस्यादोषत्वादित्याशयेनाह– साध्यविशेष्यके ति। द्वयोस्समानविषयकत्वे विशेषणविशेष्यभावे वैपरीत्यमकिंचित्करमित्यभि प्रायेणानिर्भरसूचनाय प्रामाणिकत्वे इत्युक्तम् । गणिकारस्य तु समान प्रकारकसिद्धेरेव प्रतिबन्धकत्वमनुमतम् । पृथिव्यामितरभेद इति साध्य विशेष्यकानुमित्यनन्तरं तदात्मकविशेषणज्ञानसहकृताव्यतिरेकिपरामर्शादेव पृथिवी इतरभिन्नेति पक्षविशेष्यकानुमितेरुत्पादस्य तेन व्यतिरेकिग्रन्थे वक्ष्यमाणत्वात् ।

पक्षविशेष्यिकैवे ति । तथा च विशिष्य प्रकारताविशेषं निवेश्यैव प्रतिबध्यप्रतिबन्धकभावः कल्पनीय इति भावः । तत्र तादृशानुमित्य भावस्य प्रामाणिकत्वे तूभयविधज्ञानसाधारणपक्षसाध्यवैशिष्ट्यावगाहिनिश्च यत्वस्यानतिप्रसक्तस्य सुवचत्वे उभयविधसिद्ध्योरनुगतरूपेणैव प्रतिबन्ध कता; प्रतिबध्यतावच्छेदकं तु पक्षविशेष्यकसाध्यप्रकारकानुमितित्वादिक मेव, न त्वनुगतम् ; पक्षविशेष्यकसाध्यप्रकारकानुमितिर्जायताम्, साध्य विशेष्यकपक्षप्रकारकानुमितिर्जायतामित्याकारिकयोरिच्छयोः पृथक्पृथगुत्ते-जकत्वानुरोधात् ।

एवञ्च– साध्यविशेष्यकसिद्ध्यनन्तरं पक्षविशेष्यकानुमित्युत्पत्तेः प्रा माणिकत्वे च । तुल्यन्याया दिति । पर्यवसानादित्यस्य हेतुः । समाना कारकसिद्धे रिति । अन्यूनाकारकसिद्धेरित्यर्थः । पर्वतस्सुन्दरवह्निमानि त्यादिसिद्धिदशायामपि न्यूनविषयिण्याः पर्वतो वह्निमानित्याद्यनुमितेरनु त्पादादधिकविषयकसिद्धेरविरोधित्वे अवच्छेदकावच्छेदेन, सिद्धस्सामानाधि

[दी] तादृशानुमितिं प्रति सिद्धिमात्रं विरोधि; साध्यप्रसिद्धिरेव वा.

करण्येनानुमितौ प्रतिबन्धकतालेखनस्यासङ्गतेः । अत एव जातिशक्तिवादे गोत्वत्वेन गोवृत्तित्वानुमानं सिद्धसाधनान्न सम्भवतीति अविशिष्टहेतुना विशिष्टसाध्यसाधन एव सिद्धसाधनानवकाशो न तु विशिष्टेनाविशिष्ट साधनेपीति जात्या व्यक्त्यनुमानपक्षमाक्षिप्य मिश्रा " अर्थापत्त्या वा त त्सिद्धि" रिति मूलमवतारयामासुः ।

ननु साध्यविशेष्यकानुमितिस्तावन्न सर्वत्रानुभवसिद्धा, पर्वतो वह्नि मानित्याकारिकाया एवानुमितेरनुभवात् व्याप्यविशेष्यकपरामर्शादपि पक्ष विशेष्यकानुमित्युत्पादस्य परामर्शद्वयस्यानुगतरूपेण हेतुतावादिनोपि सम्मतत्वात् ; किंत्वप्रसिद्धसाध्यकस्थले विशेषणज्ञानादिविरहेण साध्य विशेषणकानुमितेरनुपपत्त्या साध्यविशेष्यकानुमितिरुपेयते , एवं च पक्ष विशेष्यकसिद्धिदशायामपि तादृशानुमितेरप्रामाणिकतया तदनभ्युपगमे क्षतिविरह इति तां प्रति पक्षसाध्यवैशिष्ट्यावगाहिज्ञानत्वेनोभयसिद्धि साधारण्येनापि प्रतिबन्धकत्वं सम्भवतीत्यभिप्रेत्य मतान्तरमाह— **तादृशानुमिति** मिति । साध्यविशेष्यकानुमितिमित्यर्थः । **सिद्धिमात्रम्**- साध्यविशेष्यिका पक्षविशेष्यिका च सिद्धिरित्यर्थः । ननु उच्छृङ्खल साध्यज्ञानदशायामपि साध्यविशेष्यकानुमितिरप्रामाणिकी , तत्र साध्य विशेषणकानुमितेरेव सम्भवादिति तादृशानुमितिप्रतिबन्धकतायां पक्षादि विषयतायाः सिषाधयिषाविरहस्य निश्चयत्वस्य च निवेशनं गौरवाये त्यभिसन्धायाह- **साध्यप्रसिद्धिरिति** । साध्यतावच्छेदकप्रकारकज्ञानमित्यर्थः। तेनेतरत्वव्यापकीभूताभावप्रतियोगिपृथिवीत्ववती पृथिवीत्यादिपरामर्शाद्भेद त्वादिना साध्यज्ञानसत्त्वेपि पृथिव्यामितरभेद इत्याकारकानुमितेर्नानुपपत्तिः ।

मे च तत्र पृथिवीतरभिन्नेत्येतादृशानुमितेस्सम्भवः, विशेषणतावच्छेदकी भूतेतरभेदत्वादिप्रकारकज्ञानविरहात् । अथेतरभेदत्वादिप्रकारकज्ञानस्य यदीतरभेदत्वाद्यवच्छिन्नमुख्यविशेष्यकज्ञानत्वं प्रतिबध्यतावच्छेदकम्, तदा तथाविधज्ञानदशायामितरभेदत्वाद्यवच्छिन्नपक्षकप्रमेयत्वाद्यनुमितेरप्यनुपपत्तिः; तद्धर्मावच्छिन्नविधेयकत्वस्याधिकस्य निवेशेपीतरभेदः प्रमेयः, पृथिवीतरभिन्नेत्यादिसमूहालम्बनानुमितेर्गोत्वाभावो गोत्वाभाववानित्यनुमितेश्चानुपपत्तिः ।

अत्र केचित्;— पृथिवीतरभिन्नेत्यादिसाध्यविशेषणकानुमितौ तथाविधप्रत्यक्षादिसाधारणी विशेष्यतावच्छेदकताभिन्नप्रकारतैव; विधेयता साध्यविशेष्यकानुमितौ च ततोन्या; तथा च प्रकारताभिन्नविधेयतैव साध्यप्रसिद्धिप्रतिबध्यतावच्छेदिकेति नानुपपत्तिरित्याहुः । तन्न; पक्षारताविशेषस्य विधेयतात्वोपगमे जलभेदे तेजोभेद इत्याकारकतेजोभेदादिसाध्यकानुमितेर्जलभेदविधेयकत्वापातात् । नचाधेयतासम्बन्धावच्छिन्नप्रकारतान्यावृत्तं तदिति वाच्यम्; तथासत्याधेयतासम्बन्धेन जलभेदादिसाध्यकतादृशानुमितेरपि तद्विधेयकत्वानुपपत्तेः । यदि च यत्राधेयत्वं साध्यतावच्छेकसम्बन्ध स्तत्र विधेयत्वमतिरिक्तमित्युच्यते; तदा तत्सम्बन्धेन जलभेदसाध्यकानुमितौ प्रकारताभिन्नविधेयताशालिन्यां साध्यप्रसिद्ध्यभावव्यभिचारो दुर्वारः ।

वस्तुतस्तु तद्धर्मावच्छिन्नाप्रकारकत्वे सति तद्धर्मावच्छिन्नविधेयताकानुमितित्वमेव तद्धर्मप्रकारकज्ञानप्रतिबध्यतावच्छेदकम्; साध्यप्रसिद्धिस्थले च साध्यप्रकारिकैवानुमितिर्जायते, न तु तदप्रकारिकेति न तत्र व्यभिचारः ।

[दी] अत एव प्रसिद्धसाध्यकस्थले पक्षविशेष्यिकैवानुमितिरनुभूयत इति ।

अतएव- साध्यविशेष्यकानुमितौ साध्यप्रसिद्धेः प्रतिबन्धकत्वादेव । प्रसिद्धसाध्यकस्थले- अभावरूपसाध्यप्रसिद्धिस्थले, न तु भावसाध्यकस्थल इत्यर्थः; तत्र परामर्शस्य नियमतः साध्यघटितव्याप्तिविषयकतया साध्यविशेष्यकानुमितेरप्रसिद्ध्या साध्यप्रसिद्धिप्रतिबन्धकतायाः कल्पयितुमशक्यत्वात् उपपद्यमानसङ्गतेः । स्वनिरूपितप्रकारतानवच्छेदकत्वविशिष्टविषयतावच्छेदकतापर्याप्त्याश्रयत्वरूपविषयनिष्ठप्रत्यक्षत्वा अनुमितिम्प्रति विषयतावच्छेदकतासम्बन्धेन ज्ञानस्य सर्वसाधारण्येन प्रतिबन्धकतायां आपातत उक्तिसम्भवेपि साध्याघटितव्यतिरेकव्याप्तिविषयकपरामर्शघटितसामग्र्या एव साध्यविशेष्यकानुमित्युत्पादप्रयोजकतायाः कल्पितत्वात , भावसाध्यकस्थले साध्यविशेष्यकानुमितेरप्रसिद्ध्या साध्यविशेषणकानुमितेः साध्यविशेष्यकत्वे तादृशप्रतिबन्धकतायाः अप्रयोजकत्वादुपपद्यमानसङ्गतितादवस्थ्यात् ।

यत्तु यत्र महानसीयवह्निमात्रविषयकः परामर्शः तत्र पक्षधर्मता बलात्पर्वते पर्वतीयवह्निर्भासमानो विशेषणज्ञानाविरहेण विशेष्यतयैव भासत इति भावसाध्यकस्थलेपि साध्यविशेष्यकानुमितिसम्भव इति; तन्तुच्छम्, सामान्यलक्षणायाः प्रत्यासत्तित्वमते महानसीयवह्निविषयकपरामर्शे पर्वतीयवह्न्यभावप्रयोजकस्य दुर्लभत्वात् , न च स्मरणात्मकपरामर्शे कदाचिदुद्बोधकविरहात्तदभानसम्भवः; उद्बोधकस्य फलबलकल्पत्वात् : विशिष्टविशेषणबुद्धौ विशेषणज्ञानहेतुतया निर्युक्तिकत्वात् विशेषणतावच्छेदकप्रकारकज्ञानस्य चाक्षुषत्वात्पर्वतीयवह्न्यविषयकपरामर्शादपि वह्नित्वेन तद्वह्निविशेषणकानुमितिसम्भवाच्च ।

9494

इदमत्रावधेयम् । साध्यप्रसिद्धिप्रतिबन्धकतायामपि साध्यविशेष्यकानुमितित्वप्रकारकेच्छाया उत्तेजकत्वमावश्यकम् ; अन्यथा पक्षविशेष्यकसिद्धिदशायां तादृशेच्छासत्त्वे अनुमित्यापलापापत्तेः . सिद्धयसमवहित साध्यप्रसिद्धिदशायां साध्यविशेषणकानुमिते स्वम्भवेन तत एवोद्देश्यतासंशय निवृत्त्यादिसम्भवे साध्यविशेष्यकानुमित्यनुपगमेऽपि न क्षतिकर इत्याशे प्रेत्यैव साध्यप्रसिद्धेस्तद्विरोधित्वमुररीकृतं ग्रन्थकृता । प्रकृते च साध्य विशेषणकानुमित्युत्पादसम्भवेन तादृशानुमित्यपलापानौचित्यात् । तथा च यत्र सिद्धयसमवहिता साध्यप्रसिद्धिरथचानुमित्सा तत्र व्यतिरेकिपरा मर्शात्साध्यविशेष्यिका तद्विशेषणिकाचानुमितिरापद्येत । नच्चैकविधादेव परामर्शादेकदा द्विविधानुमितिरानुभाविकी, तस्माद्व्यतिरेकिपरामर्शात्साध्य प्रसिद्धिदशायामपि साध्यविशेष्यिकाया एवानुमिते स्वीकारस्समुचित; सिद्धिप्रतिबन्धकत्वापेक्षया साध्यप्रसिद्धिप्रतिबन्धकतायामवच्छेदकलाघवस्य किंचित्करमेव । व्यतिरेकिपरामर्शात्कचित्साध्यविशेषणकानुमितिस्वीकारे तादृशानुमितिं व्यतिरेकिलिङ्गकत्वान्वयिलिङ्गकत्वप्रकारकानुमितां पृथगुक्त्वा कीकृत्य सिद्धेः प्रतिबन्धकताद्वयेनैव गौरवात् ।

परे तु- अप्रसिद्धसाध्यकस्थलेऽपि साध्यविशेषणिकैवानुमितिर्जायते; इतरभेदत्वादिरूपविशेषणतावच्छेदकप्रकारकज्ञानाविरहेऽपि 'विशेष्ये विशेषण तत्र च विशेषणान्तर' मिति न्यायेनैव पृथिवी इतरभेदवत्त्वाद्यनुमिति सम्भवात् । न च लाघवमवकाशः, तादृशानुमितिं प्रत्येव साध्यप्रसिद्धि-प्रतिबन्धकताया अवश्यकल्पनीयत्वादिति वाच्यम् ; तथात्वधानुमितौ यादृशी विषयता तस्याः साध्यप्रसिद्धिकालानविशिष्टवैशिष्ट्यावगाह्यनु मितिसाधारण्योपगमात् ; साध्यविशेष्यकानुमित्यनुपगमे साध्यप्रसिद्धिप्रति बन्धकताया एवाकल्पनात् । न च सिद्धिकाले तथाविधानुमितेर्वार णाय तत्र सिद्धेः साध्यप्रसिद्धेर्वा प्रतिबन्धकत्वकल्पनाधिक्यमावश्यक-

मिति वाच्यम् ; विशिष्टवैशिष्ट्यानुमितिस्थलीयसिद्धिप्रतिबन्धकतैवोपपत्तेः, इतरभेदत्वादिना इतरभेदादिविषयकानुमितित्वस्य तत्स्थलीयप्रतिबध्यतावच्छेदकत्वेनोभयसाधारणत्वादिति ।

यत्तु विशिष्टवैशिष्ट्यानुमितौ विशिष्टवैशिष्ट्यावगाहिनी सिद्धिरेव विरोधिनी, न तु केवलं ' विशेष्ये विशेषण ' मितिरीत्या जायमानापि सा तथा; तस्यास्संसर्गांशे विशिष्टनिरूपितत्वानवगाहितया न्यूनविषयकत्वात् । एवं च केवलं ' विशेष्ये विशेषण ' मिति न्यायेनानुमितेरुपगमे तादृशसिद्धिदशायां तस्या वारणाय तत्र तादृशसिद्धेर्विरोधित्वकल्पनाधिक्यमावश्यकमेवेति किमपराद्धं साध्यविशेष्यकानुमितिस्वीकारेण विशिष्टवैशिष्ट्यावगाहिसाध्यविशेषणकानुमितेरनभ्युपगमेन? प्रतिबध्यप्रतिबन्धकभावसाम्यादिति; तदपि तुच्छम् ; विशिष्टनिरूपितवैशिष्ट्यज्ञानमात्रविरोधिबाधादिकाले केवलं ' विशेष्ये विशेषण ' मिति न्यायेनानुमितेस्सर्वसम्मततया तादृशसिद्धेः प्रतिबन्धकतायाः आवश्यकत्वेन साध्यविशेष्यकानुमितिस्वीकर्तुरधिकप्रतिबन्धकताकल्पनस्य दुर्वारत्वादिति । यदि च विशिष्टप्रतियोगिकविलक्षणवैशिष्ट्यानवगाहिन्यपि विशिष्टविशेषणकज्ञाने विशिष्टविशेषणज्ञानमपेक्षितम् ; तदा तुल्ययुक्त्या विशिष्टविशेष्यकज्ञानेपि विशिष्टविशेष्यज्ञानहेतुतया साध्यतावच्छेदकविशिष्टविशेष्यकानुमितिरपि अप्रसिद्धसाध्यकस्थले न सम्भवति । न च विशेष्यज्ञानस्य विशिष्टबुद्धावहेतुतया तद्विशेषस्यापि न तद्विशेषहेतुतेति वाच्यम् ; सामान्यप्रत्यासत्तिजन्यज्ञाने विशेष्यज्ञानस्य व्यभिचारेण सामान्यहेतुत्वासम्भवेपि तुल्यरूपोभयविशेषणावगाहिज्ञानस्याप्येकविशिष्टे अपरविशेषणकत्ववारणाय विशेषहेतुतायाः आवश्यकत्वात् । अन्यथा विशेषणज्ञानस्यापि विशिष्टबुद्धिहेतुतायाः उच्छेदात् । अत एव विशिष्टवाक्यार्थविशेष्यकशब्दबोधे अवान्तरवाक्यार्थज्ञानापेक्षा । न च साध्य

[दी] अत्र च व्याप्तिस्मरणादिना पूर्वानुमित्सानाशे परामर्शकाले च सिद्धिसत्त्वेऽनुमित्सान्तरोत्पत्त्यैव अनुमितिः,

---

विशेष्यकानुमितौ तुल्यरूपयोरेव पक्षविधेयतावच्छेदकयोस्साध्यांशे प्रकारता, नत्वेकविशिष्टांशे अपरस्येति न विशिष्टज्ञानापेक्षेति वाच्यम्; निर्विशेष्यतावच्छेदकानुमितेरनुभवविरुद्धत्वात् प्रत्यक्षस्य च निर्धर्मितावच्छेदकस्याप्युपगमात्, प्राथमिकाभावप्रत्यक्षे प्रतियोग्यधिकरणयोरभावविशेषणतया भानोपपत्तिः । तथा च साध्यविशेष्यकानुमितिर्निर्युक्तिकैवेति वदन्ति ।

अथ जलत्वव्यापकीभूताभावप्रतियोगिपृथिवीत्ववती पृथिवीत्यादि परामर्शाद्भेदत्वादिरूपविशेषणज्ञानं विना स्वरूपतस्तत्पकारिकायाः पृथिव्यां जलभेद इत्याद्याकारिकाया अनुमितेरेव कथमुत्पत्तिरिति चेन्न; कथंचित्तत्र बलीयत्वादिमात्रपुरस्कारेणैवाभानानुमित्युपगमादिति कृतं पल्लवितेन ।

ननु सिषाधयिषाविरहविशिष्टसिद्धेरभावस्य पक्षतात्वेपि "सन्देहस्तत्परामर्शपूर्व" मित्यादिग्रन्थेन सिषाधयिषापक्षतापक्षोक्तस्य व्यभिचारस्य सिद्धिकालीनानुमितिस्थले तादवस्थ्यम्, सिषाधयिषानाशे विशिष्टप्रतिबन्धकस्वानुमित्यव्यवहितप्राक्क्षणे अक्षतत्वादित्याक्षेपे यज्ञपतिसमाधानमाह— अत्रचे ति । "व्याप्तिस्मरणादी" त्यादिना अनुमित्सादितीयक्षणे यत्र पक्षधर्मताज्ञानं तत्स्थलीयतादृशज्ञानपरिग्रहः । पूर्वे ति । व्याप्तिस्मरणादिपूर्वकालीनेत्यर्थः । परामर्शदशायामसत्यां सिद्धौ विशेष्याभावादेव विशिष्टाभावनिर्वाहेण नानुमित्युपपत्तिः, अतः "परामर्शकाले च सिद्धिसत्त्व" इति । अनुमित्सान्तरे ति । परामर्शद्वितीयक्षणे तदव्यवहितप्राक्क्षणेत्यादिः । तदुत्पत्तिप्रकारश्चाधस्ताद्दर्शितः । एवं च सिषाधयिषापक्षता पक्षः "सिषाधयिषाविरहेषी" त्यादिदोषादेव हेय इति भावः ।

[दी] तथैव कारणीभूतस्य विशिष्टाभावस्य सम्पत्तेरित्युपाध्यायाः । अन्ये तु द्वित्रिक्षणान्तरितायामप्यनुमित्सायां अनुमितिदर्शनात् अनुमित्सा योग्यता वाच्या, सा च न स्वोत्पत्त्यनन्तरं स्वविषयसिद्ध्यनुत्पादः,

---

ननु सर्वत्र पुनरनुमित्सोत्पत्तौ मानाभाव इत्यत आह-तथैवे ति । अनुमित्सान्तरोत्पत्त्यैवेत्यर्थः । कारणीभूतस्ये ति । तथा च तादृशविशिष्टाभावात्मककारणं विना अनुमित्यनुपपत्तेरेव सिद्धिस्थलीयविशिष्टाभावनिर्वाहकानुमित्सान्तरोत्पत्तौ मानमिति भावः । एतन्मत एव दीधितिकृतो निर्भरः, मिश्रादिमतस्य गौरवकवळितत्वादिति ध्येयम् ।

मिश्रमतमाह- अन्येत्वि ति । द्वित्रिक्षणान्तरितायामपी ति । द्वित्रिक्षणव्यवहितायां क्षणत्रयव्यवहितायांचेत्यर्थः । अनुमित्सायाम् - अनुमित्सोत्पत्तौ । तेनैकक्षणान्तरितायामप्यनुमित्सायां यत्रानुमितिस्तत्राप्यनुपपत्तिसत्त्वेन तदनभिधाने न्यूनता । एवं प्रथमकल्पे सिषाधयिषोत्पत्तिक्षणमारभ्य क्षणचतुष्टयात्मककालस्यैव विवक्षणीयतया त्रिक्षणान्तरितानुमित्सास्थले अनुमित्यनिर्वाहश्चेति दूषणद्वयानवकाशः । अनुमितिदर्शनात् - अनुमित्सोत्पत्तेश्चतुर्थक्षणे पञ्चमक्षणे वानुमितिदर्शनादित्यर्थः । वाच्या- सिषाधयिषावदेन विवक्षणीया । सा च- योग्यता च । स्वोत्पत्त्यनन्तर मिति । स्वप्रागभावोत्तरमित्यर्थः; स्वस्य उत्पत्तिर्यस्मादिति व्युत्पत्त्या स्वोत्पत्तिपदस्य सिषाधयिषाप्रागभावपरत्वात् । अन्यथा सिषाधयिषोत्पत्तिकाले योग्यतानुत्पत्त्या द्वितीयक्षणे अनुमितेरनिर्वाहात् । सिद्ध्यनुत्पादश्च सिद्धिप्रागभावः, तथा च स्वप्रागभावध्वंसविशिष्टस्वविषयसिद्धिप्रागभाव एवानुमित्सायोग्यतेति पर्यवसितम् । अनुमित्सापूर्वं तद्विषयीभूतसिद्ध्यनन्तरञ्चानुमितिवारणाय बळद्बोधादा नम । नचानागतानां यावदनुमितीनामेवानुमित्साविषयत्वसम्भवात्;

[दी] अनुमित्सोत्तरं अन्तरानुमित्यनुत्पादे दिवसादिविलम्बेनेन्द्रियादिना निर्णीतेपि साध्ये लिङ्गपरामर्शादिनानुमितिप्रसङ्गात् । किंत्वनुमित्सानन्तरं लिंगदर्शनादिक्रमेण यावता कालेनोत्सर्गतः परामर्शो जायते तावानेव कालः ।

स्वविषयीभूतैकानुमितावुत्पन्नायामपि भाविव्यक्त्यन्तरप्रागभावमादाय योग्यतायाः प्रसङ्ग इति वाच्यम्; स्वविषयसिद्धित्वावच्छिन्नप्रागभावस्य विवक्षितत्वात् । अत एव स्वविषये त्युक्तम् । यत्किञ्चिद्विशेषध्वंसवति काले सामान्यधर्मावच्छिन्नप्रागभावासम्भवेपि सिद्धित्वावच्छिन्नप्रागभावस्य कदाप्यसत्त्वात् । सामान्यधर्मस्य प्रागभावप्रतियोगितावच्छेदकत्वानङ्गीकारे पुनः स्वविषयसिद्ध्यसमानकालीनत्वमेव प्रागभावविशेषणं देयम् । बह्व्यनुमितिर्घटानुमितिश्च जायतामित्याद्यिच्छानन्तरं घटाद्यनुमित्यादिरूपविषयसिद्धावपि बह्व्यनुमित्युत्पत्त्या सिद्धौ सि प्रकृतसाध्यपक्षवैशिष्ट्यावगाहिनिश्चयार्थकम् । अनुमित्सोत्तरं दिवसादिविलम्बेनानुमितिप्रसङ्गा दित्यन्वयः । अन्तरानुमित्युत्पादे स्वविषयसिद्धित्वावच्छिन्नप्रागभावासत्त्वेन योग्यताक्षतेर्नाशसम्भव इत्यतः अन्तरानुमित्युत्पाद इति । द्वित्रिक्षणादिविलंबेनानुमितेरिष्टत्वात् दिवसादिविलम्बेने ति । सिद्ध्यसत्त्वे अनुमितेरिष्टत्वात् इन्द्रियादीना निर्णीत इति । लिंगेन निर्णीते साध्ये अनुमित्सा विषयसिद्ध्युत्पाद एवेत्यन्तरानुमित्युत्पाद एव न सम्भवतीत्यत इन्द्रियादिने ति । आदिना शब्दादिपरिग्रहः । अनुमित्सेति । अनुमित्सोत्पत्त्यधिकरणक्षणाव्यवहितोत्तरक्षणमारभ्य क्रमेण पक्षविषयकलिंगज्ञानव्याप्तिस्मरणयोरुत्पत्तौ सत्यां उत्सर्गतो यावता कालेन परामर्शोत्पत्तिः अनुमित्सोत्पत्तिक्षणमारभ्य तत्क्षणपर्यंतं यावन्तः क्षणाः यो वा तावदधिकक्षणानवस्थायिस्थूलकाल स्तत्समुदाय एव वेत्यर्थः । एवं च क्षणचतुष्टयं तद

[दी] फलबलेन तथा कल्पनात् ।

निक्षणानवस्थायिस्थूलसमयाश्च योग्यतेति पर्यवसितम् । तदनुगमश्च स्वप्रागभावानधिकरणत्व स्वनाशाधिकरण समयध्वंसाधिकरणसमयध्वंसा नधिकरणत्वोभयसम्बन्धेन विषायविषावत्कालत्वेन , नत्वननुगतेन तत्तत्का लत्वेन ; गौरवात् । तत्तत्कालोत्तेजकत्वापेक्षया तत्तत्सिद्धिव्यक्तिभेदा नामेव निवेशनौचित्यात् । योग्यताया उत्तेजकत्वकल्पेपि वक्ष्यमाणाया: पूर्वानुमित्साबलादनुमित्युत्तरमनुमित्यापत्तेरसाङ्गत्यापाताच्च । तत्रानुमिति क्षणस्योत्तेजकताकल्पनाभावादिति विभावनीयम् । अनुमित्सोत्तरं भत्र विल म्बेन लिङ्गदर्शनादिकं ततश्च परामर्शस्तत्रानुमित्सोत्पत्तिक्षणमारभ्य परा मर्शोत्पत्तिक्षणपर्यन्तावस्थायी दण्डादिरपीति तद्वारणाय लिङ्गदर्शनादेर नुमित्साक्षणाव्यवहितोत्तरक्षणोत्पत्तिकत्वमनुसृतम् । यत्रानुमित्सोत्पत्तिर्द्वितीय क्षणे पक्षालिङ्गव्याप्तिविषयकमेकस्मरणं तदनन्तरक्षणे परामर्शोत्पत्तिः तत्र क्षणत्रयमध्य एव परामर्शोत्पत्त्या तदनतिरिक्तकालमात्रस्य तथात्वभ्रम वारणाय क्रमेणे ति । अनुमित्सोत्पत्तिद्वितीयतृतीयक्षणयोर्लिङ्गदर्शन व्याप्तिस्मरणयोः क्रमेणोत्पत्तावपि कुतश्चित्प्रतिबन्धकाद्यत्र विलम्बेन परा मर्शोत्पत्तिस्तत्राधिकक्षणानामपि तथाविधत्वा तद्वारणायोत्सर्गत इति । तादृशव्याप्तिस्मरणानन्तरक्षणे परामर्शोत्पत्तावसति विरोधिनीत्यर्थः । अनु मित्सननुगुणक्षणव्यवधानविरहेण पञ्चमक्षणे अनुमितिरुत्पद्यते न तु तद प्रेपि, तथाविधक्षणव्यवधानादिरयेतत्सूचनाय भङ्ग्या तादृशकालविशेषो पादानमित्यवधेयम् ।

ननु तथाविधकालस्योत्तेजकत्वे गौरवमित्यत आह–फलबलेने ति। अनुमित्सानाशेपि अनुमित्यात्मककार्योत्पत्त्यनुरोधेनेत्यर्थः । तथा कल्पनात् तादृशकालस्योत्तेजकत्वकल्पनात् । यत्र तथाविधपरामर्शोत्पत्तिक्षणे

[दी] अथवानुमित्सोत्पत्त्यनन्तरं अनुमित्सानाशेपि सिद्धौ सत्यां यावत्का लमध्येऽनुमितिर्जायते तावानेव कालोऽनुमित्सयोपलक्षितः । यदि च सिद्ध्यनन्तरं तन्नाशे द्वित्रिक्षणमध्ये विनानुमित्सामनुमित्यनुत्पादो नुभवसिद्धः तदा सिद्ध्यापितावानेव कालः उपलक्षणीयः

अनुमितिप्रतिबन्धकबाधादिसमवधानमासीत् तदपगमश्च तद्द्वितीयक्षणे, तत्र सिद्धौ सत्यां तदनन्तरक्षेदनुमितिः प्रामाणिकी, एवं यत्रानुमित्साद्वितीयक्षणे लिंगदर्शनसामग्रीसमवधानं तदनन्तरं लिंगदर्शनादिक्रमेण परामर्शोत्पत्तिः तत्र सिद्धौ सत्यामनन्तरक्षणे अनुमितिर्वा तथा तदोत्पेक्षयाधिकस्य कालस्योत्तेजकत्वमावश्यकमित्याशयेनाह— अथवे ति । अनुमित्सोत्पत्त्यनन्तर मिति । अनुमित्सोत्पत्तिक्षणमारभ्य तदुत्तरमित्यर्थः । यावत्कालमध्ये अनुमितिर्जायते इत्यग्रेतनेनान्वयः । अनुमित्सोत्तरमनुमित्सान्तरोत्पत्त्या दिवसादिविलम्बेनापि सिद्ध्यनन्तरमनुमित्युत्पत्त्या यावत्कालस्यानुत्तेजकत्वात् । अनुमित्सानाशेपी ति । प्रागनुमित्साया मसत्वामित्यर्थः । असत्वां सिद्धावनुमित्सोत्तरं दिवसादिविलम्बेनाप्यनुमित्युदायत् सिद्धौसत्या मिति । प्रागित्यादिः । यावत्काल मध्ये- यावत्क्षणानन्तरक्षणे । तावानेव कालः- तावत्क्षणावच्छिन्नक्षणा नवस्थायी । अनुमित्सया – अनुमित्सार्थकसिषाधयिषापदेन । उपलक्षितः– विवक्षितः । अनुमित्साधीनतायां उत्तेजकत्ववत् तुल्य युक्त्या सिद्धिधीनतायां अपि प्रतिबन्धकत्वमुचितमित्याशयेनाह— यदि चेति । सिद्ध्यनन्तरं 'इवे' ति शेषः । तेन नात्र वैय र्थ्यम् । द्वित्रिक्षणमध्य इति । द्विक्षणमध्ये त्रिक्षणमध्यवर्त्यर्थः; सिद्धेश्चतुर्थक्षणे पञ्चमक्षणे वेति फलितम् । सिद्ध्या– सिद्ध्यर्थक पदेन । तावानेव— तन्नाशानन्तरमपि द्विक्षणस्थायी त्रिक्षणस्थायी वा । उपलक्षणीयः विवक्षणीयः ।

[दी] विशिष्य क्षणनियमस्तु अवहितैः करणीय इति वदन्ति ।

ननु सिद्ध्यत्तरं कियत्क्षणमध्ये अनुमितिर्न जायते कियत्क्षणानन्तरं वा जायत इत्यस्य विशिष्य निर्णेतुमशक्यतया कालस्य प्रतिबन्धकत्वकल्पनमसम्भवि; एवमुत्तेजककालस्यापि विशिष्य निर्णेतुमशक्यतया तदुत्तेजकत्वमपि तथेत्यत आह- विशिष्येति- अवहितैः- सावधानैः । नियमः- निर्णयः । तथा च येषां विशिष्य तावत्कालनिर्णयो भवति तेषामेव तत्र विशिष्य प्रतिबन्धकत्वोपगमो भविष्यति, अन्येषां तु सामान्यत एवेति भावः ।

केचित्तु- "ननु कालविशेषाणां सिद्धिसिषाधयिषाधिकरणकालत्वेन चेत् प्रतिबन्धकोत्तेजकभावः, तदा अधिककालस्यापि तथात्वप्रसङ्गः, अनतिप्रसक्तानुगतधर्मान्तरं च दुर्वचमेवेत्यत आह- विशिष्येति । अनतिप्रसक्तानुगतविशेषणविशेषं निवेश्येत्यर्थः । क्षणनियमः- कल्पितक्षणानामेव तथात्वं नत्वधिकक्षणानामिति नियमनिर्वाहः । अवहितैः- निरुक्तिकुशलैः । सिद्ध्यादुत्पत्तिक्षणमारभ्य क्षणचतुष्टयादेः स्वप्रागभावानधिकरणत्वस्वनाशाधिकरणसमयनाशाधिकरणसमयनाशानधिकरणत्वोभयसम्बन्धेन सिद्ध्यादिमत्त्वमेवानुमकमनतिप्रसक्तं चेति भावः" इति व्याचक्षते । वदन्तीत्यस्वरसमूचनाय; सचोक्तपरम्परायास्सम्बन्धत्वे मानाभावात्, तद्व्यक्तित्वेनोत्तेजकत्वाभ्युपगमे उक्तदोषापातादिति ।

इच्छाया विषयसिद्धौ सत्यां चरितार्थतया नोत्तरकालमनुमितिर्जायत इति तद्वारणाय स्वविषयसिद्ध्यनुपहितत्वेनेच्छाविशेषणीया, तस्य तद्विषयसिद्धिदशायां परामर्शानुगितत्सासम्बधानसम्भव एव तद्विशेषणमर्थवद्भवति, तच्च आपाततो न घटते, इच्छापरामर्शयोर्युगपदुत्पादासम्भवेनानुमितिकाले एकतरविनाशावश्यकत्वादित्यत एतत् घटयति—

[दी] अत्र च साध्यनिर्णयेच्छानन्तरं पूर्वोक्तन्यायेन साध्यतद्व्याप्य विशिष्टपक्षप्रत्यक्षं स्मरणंवा यत्र साध्यतद्व्याप्यधर्मतादृशध्याप्य धर्मान्तरविशिपक्षष्टस्य तत्पक्षकतत्साध्यतद्व्याप्यवत्तानुमित्योरिष्टसा धनतायाश्चैकंस्मरणं ततस्तयोरनुमित्सा ततः साध्यतद्व्याप्यवत्ता

अत्र चे ति । सिद्धिप्रतिबन्धकतावच्छेदककोटौ चेत्यर्थः । " तदिच्छा विषयसिद्धयनुपहितत्वं तद्विशेषण" मित्यग्रिमेणान्वयः । निर्णयेच्छा-निर्णयत्वप्रकारकेच्छा; अनुमितित्वप्रकारकेच्छायाः प्रत्यक्षात्मकसिद्धया अचरितार्थतया तद्बलात्तादृक्षसिद्धयुत्तरमप्यनुमित्युत्पत्तेः प्रकृतानुपयोगात् । अनुमित्सोत्पत्तिकाले विशेषणज्ञानोत्पत्त्यसम्भवेन तत्पूर्वमेव तद्घटितविशिष्ट प्रत्यक्षसामग्रीसमवधानस्य वाच्यतया बलवत्त्वेन प्रत्यक्षसामग्र्या इच्छोत्पत्ति रेव न सम्भवतीत्यतः पूर्वोक्तन्याये नेति । अनुमित्सापूर्वकालोत्पन्नेत्यादिप्रका रेणेत्यर्थः । स्मरणे विशेषणज्ञानापेक्षाविरहादुक्तप्रयासं विनैव इच्छा द्वितीय क्षणे विशिष्टपक्षस्मरणं निर्वहतीत्यभिसन्धायाह- स्मरणंवे ति । अनुमिति त्वप्रकारकेच्छायामपि तद्विशेषणोपादानस्य प्रयोजनमाह- यत्र वे ति । साध्यव्याप्यविशिष्टपक्षस्मरणानन्तर मनुमितिरेव भविष्यति नत्विच्छे त्यतोऽनुमितिसामग्रीविघटनाय तथाविधस्मरणस्य साध्यविशिष्टपक्षविष यकत्वानुधावनम् । तृतीयक्षणे साध्यस्य तद्व्याप्यस्य चानुमितेः द्वितीय क्षणे साध्यतद्व्याप्यधीरनुमित्साया श्च निर्वाहाय साध्यव्याप्यतद्व्याप्यविशिष्ट पक्षतदुभयानुमितिनिष्ठेष्टसाधनताविषयकत्वानुधावनम् । साध्यानुमिते स्तदनन्तरं पुनस्तदनुमित्यापत्तेश्च सम्पादनाय साध्यानुमित्सा या स्साध्यव्याप्यस्यापि निश्चिततया तदनुमितेस्सम्पादनाय च साध्य व्याप्यानुमित्साधारत्वस्तयोरित्यादिनाऽनुसरणम् । अनुमित्साद्वितीयक्षणे साध्यस्यानानुमितौ तदनन्तरं तदनुमितिरिष्टैव; साध्यव्याप्यस्याऽननु

[दी] नुमितिः तत्र तदनन्तरमनुमितिप्रसंगः योग्यताविवक्षणे च सुतरा मेवेति तदिच्छाविषयसिद्धयनुपहितत्वं तद्विशेषणम् ।

मितौ च परामर्शाभावाच्चापत्तिसम्भव इत्यत स्तदनन्तरमुभयानुमित्यनुपपत्ति नम् । अनुमित्सोत्पत्तिक्षणावधिकक्षणचतुष्टयादिरूपमोग्यत्वात्मा उत्तेजकत्व मते यत्र पर्वते वह्निमनुमिनुयामितीच्छा ततो वह्निव्याप्यवान् पर्वत इति परामर्श स्तदनन्तरं च पर्वतो वह्निमानित्यनुमिति स्तत्रापि बाहशा नुमित्यापत्ति स्तम्भवतीत्याह—योग्यते ति । तदिच्छाविषयसिद्धयनु पहितत्वं तदिच्छायां विशेषणं देयमिति शेषः । प्रत्यक्षाद्यात्मकसिद्धि समवहितानुमितित्व प्रत्यक्षान्यज्ञानत्वादि प्रकारकेच्छानाकादनुमित्युत्प-त्त्या तादिच्छा विषये ति सिद्धिविशेषणम् । विशेष्यतया अभिमता या इच्छा तद्विषयेत्यर्थः ।

अथ तादृशेच्छाया उत्तेजकीभूतसकलेच्छासाधारणेनानुमितिगोच रेच्छात्वेन निवेशे प्रत्यक्षाद्यात्मकसिद्धेरपि निर्णयत्वादिप्रकारकानुमित्सा विषयतया विषयान्तरस्यान्यावर्तकताप्रसङ्गः, तत्तव्यक्तित्वेन निवेशेचाते जकीभूतेच्छाव्यक्तिसमसंख्याकाभावानां सिद्धौ विशेषणतया महागौर वम् , तत्तद्विच्छाविषयसिद्धयनुपहिततत्तदिच्छात्वेनोत्तेजकतामपेक्ष्य लाघ वात्तत्तत्प्रकारावच्छिन्नेच्छात्वेन तथात्वकल्पनाप्रसङ्गश्चेति चेन्न, प्रागुक्तयु क्त्या इच्छादिविषयतावच्छेदकतायाः प्रकृतसाध्यविशिष्टप्रकृतपक्षविषयका नुमितित्वादिपर्याप्तिनिवेशस्यावश्यकतया इच्छाविषयतावच्छेदकतापर्याप्त्य धिकरणरूपभेदनेच्छायाः पृथक्पृथगुत्तेजकताया आवश्यकत्वात्तत्तद्धर्मप्रका रकेच्छायां तत्तद्धर्मावच्छिन्नानुपहितत्वं निवेशनीयमित्यत्रैव तात्पर्यात् ; अत एवानुमितिद्वयं जायतामित्येतादृशेच्छावशात्क्रमिकानुमितिद्वयमप्युप पद्यते; एकानुमित्युपधानदशायामपि द्वित्वावच्छिन्नानुपहितत्वस्याक्षतत्वात् ।

[दी]पक्षसाध्यभेदेन च पक्षतायाः भेदात्पृथक्पृथगेव कार्यकारणभावः। तथाच यत्र सिद्ध्यनन्तरं कदाप्यनुमितिर्न जाता तत्रसिद्ध्यभावमात्रं कारणं

अथ वा स्वविषयकत्वस्वसामानाधिकरण्योभयसम्बन्धेन प्रकृतपक्षधर्मिकप्रकृतसाध्यप्रकारकनिश्चयविशिष्टान्यत्वमेवानुपहितत्वान्तार्थः । भेदस्याव्याप्यवृत्तितया अनुमितिदशायामिच्छाया स्सिद्धिविशिष्टत्वेपि तत्पूर्वं विशिष्टान्यत्वमव्याहतम् । प्रकृतपक्षकप्रकृतसाध्यकानुमितिविषयकसमूहालम्बनेच्छायां यत्रान्यपक्षकानुमितेरन्यसाध्यकानुमितेर्वा विषयता तत्र तद्बलादन्यानुमित्यनन्तरं प्रकृतानुमितिनिर्वाहाय प्रकृतपक्षकप्रकृतसाध्यावगाहित्वं निश्चयविशेषणम् । एवद्विशेषणमनन्तर्भाव्य द्वित्वादिप्रकारकेच्छायाः पृथग्गुत्तेजकत्वांगीकाराच्चादृशेच्छाबलादनुमित्यनन्तरमनुमित्युपपत्तिः । द्वित्वप्रकारकेच्छाबलाच्च नानुमितिद्वयानन्तरमनुमित्यन्तरम्, तावत्पर्यन्तमनुमित्याय एवानवस्थानात् । योग्यताया उत्तेजकत्वमते च द्वित्वादिप्रकारकेच्छायोग्यतायां द्वित्वावच्छिन्नानुपहितत्वेनैव पृथग्गुत्तेजकता वाच्येति कृतं विस्तरेण ।

नन्विच्छाया इच्छाघटितनिरुक्तयोग्यतायाश्च अभावेन विशिष्टायास्सिद्धेरभावस्य पक्षतात्वे यत्साध्यकयत्पक्षकस्थले कदाचिदपि कस्यचिदिच्छा न जाता तत्र पक्षत्वाप्रसिद्धिरित्याशङ्कायां विश्वविषयिणीं भगवदिच्छामादाय केषांचित्समाधानमाक्षेप्तुं तादृशस्थले इच्छाविरहाविशेषितसिद्ध्यभावएव पक्षतेति समाधत्ते— पक्षसाध्ये ति । पक्षतावच्छेदकसाध्यतावच्छेदकादिभेदेनेत्यर्थः । पक्षताभेदा दिति । सिद्धि पदार्थस्य प्रकृतपक्षतावच्छेदकादिघटितत्वादिति भावः । यत्रे ति । यादृशपक्षकयादृशसाध्यकस्थल इत्यर्थः । सिद्ध्यनन्तरं कदाप्यनुमितिर्न जाते ति । सिद्धिकाले परामर्शादिसत्त्वे अनुमित्तायाः असम्भवधानादिति भावः । सिद्ध्यभावमात्र मिति । इच्छाभावविशेषितायाः

[दी]नतु तत्रेच्छाज्ञानवेशोपि गौरवात्प्रयोजनाभावाच्च । तेन यत्पक्षक यत्साध्यकानुमितौ कस्यापीच्छा न जाता तत्रोक्तिसाधारण्यमात्र सम्पादनायेश्वरेच्छानिवेशनायासो नोपादेयः । यत्तु सिषाधयिषा

एव सिद्धेरभाव इत्यर्थः । सिद्धिकालीनानुमित्यनुरोधेनैव विशिष्टसिद्ध्यभावस्य पक्षतात्वोपगमादिति भावः । तेने ति । यत्रानुमित्सोत्पत्तिरप्रसिद्धा, प्रसिद्धापि वा नानुमित्स्युत्पादोपयोगिनी, तत्र विशिष्टाभावस्य पक्षतात्वस्वीकारे प्रयोजनविरहेणेत्यर्थः । उक्तिसाधारण्ये ति । सर्वत्रैव पक्षतायां सिषाधयिषाविरहविशिष्टसिद्ध्यभावपदार्थत्वसम्पादनायेत्यर्थः । नोपादेय इति । शब्दैकगम्यस्यानुपादेयतया करणतावच्छेदकगौरवग्राह्यणुतायां अन्याय्यत्वादिति भावः ।

परामर्शपूर्वकालोत्पन्नानुमित्सानाशे अनुमित्सान्तरमकल्पयित्वा योग्यतावच्छेदकत्वमनादृत्यानुमितिमुपपादयतस्सर्वभौमस्य मतमाह— यत्त्वि ति । सिषाधयिषानाशे सति यादृशसिद्ध्यनन्तरमनुमिति स्तस्या सिषाधयिषाविरहविशिष्टो यः स्वक्षणस्तदव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकतया भिन्नान्तरनिवेशात्तदप्रतिबन्धकत्वोपपत्तिः (?) इच्छाविरहविशिष्टस्वक्षणाव्यवहितत्वोत्तरत्वनिवेशे ज्ञानेच्छयोर्युगपदुत्पादमते यत्रानुमित्सा तृतीयक्षणे घटेच्छासिद्ध्यात्मकपरामर्शौ तदुत्तरं चानुमितिस्तत्र तादृश सिद्धेरिच्छाविरहविशिष्टस्वाधिकरणाप्रसिद्ध्या इच्छाविरहविशिष्टस्वाधिकरणक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नैव सा सिद्धिः, अनुमित्सा विरहविशिष्टतदभावस्य परामर्शेक्षणेऽसत्त्वात् तदुत्तरमनुमित्यनुपपत्तिरत सिषाधयिषापर्यन्तानुधावनम् । अथ वा इच्छासामान्यनिवेशे यत्र घटेच्छानन्तरक्षणे सिद्ध्यात्मकपरामर्शस्तदनन्तरक्षणे सिद्धावप्रामाण्यग्रह स्तदनन्तरमनुमितिः, सिद्धेरप्रामाण्यज्ञानानास्कन्दितायां एवानुमितिप्रति

नन्धकत्वात्तत्र तादृशानुमित्युत्पत्तिक्षणस्येच्छाविरहविशिष्टसिद्धिद्वितीयक्षणाव्यवहितोत्तरतया सिद्धेस्स्वपदेनोपादानसम्भवेनाविरोधितयाऽप्रामाण्यग्रहकाले अनुमिति वारणाय सिषाधयिषापदम् । तथासत्यनुमित्युत्पादक्षणस्य सिषाधयिषाविरहविशिष्टसिद्ध्युत्पादक्षणाव्यवहितत्वान्नापत्तिः । ज्ञानेच्छा यौगपद्यानभ्युपगमेपि यत्रानुमित्साद्वितीयक्षणे सिद्ध्यात्मकपरामर्शस्तदनन्तरं घटेच्छा तत्र तादृशसिद्ध्यधिकरणस्य कस्यापि क्षणस्येच्छाविरहविशिष्टत्वाभावात् स्वपदेनोपादातुमशक्यतया सिषाधयिषाविरहविशिष्टतद्भावो नानुमित्यव्यवहितपूर्वक्षण इति तत्रानुमितिनिर्वाहायेच्छासामान्योपेक्षणामिति तु न साधीयः; घटेच्छोत्पत्तिपूर्वमनुमिति सामग्रीसत्त्वेन अनुमित्यनुत्पादबीजस्य दुर्घटत्वात् । नचानुमित्सापूर्वकालोत्पन्नापेक्षाबुद्ध्यात्मकबाधादिवशात तदानमिनुमित्यनुत्पादसम्भवः, अपेक्षाबुद्ध्यनन्तरक्षणे विशेषगुणान्तरानुत्पत्तावेव तस्याः क्षणत्रयावस्थानसम्भवात् ।

यत्तु यत्रानुमित्सानन्तरं घटेच्छा तदनन्तरं सिद्ध्यात्मकपरामर्शस्तदनन्तरं चानुमिति स्तत्रानुमित्युत्पादक्षणो नेच्छाविरहविशिष्टतत्सिद्ध्यधिकरणक्षणाव्यवहितोत्तरक्षण इति तादृशसिद्धेस्तदनुमित्यप्रतिबन्धकत्वनिर्वाहाय सिषाधयिषापर्यन्तानुधावनमिति; तदप्यसत् ; इच्छाविरहविशिष्टस्वक्षणाव्यवहितोत्तरत्वशरीरे अव्यवधानप्रतियोगिस्वक्षण एव इच्छाविरहविशिष्टत्वनिवेशस्य प्रयोजनवत्तया उत्तरत्वप्रतियोगिनि स्वक्षणे तद्विशिष्टत्वस्यानिवेशनीयतया उक्तानुमित्युत्पत्तिक्षणस्य इच्छाविरहविशिष्टतत्सिद्ध्यधिकरणक्षणाव्यवहिततया तादृशसिध्युत्पादक्षणोत्तरतया च तादृशसिद्धेरिच्छाविरहविशिष्टस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकतया अनुमित्यनिर्वाहविरहात् । सिषाधयिषाविरहविशिष्टत्वं स्वक्षणस्य स्वाधिकरणदेशावच्छेदेन बोध्यम् । तेन सिषाधयिषावतोपि कालस्य सिषाधयिषानधिकरणदेशावच्छेदेन सिषाधयिषाविरहविशिष्टत्वाद् यत्र क्रमेण

सिषाधयिषासिद्धिपरामर्शानुमितयः तत्र सिषाधयिषाविरहविशिष्टत्वनिवेशेषणेनोपधाद्यस्य अनुमित्यत्पत्तिक्षणनिष्ठाव्यवधानस्यैवानुपपत्तितादवस्थ्यमिति निरस्तम् । प्रतियोगिवैयधिकरण्यस्याभावविशेषणतासामान्यात् सिषाधयिषाधिकरणक्षणवारणं पुनरनुपादेयम् । प्रतियोगिपदेन सिषाधयिषाविरहप्रतियोगिन एव विशिष्यावश्यं विवक्षणीयतया सिषाधयिषायाः सिषाधयिषात्वेन निवेशनमुपेक्ष्य सिषाधयिषाविरहप्रतियोगित्वेन निवेशस्य शिरोवेष्टनेन नासिकास्पर्शनतुल्यत्वात् । सिषाधयिषानधिकरणत्वनिवेशने च सिषाधयिषाविरहांशवैयर्थ्यात् । वक्ष्यमाणत्वनिवेशनव्यावृत्त्यसङ्ग्रहेश्च सर्वेषामेव क्षणानां सिषाधयिषाविरहविशिष्टपूर्वपूर्वक्षणध्वंसाधिकरणक्षणध्वंसाधिकरणतया तादृशध्वंसानधिकरणत्वरूपाव्यवहितत्वाश्रयक्षणाप्रसिद्धिः, अतः सिषाधयिषाविरहविशिष्टक्षणे स्वाधिकरणत्वनिवेशः । स्वपदं भेदप्रतियोगित्वसिद्धिव्यक्तिपरम् । सिद्धिसामान्यं परत्वे सर्वेषामेव क्षणानां पूर्वपूर्वसिद्ध्यधिकरणकालध्वंसाधिकरणकालध्वंसाधिकरणतया पूर्ववदप्रसिद्ध्यापत्तेः । प्रथमविशिष्टान्तस्य व्यावृत्तिस्थले सिषाधयिषापूर्वभाविनः कस्यचित् स्थूलकालस्य परामर्शोत्पत्तिकाल विनाशे पूर्वकालावच्छेदेन सिषाधयिषाविरहविशिष्टसिद्ध्यधिकरणतादृशकालध्वंसाधिकरणपरामर्शोत्पत्तिक्षणध्वंसाधिकरणस्यानुमित्युत्पत्तिक्षणस्य सिषाधयिषाविरहविशिष्टसिद्ध्यधिकरणकालाव्यवहितोत्तरत्वानुपपत्तेः, अतः कालपदमुपेक्ष्य क्षणपदोपादानम् । न च सिषाधयिषाविरहविशिष्टस्वनिरूपिताधिकरणत्वनिवेशे उक्तस्थूलकालस्य विभिन्नक्षणावच्छेदेन सिषाधयिषाविरहसिध्युभयाधिकरणत्वेपि सर्वदैव विशेष्याभावविशेषणाभावान्यतरप्रयुक्तविशिष्टाभाववत्तया विशिष्टाधिकरणत्वासम्भवात् क्षणत्वनिवेशनन्तरमेव व्यावृत्तिस्सम्भवतीति वाच्यम् ; सिषाधयिषापूर्वक्षणादेः सिद्धिक्षणादेश्च प्रत्येकं विशिष्टाभावावच्छेदकत्वेपि तदुभयानुगमकान्यसत्त्वावच्छिन्नस्य एकक्षणावच्छिन्नत्वाविशेषितसामानाधिकरण्यसम्बन्धेन

सिषाधयिषाविरहविशिष्टायाः सिद्धेराधिकरण्यावच्छेदकत्वे बाधकाभावात् एकरूपावच्छिन्नस्यैव विरुद्धोभयावच्छेदकत्वे विरोधात्; अन्यथा तत्काले एकतराभावप्रयुक्तस्य सिषाधयिषाविरहसिध्युभयाभावस्य सर्वक्षणावच्छेदेनैव सत्त्वे विरोधेन तदुभयत्वावच्छिन्नाया अधिकरणतायाः अनिर्वाहात् तत्र तदुभयवत्ताप्रतीतेरप्यनुपपत्तेः । एवं चैकक्षणावच्छिन्नसामानाधिकरण्यसम्बन्धेन एकविशिष्टापराधिकरणत्वमेवोक्तस्थूलकाले न सम्भवति, तस्यैकक्षणावच्छिन्नोभयाधिकरणत्वनियतत्वात् क्षणघटित तादृशसम्बन्धनिवेशापेक्षया च स्वाधिकरणे क्षणत्वनिवेश एवोचितः ।

वस्तुतस्तु– केवलसामानाधिकरण्यसम्बन्धेनैकविशिष्टापराभावो यदा कदाचिद्विशेषणवति विशेष्याभावादेव न तु विशेषणाभावात्, तथा च सिषाधयिषाविरहवत्यपि स्थूलकाले सिषाधयिषासिध्युभयसत्त्वक्षणे न सिषाधयिषाविरहरूपविशेषणाभावात्तद्विशिष्टसिद्धेरभाव इति तादृशकालस्य विशिष्टाधिकरणत्वं निराबाधमेव । एतेन सिषाधयिषापूर्वक्षणस्य सिद्धेरनधिकरणत्वेन स्वानधिकरणकालस्य देशे व्यापकत्वेन स्वावृत्तित्वावच्छेदकत्वेन स्थूलकाले सिषाधयिषाविरहविशिष्टसिद्धिवृत्तौ नावच्छेदकत्वमिति तत्साधारणरूपावच्छिन्नस्य विशिष्टसिद्ध्यधिकरणत्वावच्छेदकत्वासम्भवेपि न क्षतिः । न च सिद्ध्यधिकरणस्य स्थूलकाले सिद्धिवृत्तौ नावच्छेदकतासम्भवः, देशे वृत्तौ कालत्वेव काले वृत्तौ अवान्तरकालत्वापि स्वाधिकरणीभूतस्यैवावच्छेदकत्वात्; तथा च विशेष्यीभूतसिद्धेरनवच्छेदकत्वं विशिष्टसिद्धेरनवच्छेदकतया तत्साधारणरूपावच्छेदेन विशिष्टाधिकरणतावच्छेदकत्वं न सम्भवतीति वाच्यम्; एवं सति सिषाधयिषावच्छेदेनोभयवति काले उभयत्वविशिष्टवत्तायाः अपि दुर्घटतापत्तेः । प्रत्येकाधिकरणक्षणस्य तदुभयत्वविशिष्टानधिकरणत्वेन उभयत्वविशिष्टा

वच्छेदकत्वासम्भवात् प्रत्येकाधिकरणक्षणयोरनुगतरूपेणावच्छेदकत्वानुप पत्तेः । नह्येकरूपावच्छिन्नस्याधिकरणं रूपान्तरावच्छिन्नस्य तस्यानधि करणमप्यवच्छेदकं भवितुमर्हति, दण्डाद्यनधिकरणपुरुषाद्यधिकरणदिवच्छ वच्छेदेन मालादौ दण्डविशिष्टपुरुषत्वाद्यवच्छिन्नस्यावृत्तित्वात् । यदि चागत्या उभयत्वविशिष्टानधिकरणयोरपि प्रत्येकाधिकरणक्षणयोरनुगत रूपेणोभयत्वविशिष्टाधिकरणत्वमुदेयते, तदोक्तस्थले सिषाधयिषाविरहक्षण सिद्धिक्षणोभयान्यतरावच्छेदेन सिषाधयिषाविरहसिद्ध्युभयाधिकरणतावत स्थूलकालस्य तदवच्छेदेन सिषाधयिषाविरहविशिष्टसिद्ध्यधिकरणत्वस म भवादनेन, उभयत्वविशिष्टाधिकरणत्वस्यैव लाघवेन एकविशिष्टापरा धिकरणतारूपत्वोपगमात् । अत्र विशिष्टसामानावच्छेदेनोभयाधिकरणे विशे ष्यमात्रसत्त्व एव न केवलसामानाधिकरण्यसम्बन्धेन एकविशिष्टापरामर्श, अपि तु एकक्षणावच्छिन्नसामानाधिकरण्यसम्बन्धेन एकविशिष्टापरामर्श एव, अत एवैकक्षणावच्छिन्नैकात्मवृत्तित्वं सिषाधयिषाभावस्य सिद्धौ विशिष्टसत्त्वनिरुक्तिदीधितिकारोक्तिरपि सङ्गच्छते, एकक्षणावच्छिन्नत्व निवेशेनैव सिषाधयिषाकाले सिद्धिसत्त्वे सिषाधयिषाभावविशिष्टसिद्ध्य निर्वाहात् । नचैवं विशिष्टसामानाधिकरण्यानतिरिक्तसामानाधिकरण्यसम्बन्धेन एकविशिष्टापराभावस्य विशेषणाभावसत्त्वेऽप्यसत्त्वादसौ विशेष्याभाव एव वाच्यः, तथा च तादृशसम्बन्धेन रूपादिविशिष्ट द्रव्यत्वाद्यभावः पवनादौ सामानाधिकरण्येन, विशेष्याभावासत्त्वादिति वाच्यम् ; तादृशद्रव्यत्वाद्यभावस्यानतिरिक्तत्वेऽपि तस्य रूपादिमद्विशिष्टद्रव्यत्वाद्यनधि करणत्वाभावरूपत्वाद्या एवोपगमेन नीरूपद्रव्यादौ तत्सत्त्वनिर्वाहात् ; एवं चोक्तस्थूलकाले केवलसामानाधिकरण्यसम्बन्धेन सिषाधयिषाविरहविशिष्ट सिद्ध्यभावासत्त्वाद्विशिष्टसिद्धिसत्त्वमवाहसमेव, एकक्षणावच्छिन्नसामाना धिकरण्यसम्बन्धेन विशिष्टस्याधिकरणत्वनिवेशापेक्षया च सिषाधयिषा विरहविशिष्टसिद्ध्यधिकरणकाले क्षणत्वनिवेशनमेव लघ्वभासते ।

यद्यपि साधयिषाविरहवैशिष्ट्यावच्छेदेन स्वाधिकरणत्वनिवेशेपि सादृशकाले कालान्तरीणसिषाधयिषाविरहवैशिष्ट्यस्य तन्निष्ठसिद्ध्यधिकरणतावच्छेदकत्वात् तादृशकालमादायोक्तदूषणानवकाशः, तथापि सिषाधयिषाविरहवैशिष्ट्योपलक्षिते सिद्ध्यधिकरणत्वनिवेशाभिप्रायेण क्षणपदोपादानम् । यद्यपि क्रियादिरूपतादृशस्थूलकालस्याप्यनन्यक्षणावच्छिन्नस्य क्षणतया क्षणत्वनिवेशनेपि तद्दोषतादवस्थ्यम्; तथापि स्वध्वंसाधिकरणयावद्ध्वंसविशिष्टत्वरूपक्षणत्वावच्छेदेन सिषाधयिषाविरहविशिष्टत्वनिवेशान्न दोषः । सिषाधयिषाविरहविशिष्टक्षणे स्वाधिकरणत्वमवश्यं सिषाधयिषाविरहवैशिष्ट्यावच्छिन्नं तादृशस्थूलकाले स्वाधिकरणत्वस्य च न तदवच्छिन्नत्वनियम इति सिषाधयिषाविरहवैशिष्ट्यावच्छेदेन स्वाधिकरणत्वलाभायैव क्षणपदोपादानम्, न तु क्षणत्वमपि निविष्टमिति तु तत्त्वम् । अव्यवहितोत्तरक्षणोत्पत्तिः स्वाधिकरणावच्छेदेन बोध्या; अनुमितिपदं वा स्वसमानाधिकरणानुमितिपरम् । तेन महाप्रलयानभ्युपगमे सकलसिद्धीनामुत्तरमेवावस्थानामात्मनां कस्मिंश्चिदवश्यमनुमित्युत्पत्त्या सिषाधयिषाविरहविशिष्टतादृशस्वक्षणानन्तरक्षणोत्पन्नानुमितिकाभिन्ना, सिषाधयिषाद्वयोत्पत्तिमध्यक्षणोत्पन्ना ईश्वरीया च सिद्धिरेव । सिषाधयिषाविरहविशिष्टतदधिकरणक्षणाप्रसिद्ध्या स्वपदेन तस्या एवोपादानमुचितत्वात्तस्याश्च सिद्धेरिच्छाविरहविशिष्टत्वाभावात्सिषाधयिषाविरहविशिष्टनिरुक्तसिद्धिभिन्नासिद्धेरप्राप्तिः । महाप्रलयस्य प्रामाणिकत्वेपि यदुत्तरमनुमितिः क्वचिदपि नोत्पत्स्यते; तादृशाश्चरमसिद्धेरेव प्रतिबन्धकत्वं स्यान्नान्यस्या इत्यनुपपत्तेर्नावकाशः । अव्यवधानांशनिवेशेन प्रतिबन्धकसिद्धिनाशोत्तरं तदधिकरणे अनुमित्युत्पत्तावपि न तस्याः प्रतिबन्धकत्वानुपपत्तिः । स्वपूर्वसकलक्षणानामेव स्वाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसानधिकरणस्वरूपस्वक्षणाव्यवहितत्वाक्रान्तत्वाऽनादौ संसारे सर्वासामेव सि

[दी] विरहविशिष्टस्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्ना वा

द्धीनां पूर्वं कदाचित्स्वाधिकरणे अनुमित्युत्पत्त्या सिषाधयिषयोरन्तरोत्प
त्ता सिद्धिरेव सिषाधयिषाविरहविशिष्टस्वक्षणाव्यवहितक्षणोत्पन्नानुमितिक
भिन्ना, तस्याः सिषाधयिषाविरहविशिष्टत्वाभावादप्रसिद्धिः अत उक्तरे ति ।
स्वाधिकरणक्षणध्वंसाधिकरणार्थकं सकलसिद्धीनामेव स्वक्षणाव्यवहितोत्तर
त्वाक्रान्तस्वतृतीयक्षणविनष्टानुमित्युत्पत्तिपर्यन्तस्वपूर्वस्थायिस्थूलकालोत्पन्ना-
नुमितिकतया पूर्ववदप्रसिद्धिरत्रो द्वितीयक्षण पदम् । अनुमित्यात्मकसि
द्धीनां स्वान्यव्यवहितोत्तरक्षणवृत्तिस्वात्मकानुमितिकतया अप्रतिबन्धकत्वा
पत्तिः, अत उत्पत्ति निवेशः ।

यद्यपि स्वान्यत्वस्यानुमितिविशेषणत्वेप्येतद्दोषवारणासम्भवः ;
तथाप्यपेक्षानुद्बेः क्षणत्रयावस्थायित्वस्य तदुत्तरं समानाधिकरणविशेष
गुणान्तरोत्पादस्य चोपगमे यत्रापेक्षाबुद्ध्यात्मकानुमितिद्वितीयक्षणे तादृ
शी प्रत्यक्षादिरूपा सिद्धिस्तत्प्राक्षणतुर्यक्षणे अनुमित्युत्पादवारकं तत्प्रतिबन्ध
कत्वं नोपपद्यतेति गुरुशरीराया उत्पत्तेर्निवेशनम् । अथानुमित्यव्यवहित
प्राक्क्षणवृत्तिसिद्धिभिन्नत्वं निरुक्तक्षणोत्पत्तिकानुमितिकासिद्धिभिन्नत्वापेक्षया
लघीयः कथमुपेक्षितमिति चेत् ? तथा सति यत्र क्रमेण सिद्धिसिषाध
यिषानुमितयः ; तत्रेच्छाजनकसामग्र्या अनुमितिप्रतिबन्धकत्वेनैव इच्छो
त्पत्तिक्षणेऽनुमितिवारणसम्भवात् अव्यवहितपूर्वक्षणघटकानुमित्युत्पत्तिक्षणे
तदव्यवहितप्राक्क्षणे वा सिषाधयिषाविरहविशिष्टत्वस्य तद्वारणानुरोधेन
निवेशवैयर्थ्यात्तादृशस्खलीयसिद्धेस्तृतीयक्षणेऽनुमित्युत्पत्त्यविरोधिताया: सि
द्धौ सिषाधयिषाविरहवैशिष्ट्यनिवेशनमन्तरेणैवोपपत्तेः मूलोपात्तं सिद्धि
विशेषणं सहकृतान्तं निष्प्रयोजनं स्यादिति मूलविरोधः । तथाचेच्छा
जनकसामग्र्या अनुमितिप्रतिबन्धकत्वमेवेति मूलविरोधोपपादनाय कृत

[दी] सिद्धिः; सिषाधयिषाविरहविशिष्टाभावस्तस्या अभावः पक्षता। अथ तृतीयक्षणव्यवधायकद्वितीयक्षण एवान्यसहितत्वपर्यवसानात्रा विरलकमेण सिद्धिसिषाधयिषानुमितयस्तत्र द्वितीयक्षणे पक्षता सम्पत्तये द्वितीयः सिषाधयिषाविरहो विशेषणमस्तु सिद्धेः; प्राथमिकस्तु स्वक्षणस्य किमर्थमिति चेत्? यत्र

गुरुशरीरादरः। अत्र कल्पे वक्ष्यमाणानुपपत्तिं तृतीयक्षणसाधारणान्यक्षणद्वितीयत्वं निवेश्योद्धर्तुकामस्त्वगत्या इच्छासामग्र्या अनुमित्यप्रतिबन्धकत्वमङ्गीकृत्यैव मूलोक्तं सहकृलान्तं सार्धकयिष्यतीत्यवधेयम्। अनुमितेर्व्यवहितपूर्वोत्पन्नस्यान्यव्यवहितपूर्वस्थायिनो घटज्ञानादेरविरोधिनो ग्रहणे सिद्धिपदम्।

अवगतद्वितीयसिषाधयिषाविरहविशेषणप्रयोजनः तत्र सम्प्रतिपत्तिं प्रदर्शयन् प्रथमसिषाधयिषाविरहविशेषणप्रयोजनं पृच्छति अथेति। तृतीयक्षणे स्वाधिकरणकालध्वंसाधिकरणकालध्वंसाधिकरणत्वसामान्याभावरूपान्यवधानाभावस्फुटीकरणाय तृतीयक्षणव्यवधायकत्वं द्वितीयक्षणस्याभिहितम्; तृतीयक्षणव्यवधायकत्वं तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वे सति स्वाधिकरणक्षणध्वंसाधिकरणत्वम्, सिद्धिनाशक्षणे सिषाधयिषोत्पत्तौ सिद्धयुत्तरसिषाधयिषानाशक्षणेऽनुमित्युत्पत्तौ वा विशेष्याभावादेवानुमितिपूर्वं पक्षता निर्वहति अतो ऽविरले ति। पक्षतासम्पत्तय इति। सिद्धौ सिषाधयिषाविरहस्याविशेषणत्वे उक्तस्थले सिद्धिद्वितीयक्षणे अनुमित्यनुत्पत्त्या तस्याः स्वक्षणान्यव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नत्वेन सिषाधयिषोत्पत्तिक्षणेऽपि च तादृशसिद्धिसत्त्वेन तदभावरूपपक्षतायाः अनिर्वाहादिति भावः। प्राथमिकस्त्विति। सिषाधयिषाविरहस्येत्यनुषज्यते। स्वक्षणस्येति। विशेषणमित्यनुषज्यते। उत्तरयति यत्रेति। ज्ञानेच्छयोर्युगपदुत्पादमते सिषाधयिषोत्पत्तिकाले

[दी] क्रमेण सिषाधयिषाप्रात्यक्षिकसिद्धिपरामर्शानुमितयस्तत्र तृतीयक्षणे पक्षतासम्पत्त्यर्थमिति । तन्न; यत्रानुमित्सानाशक्षणे प्रात्यक्षिकसिद्धिः अथ

सिद्धुत्पादे सिद्धेर्वा परामर्शरूपत्वे परामर्शोत्पत्तिकाले सिषाधयिषासत्त्वा देव विशिष्टाभावो निर्वहतीति क्रमेण इति । अविरलक्रमेणेत्यर्थः । सिषाधयिषासिद्ध्योरन्तरा क्षणैकाविलम्बे सिषाधयिषाविरहेण क्षणं विशेष्यापि पक्षत्वानिर्वाहस्य वक्ष्यमाणत्वात् सिद्धिपरामर्शयोः परामर्शानुमित्योर्वा कालव्यवधानेनोत्पत्तौ विशेष्याभावादेव विशिष्टाभावसम्पत्तेश्च । सिषाधयिषा– अनुमितित्वप्रकारकेच्छा । अनुमित्यात्मकसिद्धाविच्छायाः स्वविषयसिध्युपहितत्वात् तदुत्तरमनुमित्यन्तरोत्पत्तिरेव न सम्भवतीति प्रात्यक्षिके इति । पक्षतासम्पत्त्यर्थमिति । सिषाधयिषाविरहस्य क्षणविशेषणत्वानुपादाने तत्रानुमित्युत्पादक्षणस्य सिद्धिक्षणध्वंसाधिकरणपरामर्शोत्पत्तिक्षणध्वंसाधिकरणत्वेन सिद्धिक्षणाव्यवहितत्वविरहात्तादृशसिद्धेरपि प्रतिबन्धकतापत्त्या पक्षतानुपपत्तिः ; तद्विशेषणोपादाने च सिद्धयुत्पत्तिक्षणस्य सिषाधयिषाविशिष्टतया सिषाधयिषाविरहविशिष्टस्वक्षणः परामर्शोत्पत्तिक्षण एव तद्ध्वंसाधिकरणकालध्वंसाधिकरणत्वरूपमव्यवधानमनुमित्युत्पादक्षणस्याक्षतमेवेति पक्षतोपपत्तिरितिभावः । एवमुभयवादिन्यि अप्रामाण्यज्ञानाभावोपि निवेशनीयः । अविरलक्रमेण यत्र सिद्धितद्धर्मिकाप्रामाण्यज्ञानानुमितयः तत्र द्वितीयक्षणे पक्षतासम्पत्तये शेषदिशि तन्निवेशः । प्रथमदिशि तन्निवेशस्तु यत्र क्रमेण भावसिद्धिधर्मिकाप्रामाण्यज्ञानसिद्धिपरामर्शानुमितयस्तत्र पक्षतासम्पत्त्यर्थमिति । एवं तृतीयक्षणसाधारणाव्यवहितोत्तरत्वमते यत्र क्रमेण सिद्धितद्धर्मिकाप्रामाण्यज्ञानानुमितयस्तत्र प्रथमक्षणे पक्षतासाधारणाय उत्तरक्षणे तन्निवेशः । सिद्धौ तन्निवेशस्तु द्वितीयक्षणे पक्षतासम्पत्तय इति बोध्यम् ।

[दी] परामर्शानुमिती, तत्र पक्षताविरहप्रसङ्गात् । अथ प्रथम क्षणमपेक्ष्य द्वितीयस्येव द्वितीयक्षणमपेक्ष्य तृतीयक्षणस्यापि अव्यवहितोत्तरत्वं स्वध्वंसाधिकरणकालध्वंसानाधिकरणत्वे सति स्वाधिकरणकालध्वंसाधिकरणत्वं वा तत्राव्यवहितोत्तरत्वं वाच्यम् ।

पक्षताविरहे ति । सिध्यत्पदादक्षणस्यापि सिषाधयिषाविरहविशिष्टतयाऽनुमित्युत्पादक्षणस्य तादृशक्षणध्वंसाधिकरणकालध्वंसाधिकरणतया तत्सामान्याभावात्मकतादृशक्षणाव्यवधानविरहादिति भावः । यद्यपि सिषाधयिषाविरहविशिष्टानुमित्यवहितपूर्वक्षणवृत्तित्वसिद्धिभिन्नत्वविशिष्टसिद्ध्यभावस्य पक्षतात्वमङ्गीकृत्याप्युक्तानुपपत्तिरशक्यते वारयितुम् ; तथाप्यव्यवहितोत्तरक्षणोत्पत्तिघटितपक्षस्याक्षिप्तत्वात् तत्रैव दर्शितदोषोद्धारं तूत्तीयक्षण साधारणाव्यवधानं निवेश्य शङ्कते अथे ति । तृतीयस्यापि क्षणस्याव्यवहितोत्तरत्व मिति । क्षणद्वयानुगमकस्वक्षणत्वेन स्वक्षणानन्तर्भाव्य प्रातिस्विकरूपेण स्वक्षणाव्यवधानशरीरे निवेशनीयत्वात् तृतीयक्षणे च स्वोत्पत्तिक्षणध्वंसाधिकरण द्वितीयक्षणध्वंसाधिकरणत्वेपि स्वाधिकरणद्वितीयक्षणध्वंसाधिकरणकालध्वंसानधिकरणत्वेन स्वक्षणाव्यवधानस्याक्षतत्वादिति भावः । द्वितीयतृतीयक्षणसाधारणं स्वक्षणध्वंसाधिकरणकालध्वंसाधिकरणकालध्वंसानाधिकरणत्वरूपानुगताव्यवधाननिवेशनं न सम्भवति ; अपेक्षाबुद्ध्यात्मकसिद्धिचतुर्थसिषाधयिषापंचमक्षणोत्पत्तानुमितौन्यभिचारतादवस्थ्यात् , चतुर्थक्षणसाधारणानुगताव्यवहितोत्तरत्वस्य कथंचिन्निवेशे चतुर्थक्षणोत्पत्तानुमितिकापेक्षाबुद्ध्यनात्मकसिद्धेरप्रतिबन्धकत्वापत्तिरिति ध्वेयम् । अपेक्षाबुद्धिद्वितीयक्षणावधिकक्षणत्वसदितरबुद्धिद्वितीयतृतीयक्षण साधारणमनुगताव्यवहितोत्तरत्वं प्रकारान्तरेण निर्वक्ति स्वध्वंसे ति । उभयत्र कालपदं कालिकसम्बन्धेन स्वध्वंसस्वत्वलाभाय , तेन सर्वस्यैव क्षणस्य स्वनाशविषयकपूर्वपूर्वज्ञाननाश्यत्वेपि न सत्यन्ताप्रसिद्धिः; न वा

[दी] तथा च यत्र क्रमेण सिद्धिसिषाधयिषानुमितवस्तत्र प्रथमक्षणे पक्षत्वावारणाय उत्तरक्षणे विशेषणं प्रथमं विशिष्टान्तम् ; द्वितीयन्तु सिद्धेस्तत्रैव द्वितीयक्षणे पक्षतासम्पत्तये ।

स्वपूर्वकालस्थापि तत्पूर्वकालीनस्वविषयकज्ञाननाशवत्वेपि तदुत्तरत्वस्य तत्साधारण्यप्रसङ्गः । एवं सति यत्र सिषाधयिषासिद्धिपरामर्शानुमितीनां क्रमेणोत्पादस्तत्रासिद्धेः स्वक्षणे सिषाधयिषाविरहविशेषणमन्तरेणापि अव्यवहितोत्तरक्षणोत्पन्नानुमितिकत्वनिर्वाहादुक्तप्रथमविशिष्टान्तव्यावृत्त्यसङ्गतेः । स्थलान्तरे तव्यावृत्तिमाह तथा चे ति । प्रथमक्षणेपक्षतावारणाये ति । तादृशसिद्धेस्तृतीयक्षणोत्पन्नानुमितिकतया निरुक्तसिद्धिभिन्नत्वविरहेण पक्षताप्रसक्तेरिति भावः । प्रथमक्षणे पूर्ववत्सिषाधयिषाविरहविशेषणसत्वेपि स्वनाशाधिकरणकालध्वंसाधिकरणत्वघटिताव्यवहितोत्तरत्वनिवेशकल्पेनोक्तातिप्रसङ्गवारणसम्भवः । अनुमित्युत्पत्तिक्षणे तत्सिद्धिनाशाधिकरणकालध्वंसानधिकरणत्वस्य सिषाधयिषाविरहविशिष्टत्वात्सिद्ध्यधिकरणप्रथमक्षणध्वंसाधिकरणत्वस्य च सत्वात् । अतोऽव्यवहितोत्तरक्षणे तस्य विशेषणतामाह उत्तरे ति । तथाचोक्तस्थले सिद्ध्यव्यवहितोत्तरतृतीयक्षणेपि सिषाधयिषासत्वात्सिषाधयिषाविरहविशिष्टतादृशक्षणोत्पत्तिकत्वं नानुमितेरिति तादृशसिद्धेरनुमितिप्रतिबन्धकतानिर्वाहः । द्वितीयविशिष्टान्तस्य यद्विशेषणत्वं यत्प्रयोजनकत्वं च प्रागभिहितमिदानीमपि तस्य तद्विशेषणत्वं तत्प्रयोजनकत्वं च न तु प्रथमविशिष्टान्तवदन्वादृशमिति प्रदर्शयितुं पूर्वोक्तमप्यनुवदति द्वितीयन्त्वि ति । सिद्धेर्विशेषणमित्यनुषज्यते । तत्रैवे ति । यत्र क्रमेण सिद्धिसिषाधयिषानुमितवस्तत्रैवेत्यर्थः । द्वितीयक्षण इति । तृतीयक्षणेऽनुमितिनिर्वाहार्थमित्यादिः । पक्षतासम्पय इति । विशेषणाभावेन विशिष्टाभावरूपपक्षतानिर्वाहायेत्यर्थः ।

[दी] यदि पुनरिच्छाजनिका सामग्री प्रतिबध्नात्यनुमितिं, तदानुमित्यव्यवहितपूर्वक्षणवृत्तिसिद्धिभिन्नसिद्धयभाव मात्रं पक्षतेति चेत्

अन्यथोक्तक्रमेण तादृशसिद्धेर्निरुक्तसिद्धिभिन्नतया विशेष्यत्वेन पक्षतानुपपत्तेरितिभावः । ननु दर्शितस्थले प्रथमक्षणे पक्षतासत्वेपि न क्षतिः; सिषाधयिषाकाले अनुमित्युत्पादस्य इच्छसामग्र्या प्रतिबन्धेनाप्यसम्भवात्; इत्थं च निष्प्रयोजनकतया प्रथमविशिष्टान्तानुपादाने द्वितीयमपि निष्प्रयोजनकम्; तादृशसिद्धेः स्वाव्यवहितोत्तरतृतीयक्षणोत्पन्नानुमितिकतयैवाप्रतिबन्धकत्वेन तृतीयक्षणोत्पन्नानुमितिनिर्वाहादित्याशयेनेच्छासामग्र्या अनुमितिप्रतिबन्धकतागते तदुभयं परित्यजति यदिपुनरिति । इच्छासामग्र्यपेक्षया अनुमितिसामग्र्या हीनबलवत्त्वेपि अनुमितीच्छाविशिष्टाया अनुमितिसामग्र्याः इच्छां प्रति प्रतिबन्धकता कल्पनस्यावश्यकतया तस्या एव बलवत्त्वकल्पनमुचितम्, अन्यथा इच्छासामग्र्यपेक्षया बाधादिरूपानेकप्रतिबन्धकाभावघटिततया गुरुतरानुमितिसामग्र्याः प्रतिबन्धकतायामिच्छानिवेशेन गौरवादिति युक्त्या ज्ञानेच्छयोर्यौगपद्यस्वीकारसम्भवेन वा इच्छासामग्र्या अनुमितिविरोधिताव्यवस्थापनं न सम्भवतीत्याशयेन यदीत्युक्तम् । सिषाधयिषाविरहविशेषणसार्थक्यस्याशक्यत्वे अनुमित्यव्यवहितपूर्ववृत्तित्वं परित्यज्याव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकत्वरूपगुरुविशेषणोपादानमनुचितमित्याशयेनाह- अनुमित्यव्यवहिते ति । अनुमितिपदं स्वसमानाधिकरणानुमितिपरम् । अतो व्यधिकरणानुमित्यव्यवहितपूर्ववृत्तिसिद्धेः स्वाश्रयेऽनुमित्यनुत्पादोपपादकतानिर्वाहः । यन्नाशानन्तरमनुमितिरुत्पद्यते तादृशसिद्धेरप्रतिबन्धकतावारणायाव्यवहितत्वोपादानम्, तच्चानुमितिपूर्वकालीनध्वंसाप्रतियोगित्वरूपं पूर्वक्षणे सिद्धावेव वा विशेषणम्, पूर्वकालीनत्वं च कालिकसम्बन्धेन तत्प्रागभाववत्त्वमेव, ध्वंसस्य कालोपाधितया तदुपपत्तिः । सर्वासामेव सि-

द्धीनां पूर्वजातयर्त्किंचिदनुमितिनिरूपितनिरुक्ताव्यवधानवत्तयाऽनुमित्यव्यव हितसिद्धिभिन्नसिद्धयप्रसिद्धिः, अतः पूर्वक्षणवृत्तित्वविशेषणम् । पूर्वत्वं प्रागभाववत्वं अनुमित्यादिपर्यन्तावस्थायिस्थूलकालमहाकालसाधारणमित्युक्तदोषतादवस्थ्यमतः क्षणपर्यन्तनिवेशः । प्रागभावावच्छिन्नवृत्तित्वनिवेशने ऽप्रतियोगित्वान्तस्य सिद्धिविशेषणत्वे च क्षणत्वमनुपादेयमेव । जन्य मात्रस्य कालोपाधित्वे तु कालिकसम्बन्धेन प्रागभाववत्वं सिद्धेरेव विशेषणं देयम् । प्रागभावानभ्युपगमे वक्ष्यमाणतदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वरूपमन्यवहितपूर्वत्वमेव क्षणविशेषणम् । तद्घटकदळानां व्यावृत्तिरग्रे व्यक्तीभविष्यति ।

अनुमित्यव्यवहितपूर्ववर्तिन आत्ममनोयोगादेस्तादृशसिद्धिभिन्नतया प्रसक्तप्रतिबन्धकतावारकद्वितीयसिद्धिपदसार्थक्याय प्रथमसिद्धिपदम् । न च प्रक्षाळनाद्धीत्यादिन्यायेन उभयपरित्याग एव उचित इति वाच्यम् , तथा सति बाधबुद्धयादेरपि निरुक्तरूपेणैव प्रतिबन्धकतया स्वतन्त्रतत्प्रतिबन्धकताव्याघातात् । न च व्याहन्यतां तत्प्रतिबन्धकत्वान्तरम् , न हि तत्क्षतिमावहति, किं तु तावता लाघवमेवेति वैयर्थ्यदोषो दुर्वार एवेति वाच्यम् ; तद्दोषस्य वैयर्थ्याच्च सिद्धेरित्यनेन स्वयं दर्शनीयत्वात् । यद्यप्येवं प्रथमसिद्धयनुपादेनेपि बाधादेस्स्वतन्त्रप्रतिबन्धकता विलोपभीरूणां द्वितीयसिद्धिपदोपादानं न विरुद्धयते, अखण्डाभाव सम्पादकत्वेन लक्षणदोषासंस्पर्शादिति प्रथमतस्तदुपादानमनुचितम् ; तथाप्यनुमित्यव्यवहितपूर्ववर्तिनां स्वत्वघटितेन निरुक्तरूपेणानुगमासम्भवेन तत्तद्व्यक्तित्वेन तेषां भेदकूटस्यैव निवेशनीयतया सिद्धौ सिद्धयति रिक्तादृशपदार्थभेदानामव्यावर्तकानां निवेशे गौरवात् सिद्धिव्यक्तीनां भेदा निवेशनीया इत्येतत्सूचनाय प्रथमसिद्धिपदोपादानम् । अत एव अग्रे तत्तद्व्यक्तित्वेन सिद्धिव्यक्तीनां भेदनिवेशे भेदानां विशेष्य विशेषणभावे विनिगमनाविरहेण महागौरवात् फलानुत्पादनियतसिद्धिव्य-

[द्वी] तादृशसिद्धीनां तत्तद्व्यक्तित्वेनाभावःकारणं निरुक्तरूपावशिष्टत्वेन वा? नाद्यः; अनन्तकार्यकारणभावप्रसङ्गात्, तादृशसकलसिद्धौ अनुमित्सा विरहविशेषणदानस्य वैयर्थ्यात् ; तत्तत्समयसम्बन्धव्यक्तीनां

क्तीनां तत्तद्व्यक्तित्वेन प्रतिबन्धकतापक्ष एव साधीयान् । सिषाधयिषा विरहविशेषणपरित्यागश्चानुचितः,सिषाधयिषाकालीनसिद्धिव्यक्तीनामनन्तानां तत्तद्व्यक्तित्वावच्छिन्नभेदकूटनिवेशापेक्षया तद्विशेषणदानस्यैव युक्तत्वादिति कथंचिदनुगमप्रकारः परिचिन्तनीय इति सिद्धेर्वैयर्थ्यमित्याशयेन वैयर्थ्याच्च सिद्धेरिति वक्ष्यति । तादृशसिद्धीनां– भिन्नान्तपरिचेयसिद्धिव्यक्तीनाम्, निरुक्तरूपे ति ; निरुक्तसिद्धिभिन्नत्वविशिष्टसिद्धित्वेनेत्यर्थः । अगत्या कार्यकारणभावानन्त्यमदोषायेत्यतआह–– तादृशे ति । तत्तद्व्यक्तित्वेन कल्प्यमानप्रतिबन्धकताकेत्यर्थः । यादृशसिध्युत्तरं सिषाधयिषोत्पत्तावनुमितिः सिषाधयिषोत्पत्तिक्षणे अनुमितिवारणाय कल्पनीय प्रतिबन्धकताकतादृशव्यक्तौ सिषाधयिषाविरहविशेषणवैशिष्ट्यनिवेशनस्या वश्यकतया सकले ति ।

ननु क्वचित्सिषाधयिषाविरहविशेषणस्यावश्यकतया तदभिप्रायेणैव मूले तदुपादानसङ्गतिः, अतो दूषणान्तरमाह– तत्तत्समये ति । तत्तदात्मनिष्ठा याः सिषाधयिषाविरहविशिष्टसिद्ध्यभावातिरिक्तसकलकारण समवधानाधिकरणीभूतक्षणसम्बन्धव्यक्तयस्तासां विनिगमनाविरहेण क्रमिक सिद्धिसिषाधयिषानुमित्युत्पत्तिस्थले सिषाधयिषोत्पत्तिक्षणे अनुमितिवारणाय सिद्धेस्सिषाधयिषाविरहविशिष्टतत्तद्व्यक्तित्वेन प्रतिबन्धकत्वापेक्षया लाघवेन च प्रतिबन्धकतापत्तेरित्यर्थः । तथा च मूलोक्तस्य सिषाधयिषा विरहविशिष्टसिद्ध्यभावस्य पक्षतात्वव्याघात इति भावः । ननु तत्तत्समयैस्समं तत्तदात्मनां सम्बन्धाः स्वरूपानतिरिक्ताः, तथा च तत्त

[दी] तत्तत्समयावच्छिन्नतत्तन्मनोयोगादीनां वा प्रतिबन्धकत्वप्रसङ्गाच्च । नान्त्य ; सत्यपि परामर्शादौ कार्यानुत्पत्तेरनन्तरमनुमितिः कार्या ऽनुत्पत्तेत्यत्र नियामकाभावात् । न वा कारणतावच्छेदकावच्छिन्न समाजाधीनकार्योत्पादादिकं कारणतावच्छेदककोटौ निविशते ।

दात्मस्वरूपस्य तत्तत्समयरूपस्य वा सम्बन्धस्य प्रतिबन्धकत्वे तत्त दात्मन्यन्यदा तत्तत्समये चान्यत्रात्मन्यनुमित्यनुपपत्तिः, अतः अन्यस्य प्रतिबन्धकतां प्रसञ्जयति— तत्तत्समयावच्छिन्ने ति । सिद्धयन न्तरं सिषाधयिषाद्वितीयक्षणेऽनुमितिस्थले इत्यादिः । सिषाधयिषाविरह विशिष्टसिद्धयभावेतरसकलकारणाधिकरणतत्तत्क्षणावच्छिन्नानां तत्तदात्म निष्ठतत्तन्मनोयोगादिव्यक्तीनामित्यर्थः । सामानाधिकरण्यसम्बन्धेन सिषाध यिषाविरहावच्छिन्नायास्तत्तत्सिद्धेः प्रतिबन्धकत्वापेक्षया लाघवादिति भावः। **नियामकाभावात्**— नियामकाभावप्रसङ्गात् । सिषाधयिषाविरहविशिष्ट सिद्धिसत्वे द्वितीयक्षणेऽनुमित्युत्पत्तिनिर्वाह्याया निरुक्तसिद्धिभिन्नसिद्धय भावरूपपक्षताया अनुमित्यनुत्पादनिर्वाह्यतदभावस्य चान्योन्याश्रयभिया अनुमित्युत्पादानुत्पादप्रयोजकत्वासम्भवादिति भावः ।

तादृशान्योन्याश्रयस्यादोषत्वादिनं प्रतिबन्धा निरस्यति— **नवेत्या** दिना । एवकारार्थो वाकारः । उत्पत्तेःकारणतावच्छेदकावच्छिन्नसमाजा धीनत्वकथनेन तस्याः कारणतावच्छेदककुक्षिनिवेशे अन्योन्याश्रयस्सूचितः। तथा सति प्रायशः कारणतावच्छेदकावच्छिन्नसमवधानस्यापि अग्रेतन कार्योत्पत्तिप्रयोज्यत्वापातात् । **निविशते**— निविशमानमदूषणावहम् । अथ बोक्तपक्षतायाः कार्योत्पत्तिनियामकत्वमेव नवेत्यादिना निराकृतम् । कारणतावच्छेदककोटावित्यादेः कार्योत्पत्तिनियामकतावच्छेदकघटकं इत्यर्थः।

[दी] तथा सति उत्पत्तिकालावच्छिन्नत्वविशेषितेन स्वक्षणाव्यवहितो

अत्रान्योन्याश्रयदोषं प्रतिबन्ध्या स्वीकारयति **तथासतीत्येवं** व्याख्येयम् । यद्यपि स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकत्वं स्वत्वघटितत्वेन तत्त व्यक्तिविश्रान्तमिति भेदप्रतियोगितावच्छेदकगर्भे तन्निवेशानर्थक्यात् तत्परिचेयव्यक्तीनां तत्तद्व्यक्तित्वेनैव भेदासिद्धौ निवेशनीयाः ; तथा च कारणतावच्छेदकस्य नोत्पत्तिघटितत्वम् , तथापि भेदकूटनिवेशे विशेष्य विशेषणभावे विनिगमनाविरहेण कारणतानन्त्यं दुष्परिहरमेवेति भावः । कार्योत्पादादिकमित्यादिपदेन तादृशगौरवप्रयोजकभेदकूटस्यापि परिग्रहः । तस्य कारणतावच्छेदकत्वे तृतीयप्रतिबन्देरेव सङ्गतेः । अनुमित्यव्यवहितपूर्वोत्पन्नपरामर्शादितोऽनुमित्युत्तरमनुमित्यापत्तेर्वारणाय **उत्पत्तिकालावच्छिन्नत्वविशेषितेने** ति । स्वाधिकरणसमयध्वंसपदस्य कालसम्बन्धविशेषितेनेत्यर्थः । तादृशध्वंसवत्त्वं कालिकसम्बन्धेन । तेनोत्पत्तिक्षणस्यापि प्रतियोगित्वादिसम्बन्धेन स्वाधिकरणकालध्वंसावच्छिन्नत्वेपि न क्षतिः ।

एवं च कालिकसम्बन्धेन तादृशध्वंसपदस्यात्मसम्बन्धविशिष्टज्ञानादेर्द्वितीयक्षणे सत्वात् उक्तातिप्रसङ्गतादवस्थ्यम् ; अतः कालपदम् । तादृशकालसम्बन्धस्य उपलक्षणविधया ऽवच्छेदकत्वे स एव दोषः इत्यतो विशेषणविधया तथात्वलाभायोत्तरत्रानुषंगाय चावच्छिन्नान्तस्य कर्मधारायमध्ये प्रक्षेपमुपेक्ष्यावच्छिन्नत्वविशेषितेनेत्युक्तम् । विशेषणत्वं चास्य सामानाधिकरण्यसम्बन्धेन बोध्यम् धर्मिणो विशेष्यत्वात् । कालान्तरीयानुमितिसमानाधिकरणघटज्ञानादितोऽनुमित्यापत्तिवारणाय स्वक्षणाव्यवहितोत्तरक्षणोत्पन्नत्वमनुमितिविशेषणम् । तदर्थश्च स्वाधिकरणकालध्वंसाधिकरणकालध्वंसानधिकरणत्वे सति स्वाधिकरणकालध्वंसाधिकरणो यः क्षणस्तदुत्पन्नत्वम् । सत्यन्तनिवेशात् स्वोत्तरतृतीयक्षणोत्प

नानुमितिकज्ञानादितस्तद्द्वितीयक्षणे नानुमितिप्रसङ्गः । तादृशानुमितिक संस्कारद्वितीयक्षणेऽनुमितिवारणाय स्वाधिकरणत्वे सतीत्युपेक्षितम् , तृती यादिक्षणस्य ज्ञानाद्यनधिकरणत्वेपि सस्काराद्यधिकरणत्वाक्षतेः । तादृशा पेक्षानुद्धिद्वितीयक्षणेऽनुमितिवारणानुरोधस्तु न तदुपेक्षाबीजम् , तदानी समानाधिकरणविशेषगुणान्तरस्याप्यनुत्पत्त्या तत्प्रयोजकादेवानुमित्यनुत्पा दोपपत्तेः । अपेक्षानुद्धिद्वितीयक्षणे समानाधिकरणविशेषगुणोत्पादोपगमे त्वपेक्षानुद्धेस्तृतीयक्षणावस्थायिताया एवानुपपत्तेः । वस्तुतस्त्वपेक्षानुद्धेर्द्वि क्षणावस्थायितामत एवैतत्प्रतिबन्दिपदर्शनम् । अन्यथा सिद्ध्यादिद्वितीय यक्षणोत्पन्नापेक्षानुद्ध्यात्मकपरामर्शतृतीयक्षणेऽनुमित्यनुपपत्तेस्तस्यास्तृतीयक्ष- णपर्यन्तावस्थानमते द्वितीयक्षणे विशेषगुणानुत्पत्त्या तदानीमुत्पत्तिकाला वच्छिन्नसविषयकसत्वस्य दुर्घटत्वादित्यवधेयम् । अनुमितेस्त्वसमानाधिक रणानुमित्युत्तरोत्पन्नज्ञानान्तराद्वानुमितिप्रसङ्गवारणायाधिकरणान्त क्षणवि शेषणम् । स्वपूर्वकालाद्युत्पन्नानुमितेरपि स्वान्यवहितोत्तरत्वाक्रान्तस्वद्वितीय [illegible]न्तस्थायिस्थूलकालोत्पन्नतया तद्दोषतादवस्थ्यमिति क्षणत्वनि वेश[illegible]मेतेः स्वक्षणान्यवहितोत्तरक्षणवृत्तिस्वसमानाधिकरणस्वात्मकानुमि तिकतया तद्वारणाय उत्पत्तिनिवेशः । वस्तुतस्त्वपेक्षानुद्धिद्वितीयक्षणे वि शेषगुणान्तरानुत्पादे अनुमितौ स्वान्यत्वनिवेशादपि उत्पत्तिप्रयोजननिर्वा हो बोध्यः । तथा सत्यपेक्षानुद्ध्यात्मकानुमित्यनन्तरोत्पन्नज्ञानादप्यनुमित्या पत्तेरसम्भवात् । अपेक्षनुद्धेर्द्विक्षणमात्रावस्थायितामत एवैषा प्रतिबन्दिरि त्युक्तत्वाच्च । पुरुषान्तरीयानुमित्यन्यवहितपूर्वोत्पन्नज्ञानात्तद्वतः पुसोनुमिते र्वारणाय स्वसामानाधिकरण्यमनुमितिविशेषणम् । एकपुरुषीयानुमित्व न्यवहितपूर्वोत्पन्नद्वित्वादितस्तद्वतः पुरुषान्तरस्यानुमितेर्वारणाय सविषय कत्वनिवेशनम् । अनुमित्यवहितपूर्वक्षणे ज्ञानोत्पत्त्यनियमाशकया ज्ञानत्व मुपेक्षितम् । व्यक्तीभविष्यति चेदमुपरिष्टात् ।

[दी] त्तरक्षणोत्पत्तिकस्वसमानाधिकरणानुमितिकसविषयत्वेन स्वसमानाधि

बहुव्रीहिप्रतिपाद्यसम्बन्धांशस्याधिकस्यात्र निवेशात् बहुव्रीहिं परित्यज्य लघुरूपान्तरमाह– स्वसमानाधिकरणे ति। अत्राप्युत्पत्तिकालावच्छिन्नत्वविशेषितेनेत्यनुषज्यते । अन्यथा अनुमित्यव्यवहितपूर्वोत्पन्नज्ञानादेरनुमित्युत्पत्त्यधिकरणक्षणेपि सत्वात्तदनन्तरमनुमित्यन्तरोत्पत्त्यापत्तेः। न चानुमित्यव्यवहितपूर्वोत्पत्तेर्विशेषणतयैव सामंजस्ये उत्पत्तिकालावच्छिन्नत्वस्य पृथग्विशेषणत्वमयुक्तमितिवाच्यम् ; अव्यवहितपूर्वक्षणोत्पत्तेर्विशेषणत्वे तद्घटकवृत्त्यंशविशेषणतयैव सामंजस्ये क्षणे स्वाधिकरणकालध्वंसानधिकरणत्वरूपस्य उत्पत्तिघटकांशस्य वैयर्थ्यापातात् । प्रक्षाळनाद्धीति न्यायेन तदंशमपि परित्यज्य स्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षणवृत्तित्वविशिष्टज्ञानत्वेन कारणताप्रसङ्गोऽग्रे दर्शयिष्यत एव । अनुमितौ सामानाधिकरण्यविशेषणप्रयोजनं पूर्ववत् । अनुमित्यव्यवहितपूर्वत्वं प्रागभावसत्वे तत्प्रागभावाधिकरणकालप्रागभावानधिकरणत्वे सति तत्प्रागभावत्वम् । अनुमितिपूर्वविनष्टस्य तदुत्तरोत्पन्नस्य च घटज्ञानादेर्वारणाय दळद्वयम् । अव्यवहितोत्तरत्वघटकात् स्वाधिकरणकालध्वंसाधिकरणकालध्वंसाधिकरणत्वरूपसत्यन्तादेतदीयसत्यन्तस्य लघुत्वादप्येतत्कल्पे लाघवं बोध्यम् । प्रागभावानङ्गीकारे तदघटितं वक्ष्यमाणाव्यवहितपूर्वत्वमेव निवेश्यम् । अनुमित्यव्यवहितपूर्वोत्पन्नतदुत्तरस्थायिस्थूलकालेऽनुमित्युत्तरमुत्पन्नस्य घटादिज्ञानस्य वारणाय क्षणत्वनिवेशनम् । अनुमितिप्रागभावविशिष्टोत्पत्तिकत्वविवक्षणे क्षणपदं कालपरमेव । अनुमित्यव्यवहितपूर्वक्षणपर्यन्तस्थायिनस्तत्पूर्वजातघटज्ञानादितोऽनुमितिपूर्वमनुमितेर्वारणाय उत्पत्तित्वनिवेशनम् । पूर्ववद्वित्वादिवारणाय सविषयत्वनिवेशनम् । ज्ञानत्वोपेक्षायां बीजमपि पूर्ववद्बोध्यम् ।

[दी] करणानुमित्यव्यवहितपूर्वक्षणोत्पन्नसविषयत्वेन स्वक्षणाव्यवहितोत्तर क्षणानुत्पत्तिकस्वसमानाधिकरणानुमितिकभिन्नसविषयत्वेन वा

अत्रोभयत्र स्वत्वघटितत्वेन ज्ञातव्याप्तिविश्रामादननुगम इति प्रतियोगिनि स्वत्वमन्तर्भाव्यानुगतभेदकूटघटितधर्मेण कारणतां प्रसंजयति– स्वक्षणे ति । स्वक्षणाव्यवहितोत्तरक्षणानुत्पत्तिकस्वसमानाधिकरणानुमितिकं स्वं अनुमितिसामग्र्यसमवधानक्षणोत्पन्न घटज्ञानादिकमेव तदन्यसविषयकोऽनुमित्यव्यवहितपूर्वक्षणोत्पन्नतत्समानाधिकरणपरामर्शादिः- अतस्ततोऽनुमित्युपपत्तिः । तादृशादेव परामर्शादनुमित्यनन्तरमनुमित्यन्तरवारणायात्रापुत्पत्तिकालावच्छिन्नत्वविशेषितेनेत्यनुषज्यते । न चैवं स्वोत्पत्तिक्षणावच्छिन्नत्वस्यानुयोगिनि प्रवेशेनाननुगमस्यावश्यकतया प्रयासोयमफलइतिवाच्यम् ; तत्तद्वस्तुनिष्ठतत्तदधिकरणसमयध्वंसाधिकरणसमयसम्बन्धानामभावकूटविशिष्टस्यैवात्रोत्पत्तिकालावच्छिन्नार्थत्वात्तादृशस्य चानुगतत्वात् स्वसमानाधिकरणानुमितित्वावच्छेदेन स्वक्षणाव्यवहितोत्तरक्षणानुत्पत्तिकत्वं विवक्षणीयम् । अतोनुमित्युत्पादकपरामर्शाद्यधिकरणक्षणाव्यवहितोत्तरक्षणानुत्पत्तिकत्वस्य तत्परामर्शसमानाधिकरणकालान्तरीणानुमितौ सत्वेपि न जन्यसविषयके भेदकूटाप्रसिद्धिः । स्वक्षणाव्यवहितोत्तरत्वं पूर्वनिरुक्तं ग्राह्यम् । तत्पुरुषीययादृशघटज्ञानाद्युत्तरं तदीयानुमितावनुत्पन्नायामेव तस्य पुंसो मुक्तिस्तादृशमेव घटज्ञानादिकं स्वाधिकरणसमयोत्तरक्षणानुत्पत्तिकस्वसमानाधिकरणानुमितिसामान्यकर्मेति परामर्शाद्यसमवहितात्तत्तदन्यघटज्ञानादितोनुमित्यापत्तिस्तस्य स्वपदेनोपादानासम्भवादतोऽव्यवधाननिवेशः । निरुक्तान्यवधानस्य चानुमित्यनुत्पादकघटज्ञानादेः पूर्वं कदाचिदुत्पन्नाया अप्यनुमितेरुत्तरस्यधिकरणक्षणे अव्यवहितोत्तरत्वस्य तादृशानुमित्युत्पत्तिपति तादृशघटज्ञानादिद्वितीयक्षणपर्यन्तस्थायिस्थूलकाले

[दी] किं वा स्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षणवृत्तित्वविशिष्ट

सत्वात्तादृगं स्वमप्रसिद्धमेव स्यात् ; अत उत्तरक्षणत्वयोर्निवेशनम् । अनुमितेः स्वाव्यवहितोत्तरक्षणवृत्तिस्वात्मकानुमितिकतया स्वपदेनोपादानासम्भवात्ततोऽनुमित्यन्तरापत्तिरत उत्पत्तिनिवेशः । व्यधिकरणानुमित्यव्यवहितपूर्वोत्पन्नघटज्ञानादिवारणाय सामानाधिकरण्यमनुमितिविशेषणम् ।

द्वितीयकल्पेऽनुमित्यव्यवहितपूर्वक्षणोत्पत्तिमुपलक्षणीकृत्य पृथगुत्पत्तिकालस्य विशेषणतया निवेशापेक्षया तादृक्षणोत्पत्तिघटकतादृक्षणवृत्तित्वस्य विशेषणतया निवेशनमेवोचितम् , तावतैवातिप्रसङ्गभङ्गात् इत्याशयेनाह- किं वे ति । पदव्यावृत्तिः स्फुटैव । यादृशपरामर्शद्वितीयक्षणे किमपि ज्ञानं नोत्पन्नं तृतीयक्षणे चानुमितिर्जाता, तत्र परामर्शरूपज्ञानस्यैवानुमित्यव्यवहितपूर्वक्षणवृत्तित्वविशिष्टस्यानुमित्यव्यवहितप्राक्क्षणेसत्वात् ज्ञानत्वमुपेक्ष्य सविषयकत्वनिवेशनमफलमित्यतो ज्ञानत्वमेवात्र निवेशितम् । अत्राप्यनुयोगिनि स्वत्वान्तर्भावेनाननुगमस्तु नाशंकनीयः ; पूर्वकल्पद्वयेपि तत्सत्वात् गौरवस्य चाधिक्यात् । अननुगमासहिष्णुतया तु तत्तद्व्यक्तिनिष्ठतत्तद्व्यक्तिसमानाधिकरणानुमित्यव्यवहितपूर्वत्वानधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वविशिष्टज्ञानत्वेन कारणत्वप्रसक्तिर्बोध्या । न चोपदर्शितसकलरूपापेक्षया लिंगपरामर्शत्वस्य लघुतया तेनैव रूपेण परामर्शहेतुत्वमुचितमिति वाच्यं प्रतिबन्धकाग्रह इति वाच्यम् ; उक्तरूपेण हेतुत्वे कारणान्तरीयदशायामुक्तरूपावच्छिन्नविरहेणैवानुमितिवारणसम्भवात् । कारणान्तरस्याकल्पनीयतया लिंगपरामर्शत्वापेक्षया तच्छरीरगौरवस्याकिंचित्करत्वात् । ननु यत्र घटज्ञानादिद्वितीयक्षणे लिंगपरामर्शस्तदुत्तरमनुमितिस्तत्र परामर्शोत्पत्तिक्षणेऽप्यनुमितिप्रसङ्गः; प्रथमक्षणमपेक्ष्य द्वितीयस्यैव द्वितीयक्षणमपेक्ष्य तृतीयस्यापि क्षणस्याव्यवहितोत्तरत्वेन

[दी] ज्ञानत्वादिना कारणत्वं स्यात् । अव्यवहितोत्तरश्च द्वितीयक्षण एवेति नाव्याप्तिप्रसङ्गः । न चादिमेषु परामर्शस्थितिक्षणे यत्र विरोधिसिद्धिविनाशस्तत्रोत्तरक्षणेऽनुमितिर्न स्यात् परामर्शस्यातथात्वादिति वाच्यम् ; अनुमितिसामग्र्या विरोधिन्या विरहेण तदानी

तादृशघटज्ञानादेः स्वक्षणाव्यवहितोत्तरक्षणोत्पन्नानुमितिकत्वात् , इत्यत आह- **अव्यवहितोत्तर श्चेति** । **द्वितीयक्षणएवे ति** । अव्यवहितोत्तरत्वमध्ये स्वक्षणस्य न प्रातिस्विकरूपेण निवेशः; किं तु स्वाधिकरणकालत्वेन । तथा च स्वाधिकरणकालध्वंसाधिकरणकालध्वंसाधिकरणत्वसामान्याभावस्य तृतीयक्षणेऽसत्वान्न तस्याव्यवहितोत्तरत्वमिति भावः ।

पूर्वकल्पत्रये ज्ञानत्वमुपेक्ष्य सविषयकत्वनिवेशनप्रयोजनं स्फुटयितुमाशंकते- **न चादिमेष्वि ति** । शेषकल्पे विनश्यदवस्थपरामर्शजन्यानुमितिस्थलेऽव्यवहितपूर्वक्षणवृत्तित्वविशिष्टस्य परामर्शस्यैवानुमित्यव्यवहितपूर्वक्षणे सत्वान्नानुपपत्तिरित्यत **आदिमे ष्वित्युक्तम्** । **अतथात्वा दिति** । तद्द्वितीयक्षणे अनुमित्यनुत्पत्त्या तत्कारणतावच्छेदकाक्रान्तत्वा दुत्पत्तिकालावच्छिन्नस्यानुमित्यव्यवहितप्राक्क्षणेऽसत्वाच्चेत्यर्थः । अनुमित्युत्पत्तिक्षण इव दर्शितस्थले अनुमितिपूर्वमपि परामर्शेन प्रतिबन्धात् अनुव्यवसायादिनोत्पत्तुमर्हतीति शंकानिरासाय **अनुमितिसामग्र्या विरोधिन्या विरहेणे ति** । परामर्शमात्रं न प्रतिबन्धकम् ; अपि त्वनुमितिसामग्र्येव , तथा च न तत्सामग्री, तस्याः फलाव्यवहितप्राक्काल एव सत्वादिति । **तदानीम्**— तादृशपरामर्शद्वितीयक्षणे । अनुव्यवसायादेरित्यादिना सन्निकृष्टवस्त्वन्तरज्ञानपरिग्रहः । ननु यत्र परामर्शोत्पत्तिकाले समानविषये लौकिकचाक्षुषादिप्रत्यक्षस्य भिन्नविषये च शाब्दबोधस्य सामग्र्यासीत्तद्वितीयक्षणे विनिगमनाविरहेण किमपि ज्ञानं न जायते;

[दी] मुत्पन्नादेवानुव्यवसायादेरन्ततः संस्काराद्वा तत्सम्भवात्, संस्कार जन्यत्वेन स्मृतित्वस्य प्रागेव निरासात्। स्याद्वा स्वसमानाधिकरणानु

सकलज्ञानसामग्रीषु प्रतिबन्धकसमवधानस्य तुल्यत्वम्, अतः तद्द्वितीयक्षणे प्रत्यक्षादिसामग्रीविगमेपि तृतीयक्षणे नानुमितिः स्यात्; उक्त कारणतावच्छेदकाक्रान्तज्ञानाभावात्, इत्यत आह। अन्ततइ ति। कथं चिद् ज्ञानानुत्पादेपीत्यर्थः। संस्कारा दिति। तस्यापि सविषयकत्वघटित तत्कारणतावच्छेदकाक्रान्तत्वादिति भावः। न च यत्र परामर्शादिरुपेक्षा स्यात्तत्र का गतिरिति वाच्यम्, फलानुरोधेन तत्र संस्कारकल्पनाया आवश्यकत्वेन परामर्शादेरुपेक्षात्वस्यैवासिद्धेः। नन्वनुमितेस्संस्कारजन्य त्वेऽनुमिते तस्याः स्मृतित्वापत्तिः; संस्कारजन्यज्ञानत्वस्य स्मृतित्वप्रयो जकत्वात्, अत आह संस्कारजन्यत्वेने ति। निरासा दिति। संस्का रत्वेन संस्कारजन्यत्वस्यैव स्मृतित्वप्रयोजकत्वात्, अन्यथा कालोपाधिवि धया ज्ञानान्तरे ज्ञायमानलिंगकरणतामत्रे संस्कारलिंगकानुमितौ च संस्का रस्य जनकत्वेनातिप्रसङ्गादिति भावः। प्रकृतसाम्याय कार्यानुत्पत्तिनिर्वा ह्यतावच्छेदकरूपेण प्रतिबन्धकत्वमेव प्रसंजयति स्वसमानाधिकरणे ति। पदव्यावृत्तिरनुमित्यव्यवहितपूर्ववृत्तिसिद्धिभिन्नसिद्धयभावपक्षताव द्बोध्या।

सिद्धयात्मकपरामर्शानन्तरं सिषाधयिषोत्पत्तिकाले सर्वत्र तदात्म समवेतधर्मनाशस्याप्रामाणिकत्वे यत्र न तन्नाशस्तत्र प्रथमप्रतिबन्धकता वच्छेदकावच्छिन्नस्यासत्त्वेनातिप्रसङ्गसम्भवात् कल्पान्तरमाह— स्वसमा नाधिकरणे ति। उक्तस्थले परामर्शादेरनुमित्यव्यवहितपूर्वक्षणवृत्तित्वेपि तदुत्पादक्षणस्यानुमित्यव्यवहितपूर्वत्वानधिकरणतया तद्वृत्तित्वविशिष्टत्वेन तत्परामर्शादेरेव प्रतिबन्धकत्वान्नात्र कल्पे तादृशस्थले सिषाधयिषोत्पत्ति

मित्यव्यवहितपूर्वक्षणवृत्तिभिन्नत्वेन स्वसमानाधिकरणानुमित्यव्यवहितपूर्व त्वानधिकरणक्षणवृत्तित्वाविशिष्टत्वेन वा स्वसमानाधिकरणा

कालेऽनुमितिप्रसङ्ग इति भावः । अत्रानुमितेरव्यवहितपूर्वत्वं वक्ष्यमाणं तदुत्पत्तिकक्षणोत्पत्तिकध्वंसप्रतियोगित्वम् । तत्र क्षणत्वानिवेशे अनुमित्युत्पत्त्यधिकरणमहाकालाद्युत्पत्तिकध्वंसमादाय क्षणमात्रस्यैवाव्यवहितपूर्वत्वं स्यादिति क्षणत्वनिवेशनमावश्यकम् । एवं च तदपेक्षया तादृशानुमित्युत्पत्त्यनधिकरणसमयोत्पत्तिकध्वंसप्रतियोगिस्थूलवृत्तित्वविशिष्टत्वेन प्रतिबन्धकत्वमेवोचितम् , अनुमित्युत्पत्त्यनधिकरणसमयस्य क्षणत्वेनानिवेशेऽपि क्षतिविरहात् , अनुमित्युत्पत्त्यनधिकरणस्थूलकालोत्पन्नध्वंसप्रतियोगित्वस्यानुमित्यव्यवहितपूर्वक्षणभिन्नक्षण एव सत्वात् । चरमक्षणे क्षणत्व निवेशनं चोभयत्रैवावश्यकम् । अन्यथा अनुमित्यव्यवहितप्राक्क्षणेऽपि तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वानधिकरणमहाकालादिवृत्तित्वविशिष्टसत्त्वेन अनुमित्युत्पत्त्यनधिकरणसमयोत्पन्नध्वंसप्रतियोगिस्थूलकालविशेषवृत्तित्व विशिष्टसत्त्वेन चानुमितिमात्रानुपपत्तिरित्याशयेनाह- स्वसमानाधिकरणेति।

यदि च पूर्वकल्पे क्षणत्वानिवेशेऽनुमित्युत्पत्त्युपलक्षितकालोत्पत्तिकत्वनिवेशन एवान्यकालावच्छेदेनानुमित्युत्पत्त्यनधिकरणमहाकालाद्युत्पत्तिकध्वंसमादायातिप्रसङ्गः ; न नूत्पत्तिविशिष्टसमयोत्पत्तिकत्वनिवेशे , तथा च क्षणत्वमुत्पत्त्यधिकरणकाले न निवेश्यमेवेत्युच्यते; तथाप्युपलक्षितोत्पत्तिकत्वापेक्षया विशिष्टोत्पत्तिकत्वस्य गुरुशरीरतयैव कल्पान्तरानुसरणसङ्गतिः । न चैतत्कल्पेऽप्यनुमित्युत्पत्तिविरहविशिष्टसमयोत्पत्तिकत्वमेव ध्वंसे निवेश्यम् , अनुमित्युत्पत्त्यधिकरणभिन्नोत्पत्तिकत्वनिवेशे यत्रानुमित्यात्मकपरामर्शानन्तरजातानुमित्यन्तरेच्छाबलात्पुनरनुमितिः, तत्रानुमि

[दी] नुमित्युत्पत्त्यनधिकरणसमयाव्यवहितपूर्वक्षणवृत्तित्वविशिष्टत्वेन वा प्रतिबन्धकत्वम्, तदव्यवहितपूर्वत्वं च तदुत्पत्तिक्षणोत्पत्तिक

त्सोत्पादकालस्य तत्पूर्वं परतो वाऽवस्थानावश्यकतयाऽनुमित्युत्पत्त्यधिकरणत्वनियमेन प्रथमानुमित्युत्पत्त्यधिकरणस्य क्षणस्यानुमित्युत्पत्त्यनधिकरणसमयोत्पन्नध्वसप्रतियोगितायां दुर्घटतया अनुमित्सोत्पत्तिकालेऽनुमित्यापत्तेरनुमित्युत्पत्त्यभावोपलक्षितसमयोत्पत्तिकत्वनिवेशेऽनुमित्यव्यवहितप्राक्-क्षणस्यापि तदुत्पत्त्यभावाधिकरणस्थूलकालोत्पत्तिकध्वसप्रतियोगितया तद्-वृत्तिपरामर्शादेरनुमितिविरोधित्वापत्तेः, तथा च साम्यमिति वाच्यम्; क्षणिकक्षणाभ्युपगमेऽनुमित्युत्पत्त्यनधिकरणत्वोपलक्षितसमयोत्पत्तिकत्वनिवेशेपि दर्शितस्थलेऽनुमित्सोत्पत्तिक्षणस्यानुमित्युत्पादानाधिकरणतयोक्तदोषानवकाशात्, एतत्कल्पे लाघवसम्भवात् । अनुमित्यनधिकरणत्वस्य समयविशेषणत्वेऽनुमित्युत्पत्तिक्षणस्याप्यनुमित्यधिकरणसमयविशेषं प्रत्येवाव्यवहितपूर्वतया तदुत्तरमनुमित्यापत्तिः, अतस्तदुत्पत्त्यनधिकरणत्वपर्यन्तनिवेशः । समयाव्यवहितपूर्वत्वं समयोत्पत्तिकध्वंसप्रतियोगित्वमेव; न तु वक्ष्यमाणतदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वम्, तदुत्पत्तिक्षणनिवेशप्रयोजनाभावात् । प्रागभावानभ्युपगन्तृनये तदुत्पत्तिकालीनध्वंसप्रतियोगित्वं पूर्वत्वम् । तथा च तदुत्पत्तिकालीनध्वंसप्रतियोगिकालवृत्तिध्वंसा प्रतियोगित्वरूपाव्यवहितत्वस्य स्वातन्त्र्येण निवेशनमफलम्; तदुत्पत्तिकालीनत्वस्थले तदुत्पत्तिकालीनत्वस्थले तदुत्पत्तिकालोत्पत्तिकत्वनिवेशन एव व्यवहितपूर्वकालवारणसम्भवादित्याशयेनानुमित्यव्यवहितपूर्वत्वमनुमित्युत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वरूपमेव वाच्यमित्याह– तदव्यवहिते ति । अनुमितिस्थितिक्षणोत्पन्नध्वंसप्रतियोगित्वमनुमित्युत्पत्तिक्षणसाधारणम्, अतस्तद्वृत्तित्वविशिष्टस्य विरोधित्वोपपत्तये प्रथमोत्पत्तिनिवेशः। उत्पत्तिविशिष्टोत्पत्तिकत्वनिवेशे तल्लाभायैव क्षणपदम् ।

ध्वंसप्रतियोगित्वम् । न चात्र प्रथमे यत्र सिद्धचात्मकपरामर्शा नन्तरं सिषाधयिषाया उत्पत्तिकाले तत्पुरुषीयस्य कस्यापि धर्मस्य न विनाशस्तदनन्तरमनुमितिः, तत्र तदुत्पत्तिसमयेऽपि सा स्यात्, तत्पूर्वकालीनानां सर्वेषां तादृशपूर्ववृत्तित्वेनाविरोधित्वादिति वाच्यम्; अनवरतपरिस्पन्दमानापरिमितपवनादिपरमाणुचेतनसंयोगसन्ताना-

---

द्वितीयकल्पानुसरणबीजभूतं प्रथमकल्पदोषं कथंचिदुद्धर्तुमाश- ङ्क्य नचात्रे ति । सिषाधयिषोत्पत्तिकाले कस्य चित्तदात्मवृत्तिधर्मस्य नाशे तस्यैवानुमितिपूर्ववृत्तिभिन्नत्वेन विरोधितया न सिषाधयिषोत्पत्ति कालेऽनुमित्यापत्तिसम्भव इति तदविनाशस्थलानुसरणम् । अन्यदीय धर्मनाशेपि तेन धर्मेणाप्रत्यासन्नतया अन्यदीयानुमितिप्रतिबन्धकत्वा सम्भवात् तत्पुरुषीयस्येत्युक्तम् । यद्यपि परामर्शानन्तरं सिषाधयिषो त्पादस्थले परामर्शव्यवहितप्राक्क्षणे फलेच्छावश्यमेव स्वीकार्या ; तथा च तस्या एव सिषाधयिषोत्पत्तिकालेऽवश्यं विनाशः ; तथाप्यपेक्षानु- द्धचात्मकफलज्ञानाद्यदि परामर्शोत्पत्तिकाले फलेच्छा स्वीक्रियते ; तदा परामर्शोत्पत्तिद्वितीयक्षणे आत्मधर्मविनाशो न सम्भवतीत्यभिप्राये णेदम् । अनुमितासुखत्वभ्रमदशायां फलान्तरेच्छामन्तरेणैव सुखत्वप्र- कारेणानुमितीच्छा सम्भवतीत्यभिप्रायेण वा । सिषाधयिषानन्तरमनुमित्य नुत्पादे तत्पूर्वोत्पन्नपरामर्शादेरेवानुमित्यव्यवहितपूर्ववृत्तिभिन्नतया विरोधि त्वेन नापत्तिसम्भव इत्यतस्तदनन्तरमनुमितिरित्युक्तम् ।

अनवरते ति । अनवरतपरिस्पन्दमानानां अपरिमितपवनादिपर माणूनां चेतनेनात्मना समं यः संयोगसन्तानः संयोगधारा, तदन्तर्गत व्यक्तीनां प्रतिक्षणमेव नाशादित्यर्थः । अपरिमितानामपि घटादीना

न्तःपातिव्यक्तीनामविरतमेवोपरमात् , फलानुत्पादबलेनापि तादृश कल्पनासम्भवात् , कारणान्तरकल्पने गौरवात् । अन्वयव्यभिचारसन्देहस्य कारणत्वग्रहाविरोधित्वात् । उपादीयन्तां वा तत्तदात्मसमयविशेषसम्बन्धा एव तादृशपूर्ववर्त्तिभिन्नाः,

---

मिव स्थिरत्वे सदागतिस्वभावानामपि एकद्व्यादिरूपत्वे प्रतिक्षणं न संयोगविनाशसम्भव इत्यतोपरिमितान्तम् । प्रतिक्षणमात्मसमवेतसंयोगादिनाशस्य सम्भवेन प्रामाणिकतेत्याशंक्याह— **फलानुत्पादे** ति । **कल्पनासम्भवादिति** । अनुमित्युत्पत्तेरुक्तकारणसत्वे आवश्यकतया तदनुत्पादस्य तादृशसयोगादिनाशमन्तरेणानुपपद्यमानत्वादिति भावः । ननु तत्रानुमित्यनुत्पादनिर्वाहाय सिद्धयभावादिरूपकारणान्तरमेव कल्प्यताम् ; तद्विरहेणापि तत्र तदुपपत्तेरित्यत आह— **कारणान्तरे** ति । नन्वनुमित्यव्यवहितपूर्ववृत्तिभिन्नत्वावच्छिन्नाभावस्य कारणतासिद्धौ उक्तकल्पेऽनुमित्यनुत्पादनिर्वाहाय तादृशकारणाभावोपपादकः संयोगादिनाशः कल्पनीयः; प्रथमं च तादृशकारणताग्रह एव न सम्भवति, उक्तस्थले तदानीं तादृशाभावरूपकारणसत्वस्य सन्दिग्धतया अन्वयव्यभिचारसन्देहात् , इत्यत आह- अन्वयव्यभिचारे ति । **कारणत्वग्रहाविरोधित्वा**दिति । कारणतायाः कार्यव्यापकतागर्भाया ग्रहे ग्राह्याभावावगाहितया व्यतिरेकव्यभिचारग्रहस्यैव विरोधित्वात् सामग्रीनिष्ठकार्यव्याप्तेः कार्यकारणभावाघटकतया तादृशव्याप्तिविरोध्यन्वयव्यभिचारग्रहस्य कार्यकारणभावग्रहविरोधित्वे मानाभावादिति भावः । ननु प्रतिक्षणमात्मनि संयोगादि विनाशेपि यत्र दर्शितस्थले सिद्धिरनुमितिरूपा, तत्र द्वितीयक्षणविनष्ट संयोगादेरनुमितिपूर्वमपि सत्त्वेनाविरोधितया उक्तापत्तिस्तदवस्थैवेत्यत आह **उपादीयन्ता** मिति । प्रतिबन्धकतया स्वीक्रियन्तामित्यर्थः । **समयविशेषः**— यदा तत्रात्मन्यनुमितिर्नोत्पद्यते, तदव्यवहितपूर्वक्षणरूपतत्सम्बन्धस्यानुमि

[दी] भवेद्वा तत्तत्पुरुषीयानुमितिं प्रति तत्तदीयानुमित्यव्यवहितपूर्वक्षणत्वादिना तादृशक्षणवृत्तित्वविशिष्टत्वादिना वा कारणत्वम्, तथाचोपमानादेः प्रमाणान्तरत्वं भज्येत, सर्वत्रानुमितिसामग्रीसम्भवात् ।

व्यवहितपूर्वमभावात् एवं च सति प्रतिबन्धकता स्वरूपसम्बन्धेनैव वाच्या, सर्वत्र क्षणविशेषसम्बन्धस्यैव प्रतिबन्धकतासम्भवेन सिद्धयादिसाधारण्या भावेपि न क्षतिः । क्षणसम्बन्धस्य स्वरूपातिरिक्तत्वमभ्युपेत्येदम् । अनतिरिक्तत्वाभिप्रायेणानुगतेन भेदकूटाघटितेन लघुरूपान्तरेण कारणतां प्रसंजयति– भवेद्वे ति । एकपुरुषीयानुमित्युत्पादक्षणे सर्वात्मन्यनुमित्यापत्तेर्वारणाय तत्पुरुषीयत्वनिवेशः । क्षणस्य कारणता च यदा तादृशक्षणः तदुत्तरं कार्यमिति कालिकप्रत्यासत्त्या बोध्या । तत्तदात्मसमवेतत्वावच्छिन्नं प्रति तत्तदात्मनस्तादात्म्येन हेतुतया दैशिकातिप्रसङ्गभङ्गो बोध्यः । परामर्शसाधारण्यानुरोधेनाह- तादृशे ति । तदीयानुमित्यव्यवहितपूर्वेत्यर्थः । यद्यप्यत्र पूर्वोपदर्शितस्वसामानाधिकरण्यस्यानुमितिविशेषणतयातिप्रसङ्गः शक्यवारणः, तथापि तत्र स्वत्वान्तर्भावेणानुगममाशंक्य तत्पुरुषीयत्वघटितैतत्कल्पानुसरणं बोध्यम् । नचैवं पुरुषभेदेन कारणताभेदात्सामानाधिकरण्यप्रत्यासत्त्या लिंगपरामर्शत्वसिद्धयभावत्वादिना कारणताकल्पनमेवोचितामिति वाच्यम्; लिंगपरामर्शादेरपि लिंगादिभेदेन कारणताभेदस्यावश्यकत्वात्, पुरुषापेक्षया लिंगादीनामेव भूयस्त्वात् । उक्तरूपेण कारणतास्वीकारेऽनिष्टं प्रदर्शयति- तथाचे ति । उपमानादेरित्यादिना शब्दपरिग्रहः । प्रमाणान्तरत्वम्– अनुमानबहिर्भूतप्रमाणत्वम् । सर्वत्रैवे ति । उपमानादिस्थले लिंगपरामर्शादिघटितानुमितिसामग्र्यनियमात्तत्र प्रमित्यन्तरमुपेयते, अत उपमानादेः प्रमाणान्तरता, अनुमित्युत्पत्तिमात्रनिर्वाह्यस्योक्तकारणस्यानुमितिसामग्रीत्वे तु तस्यास्सर्वत्रैव सम्भवेन उपमित्यादिरूपविलक्षणप्रमितेरेवासिद्धयापत्तेरिति

[दी] विलीयेत च परामर्शत्वादिना कारणत्वम्, बाधकत्वादिना च प्रतिबन्धकत्वम् । अनयैव रीत्या कार्यान्तरेष्वपि क्लृप्तानां कारणानां प्रतिबन्धकानां चातथात्वं क्लृप्तानांच तथात्वं प्रसज्यते । अत एव न द्वितीयोपि प्रकारः, वैयर्थ्याच्च सिद्धेः ।

भावः । ननु सर्वत्रैकजातीयप्रमितिलाभप्रसङ्गेपि उपमिनोमि शृणोमि अनुमिनोमीत्यनुभवसाक्षिकं प्रमितिवैलक्षण्यं दुरपह्नवमेवेति नोपमानादेः प्रमाणान्तरताभङ्ग इत्यतोन्यदोषमाह- विलीयेते ति । उक्तरूपेण परामर्शादेरपि कारणत्वात्- परामर्शत्वादिने ति । अनुमित्यव्यवहित पूर्ववृत्तिभिन्नत्वादिना बाधादेरपि प्रतिबन्धकत्वात्- बाधत्वादिने ति । कार्यान्तरेषु- प्रत्यक्षादिषु । कारणानाम् - सर्वसादिसिद्धकारणतावच्छेदकेन्द्रियसन्निकर्षत्वाद्यवच्छिन्नानाम् । प्रतिबन्धकानाम्- सर्वसम्मत प्रतिबन्धकतावच्छेदकदोषविशेषत्वाद्यवच्छिन्नानाम्- अतथात्वम्- अकारणत्वमप्रतिबन्धकत्वं च । अक्लृप्तानाम् । अकारणत्वादिना सर्वानुमतानां कार्यान्यव्यवहितपूर्ववृत्तिताद्भिन्नानामुदासीनवस्तूनाम् । तथात्वम् - कारणत्वादि। प्रसज्येत, तेषामप्युक्तकारणतावच्छेदकादिरूपाक्रान्तत्वादितिभावः । अतएवे ति । अनुमित्यव्यवहितपूर्ववृत्तिसिद्धिभिन्नसिद्धीनां तत्तद्व्यक्तित्वावच्छिन्नाभावस्य हेतुत्वे अनन्तकारणतापसङ्गात् तादृशसिद्धिभेदवत्सिद्धित्वावच्छिन्नाभावहेतुत्वे तस्यानुमित्युत्पत्त्यधीनतयाऽन्योन्याश्रयात् तत्सिद्धिभेदकूटवत्सिद्धित्वावच्छिन्नाभावहेतुत्वे भेदानां विशेष्यविशेषणभावे बिनिगमनाविरहादेवेत्यर्थः । एतन्मते अधिकदूषणमाह- वैयर्थ्याच्चे ति । अनुमित्यव्यवहितपूर्ववृत्तिभिन्नत्वावच्छिन्नाभावस्यैव कारणत्वसम्भवात्, बाधबुद्ध्यादेरभावस्य परामर्शाश्च कारणत्वान्तरविलयप्रसङ्गस्येष्टत्वादिति भावः । एतन्मत इव दर्शिततृतीयक्षणसाधारणाव्यवहितोत्तरत्वघटित

[दी] सिषाधयिषाविरहविशिष्टस्य सिद्ध्यनुमानातिरिक्तसाधकमानयो रन्यतरस्यामावः कारणमिति तु केचित् । तन्न; साधकमानं हि सिद्धिस्वरूपयोग्यं तदुपहितं तत्सामग्री वा ? नाद्यः; चक्षुरादि

स्वक्षणान्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नसिद्ध्यभावरूपपक्षतापक्षेपि पूर्वोक्तसिद्धिपदन्यावृत्त्यसम्भवतेस्तद्वैयर्थ्यं बोद्धव्यम् । न च ज्ञानेच्छयो र्योगपद्ये सिषाधयिषाकालोत्पन्नानुमितिपूर्ववृत्तिपरामर्शादेः सिषाधविषाविरह विशिष्टान्यवहितोत्तरक्षणोत्पन्नानुमितिकभिन्नतया पूर्वं सिषाधयिषाविरह विशिष्टतया चानुमितिविरोधिता स्यादिति तत्सार्थकमिति वाच्यम्; ज्ञानेच्छयोर्योगपद्ये सिध्युपादानेपि यत्र पूर्वोत्पन्नसिषाधयिषाचतुर्थक्षणे सिद्ध्यनन्तरं पुनस्सिषाधयिषानुमितिश्च युगपत्तत्र सिद्धेर्विरोधित्वापत्तेर्दुर्वारत्वात् । न च तत्र सिद्ध्यनुपादाने सिषाधयिषाविरहविशेषणस्यापि वैयर्थ्यमापतितम्; यत्र क्रमेण सिद्धिसिषाधयिषानुमितयस्तत्र सिद्धेरनुमित्यविरोधित्वेपि सिषाधयिषोत्पत्तिकाले विनष्टफलेच्छादीनां विरोधितयैव सिषाधयिषोत्पत्तिक्षणेऽनुमितिवारणसम्भवादिति वाच्यम् ; सिद्धेरनुमितिरूपत्वे इच्छाकालविनष्टस्य फलेच्छादेरनुमित्यन्यवहितपूर्ववृत्तितया विरोधित्वा सम्भवादिति ।

समानविषयकप्रत्यक्षादिसामग्रीकाले पक्षताविरहेणानुमितिं वारयतो मूलस्थसाधकमानपदं सिद्धिसाधकमानविशेषान्यतरपरतया वर्णयतः उपाध्यायस्य मतमाह– सिषाधयिषे ति । सिद्धाविव साधकमानेप्यनुमित्साया उत्तेजकत्वात् प्रत्येकं तदभावविशेषणत्वे गौरवमित्यन्यतरत्वावच्छिन्ने सकृत्तद्विशेषणतालाभाय समास उपेक्षितः । अनुमितिपूर्वमनुमानरूपस्यैव साधकमानस्य नियमेन सत्त्वात्सिषाधयिषां विना कदाप्यनुमितिर्न स्यादित्यनुमानातिरिक्तत्वं साधकमानविशेषणं साधकपदार्थं घटकसिद्धावनुमित्यन्यत्वविशेषणपर्यवसितम्। साधकमानपदार्थं वितर्कं दूषयति- साधकमानं ही ति। तदुपहितं-स्वजन्यसिद्धिविशिष्टम् तत्सामग्री-

[दी] सत्त्वे विनानुमित्सामनुमित्यभावप्रसङ्गात् । न द्वितीयः; सिद्धेः पूर्वं तदुपहितत्वाभावेन प्रत्यक्षसामग्रीसत्त्वेऽप्यनुमित्यापत्तेः, अनुमानातिरिक्तेत्यस्य वैयर्थ्याच्च ।

सिद्धिकारणसमुदायः । अनुमित्सासत्त्वे तदभावविशिष्टसाधकमानाभावस्याक्षतत्वात् विनानुमित्सा मिति । अनुमित्यभावप्रसङ्गादिति । कालिकप्रत्यासत्त्या प्रतिबन्धकत्वाभिप्रायेण । समवायेन प्रतिबन्धकत्वे आत्मनि सर्वदैव चक्षुरादिप्रमाणाभावादतिप्रसङ्गो बोध्यः । प्रत्यक्षसामग्रीसत्त्वे अनुत्पन्ने प्रत्यक्ष इति शेषः । ननु तत्रानुमितिवारणायान्यदेव प्रतिबन्धकमास्थेयम् ; सिद्धयभावपक्षतामतेपि तदावश्यकत्वादित्यत आह— अनुमानातिरिक्ते ति । तथासति पक्षताशरीरे अनुमानातिरिक्तसाधकमानान्तर्भावस्य निष्फलत्वादित्यर्थः । सिद्धयसमवहितसामग्रीदशायां अनुमितिवारणस्यैव तत्फलत्वात् साधकमानपदेन सिध्युपहितविवक्षणे च तदनिर्वाहादिति भावः । केचित्तु यथाश्रुतानुरोधेनानुमानातिरिक्तेति तन्मात्रपरमेव, न च सामग्र्याः पृथक्प्रतिबन्धकत्वे साधकमानपदार्थस्य सिध्युपहितस्यापि निवेशनमफलमेवेति वाच्यम् ; यत्र विषये प्रत्यक्षाद्युपहितसन्निकर्षादिघटितप्रत्यक्षादिसामग्रीदशायामेव परामर्शादिसमवधानं तत्रानुमितिवारणाय तादृशसाधकमानस्यैव पक्षतायां निवेशयितुमुचितत्वात् । न च तत्रापि सिद्धिप्रतिबन्धकतयैवोपपत्तौ सिध्युपहितत्वनिवेशनमफलमिति वाच्यम् ; शाब्दसिद्धिकालेऽशाब्दं ज्ञानं जायतामितीच्छाबलादनुमित्युपपत्तये सिद्धौ तादृशेच्छाया अवश्यमुत्तेजकत्वोपगमात्तथाविधेच्छाबलादुपदर्शितप्रत्यक्षसामग्र्यनन्तरमनुमितेर्वारणाय साधकमानान्तर्भावस्यार्थक्यात् । न च सिध्युपहितचक्षुस्संयोगादिसत्त्वे आलोकसमवधानासत्त्वे तादृशेच्छानन्तरमनुमित्युत्पत्त्या साधकमानेपि तादृशेच्छाया उत्ते

[दी] न तृतीयः; अनुमितिसामग्र्यभावत्वेन प्रत्यक्षकारणत्वं अनुमित्साविरह विशिष्टप्रत्यक्षसामग्र्यभावत्वेन चानुमितिकारणत्वमित्यन्योन्याश्रयात् ,

---

जकतायां आवश्यकत्वात् पक्षतायां तदन्तर्भावेपि उक्तापत्तिवारणासम्भव इति वाच्यम् ; यत्र विषयविशेषे प्रत्यक्षोपहितचक्षुस्संयोगादिसत्वे इतर कारणसमुदायसत्व एवाशाब्दं ज्ञानं जायतामितीच्छा, न त्वितरकारणाभावविशिष्टतादृशचक्षुस्संयोगादिसत्वे, तत्र तादृशेच्छाभावस्य प्रत्यक्षोपहितचक्षुस्संयोगादिरूपसाधकमानविशेषणत्वानुपगमात्तादृशविषयविशेषीय - पक्षतायामेव तथाविधसाधकमानान्तर्भावस्य सार्थक्यादिति भाव इत्याहुः ।

अनुमितिसामग्र्यभावत्वेन प्रत्यक्षकारणत्वमिति । अन्यथाऽनुमित्साधीनानुमित्युत्पादकाले प्रत्यक्षापत्तेरिति भावः । **प्रत्यक्षसामग्र्यभावत्वेनसिद्धिप्रत्यक्षसामग्र्यन्यतराभावत्वेन । अन्योन्याश्रया दिति** । अनुमितिसामग्र्यभावं प्रत्यक्षकारणकलापान्तर्गमज्ञात्वा प्रत्यक्षसामग्र्या अज्ञानात् तदज्ञाने च तदभावघटितानुमितिसामग्र्या अज्ञानेन तदभावाज्ञानादिति भावः । अथ वा कारणसमुदायत्वेन सामग्र्या निवेशे समुदायभेदस्य प्रत्येकं सकलकारणेष्वेव सत्वाद्व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकभेदानुपगमे सामग्र्यां सामग्रीभिन्नभिन्नत्वं दुर्घटमिति कार्याव्यवहितप्राक्क्षणावच्छिन्नत्वेनैव सा निवेश्या, अव्याप्यवृत्तिधर्मावच्छिन्नभेदस्याव्याप्यवृत्तितामभ्युपेत्य अन्यदा कार्याव्यवहितप्राक्क्षणावच्छिन्नभेदवत्त्वं कार्यव्यवहितप्राक्क्षणे च तादृशभेदावच्छिन्नभेदवत्त्वं फलोपधायकस्योपपादनीयम् , तथा च परामर्शादिसत्वे प्रत्यक्षोत्पत्तिकाले अनुमित्यनुत्पादः प्रत्यक्षोत्पादनिर्वाह्यः, उक्तानुमितिप्रतिबन्धकस्य प्रत्यक्षोत्पत्तिमन्तरेणानिर्वाहाद् , प्रत्यक्षोत्पत्तिरप्यनुमित्यनुत्पादमपेक्षते; तदुत्पादे अनुमित्यव्यवहितप्राक्क्षणावच्छिन्नस्य प्रत्यक्षप्रतिबन्धकस्यावश्यं सत्वादित्यन्योन्याश्रय इति

[दी] स्थाणुत्वाभावव्याप्यदर्शनक्षणे च प्रतियोग्यारोपविरहेणाभावप्रत्यक्ष सामग्रीविरहात; पक्षतासत्त्वे स्थाणुत्वारोपक्षणे तदभावानुमित्यापत्ते श्चेत्यपि केचित् । वस्तुतस्तु स्वतन्त्रान्वयव्यतिरेकशालित्वात्

भावः । अत्रैव कल्पे अन्येषां दूषणमुपन्यस्यति । स्थाणुत्वाभावे ति। स्वोक्तदोषस्याप्येतदनुमततया चकारसङ्गतिः । यत्र विशेषदर्शनानन्तर क्षणजातप्रतियोग्यारोपात् स्थाणुत्वाद्यभावप्रत्यक्षं तत्रेत्यादिः । तदभावा नुमित्यापत्तेः- स्थाणुत्वाद्यभावानुमित्यापत्तेः । तथा चानुमित्यन्यसिद्धि सामग्रचभावस्य कार्यकालवृत्तितया पृथगेव कारणत्वमावश्यकमिति भावः। प्रतियोग्यारोपकारणतायाः स्वासम्मततया के चिदि ति । ननु पक्षता घटकप्रत्यक्षसामग्री नानुमितिसामग्रचभावघटितकारणसमुदायरूपा; अपि तु तदतिरिक्तप्रत्यक्षासाधारणकारणसमुदायरूपैव वाच्या, अनुमित्साविशिष्टसमानविषयकानुमितिसामग्रीदशायां सिषाधयिषारूपोत्तेजनकबलादेवानुमित्युपपत्तेः । एवं प्रत्यक्षं प्रत्यनुमितिसामग्रीप्रतिबन्धकतायामपि निरुक्त पक्षता न निवेश्यते; अपि तु लाघवादनुमित्सावैशिष्ट्यमेव, असत्यामनुमित्सायां समानविषयकप्रत्यक्षोत्पत्तेरावश्यकत्वात् , तत्सत्त्वे च पक्षता या आवश्यकत्वात् । तथा च न प्रथमोक्तान्योन्याश्रयावकाशः ।

एवं सामग्र्याः कार्याव्यवहितप्राक्क्षणावच्छिन्नत्वेन प्रतिबन्धकत्वेपि समान विषयकप्रत्यक्षप्रतिबन्धकतायां अनुमित्सावैशिष्ट्यं निवेश्यते, तथाचोक्त स्थले प्रत्यक्षोत्पत्तिर्नानुमित्यनुत्पादमुपजीवति , अनुमित्युत्पादेपि अनुमित्साविरहेण प्रत्यक्षप्रतिबन्धकासत्वात् , अपित्वनुमित्साविरहमेवेति नापरोप्यन्योन्याश्रयः, अन्यथा सामग्र्याः पक्षतायामनन्तर्भावेपि पृथक्प्रतिबन्धकताया आवश्यकत्वेनानिस्तारादित्यत आह– वस्तुतस्त्विति । स्वतन्त्रान्वयव्यतिरेकशालित्वं–सिद्धित्वादिरूपप्रत्येकवृत्तिधर्मावच्छेदेन

[दी] नियमेन प्रथमोपस्थितत्वाल्लाघवाच्च प्रत्येकमेव तथात्वमन्यथा बाधादेरप्यत्रैवान्तर्भावप्रसंगात् ।

कार्यानुत्पादं प्रत्यन्वयव्यतिरेकानुविधायित्वम् । नन्वन्यतरत्वेन प्रतिबन्धकत्वेपि तन्नियतसिद्धित्वाद्यवच्छिन्नस्य कार्यानुत्पादान्वयनियतत्वं तदवच्छिन्नव्यतिरेकस्य च कारणान्तरपरामर्शादिसहितस्य कार्योत्पादनियतत्वं सम्भवतीति न तावता सिद्धित्वादिना प्रतिबन्धकतासिद्धिरित्यतो हेत्वन्तरमाह - नियमेने ति । प्रथमोपस्थितत्वात्— प्रत्येकरूपावच्छिन्नस्य तदवच्छिन्नान्यतरत्वापेक्षया प्रथममुपस्थितत्वात् । उपस्थितिलाघवमुक्त्वा शरीरलाघवमाह - लाघवा दिति । उक्तरूपद्वयमप्यपेक्ष्य तदन्यतरत्वस्याधिकभेदादिघटितत्वया गुरुत्वादिति भावः । प्रत्येकम्- सिद्धित्वादिना । तथात्वम्— प्रतिबन्धकत्वम् । अन्यथा- प्रतिबन्धकतैक्यानुरोधेन नानाधर्मावच्छिन्नानां तत्तदवच्छिन्नभिन्नभिन्नत्वेन प्रतिबन्धकत्वे । बाधादेरित्यादिना सत्प्रतिपक्षादिपरिग्रहः । अत्रैव— पक्षतायामेव । अन्तर्भावप्रसङ्गात्— घटकताप्रसङ्गात् । सिद्धिबाधसामग्रीविशेषाजन्यतमत्वावच्छिन्नाभावस्य पक्षतात्वप्रसङ्गादिति समुदयार्थः । अन्यथा बाधबुद्ध्याद्यभावस्य कारणत्वान्तरकल्पनापत्तेरिति भावः । न च वह्न्यादिनिश्चयाप्रतिबद्धायामपि वह्निमान्पर्वतो घटवानित्याद्यनुमितौ वह्न्यभावादिनिश्चयस्य प्रतिबन्धकतया वह्न्यादिप्रकारताघटितरूपावच्छिन्नं प्रति वह्न्यभावादिनिश्चयस्य प्रतिबन्धकत्वान्तरमावश्यकमिति कथं सा ध्यतदभावादिनिश्चयानामेकरूपेण प्रतिबन्धकत्वप्रसक्तिरिति वाच्यम् ; वह्न्यादिप्रकारकानुमितौ वह्न्यभावादिनिश्चयस्य पृथक्प्रतिबन्धकत्वविरहेपि वह्निमान्पर्वतो घटवानित्याद्यनुमितिहेतुपक्षतायां आश्रयासिद्ध्यादिनिश्चयान्तर्भावेणैव तादृशनिश्चयदशायां तथाविधानुमितिवारणसम्भवात् ,

अवच्छेदकगौरवस्य भवतैवाप्रयोजकीकृतत्वात् । न च तथापि बाधकाले प्रत्यक्षादेरप्यनुत्पत्त्या विशिष्टबुद्धिसामान्यं प्रति बाधबुद्धेः प्रतिबन्धकत्वान्तरकल्पनमावश्यकमिति पक्षतायां तदन्तर्भावो निरर्थक इति वाच्यम् ; तत्रापि भिन्नविषयकानुमितिसामग्र्यादीनां अवश्यकल्पनीय प्रतिबन्धकतायां बाधसाधारणान्यतरत्वादेरवच्छेदकतयैवोपपत्तेः । बाधबुद्धे स्सामान्यप्रतिबन्धकत्वासिद्धेः । प्रत्यक्षस्थले इच्छानामुत्तेजकतयापि तद सिद्धेः । केचित्तु- अत्रैव- ईदृशप्रतिबन्धकतायामेव ; प्रतिबन्धकान्तर साधारणान्यतरत्वावच्छिन्नप्रतिबन्धकतायामेवेति यावत् , अन्तर्भावप्रस ङ्गात्— अवच्छेदकघटकतप्रसङ्गात् ; तदभावव्याप्यवत्तादिज्ञानादिसाधा रणान्यतरत्वेनैव बाधादेः प्रतिबन्धकताप्रसङ्गादिति समुदायार्थः , तथा च पक्षतायां बाधान्तर्भावपरत्वाभावात् नोक्ताक्तिप्रसङ्ग इति व्याचक्षुः । केचित्तु तदभावनिश्चयदशायां यादृशांकुरविशेषधर्मितावच्छेदककान्यानु मितेः कारणान्तरविरहादेव नियमतोनुत्पादः ; तत्साध्यकस्थलाभिप्रायक एवायं ग्रन्थ इत्याहुः ।

ननु सिद्धिसामग्रीविशेषयोरुभयोरेवानुमित्साया उत्तेजकतया तयो रनुगतरूपेण प्रतिबन्धकत्वे अनुमित्साविरहस्यान्यतरत्वावच्छिन्ने सङ्कु द्धिशेषणतया लाघवम् ; अनुमित्साविरहविशिष्टसिद्धिसामग्र्यन्यतरत्वापेक्षया तद्विशिष्टसिद्धित्वतद्विशिष्टसिद्धिविशेषसामग्रीत्वयोर्द्वयोरेकस्यापि विशेषणस्य द्विधा निवेशेन गौरवात् । अन्यतरत्वघटकाधिकांशापेक्षया सिषाधयिषा विरहांशस्य गुरुतायाः स्फुटत्वात् । अत एव बाधान्तर्भावेण प्रति बन्धकत्वापत्तिरूपप्रतिबन्देरपि नावसरः, बाधसिद्धितद्विशेषसामग्र्यन्यतम त्वेन प्रतिबन्धकत्वे अनुगतरूपावच्छिन्नांशे सिषाधयिषाविरहविशेषणतायां सिद्ध्यादिकाले इव बाधकालेप्यनुमित्सावलादनुमित्यापत्तेः । सिद्धित्वा वच्छिन्न एव पृथक्त्वद्विशेषणतया उक्तलाघवानवकाशात । विशिष्ट

[दी] न चानुमित्साविरहस्य प्रत्येक विशेषणत्वे गौरवम् ; शाब्दसिद्धौ सत्यामशाब्द ज्ञान जायतामितीच्छायानुमितेरुत्पादात्। सिद्धावनुमितिविषयकेच्छाविरहस्य प्रत्यक्षसामग्रीसत्त्वे च तादृशेच्छायामनुमित्यनुत्पादात् । साधकमाने अनुमितित्वादिप्रकारके च्छाविरहस्य पृथगेव विशेषणतायास्त्वयापि वाच्यत्वात्

बुद्धिसामान्ये बाधतदभावव्याप्यवत्ताज्ञानादीनामेकरूपेण प्रतिबन्धकत्वे उक्तदिशा लाघवासम्भवेनावच्छेदकगौरवस्य दुष्परिहरत्वात् । न च प्रत्यक्ष स्थले बाधबुद्धौ तदभावव्याप्यवत्तादिबुद्धौ चेच्छाया उत्तेजकतया तत्रा नुगतरूपेण तयोः प्रतिबन्धकत्वे इच्छाविरहस्य सकृद्विशेषणतया लाघव मक्षुण्णमेवेति वाच्यम् ; बाधादौ प्रत्यक्षेच्छाया उत्तेजकत्वे नानाप्रतिबन्ध कताप्रसङ्गेन तदनभ्युपगमात् । अनाहार्यत्वस्य प्रतिबद्धयताव च्छेदकत्व मङ्गीकृत्यैव बाधादिसमये आहार्यप्रत्यक्षस्योपपादनीयत्वादित्याशङ्कां निर स्यति- नचेत्यादिना । गौरवमित्यन्तमाशङ्का । **अनुमितेरुत्पादा** दिति । प्रत्यक्षादिसामग्र्यसत्वे अनुमित्युत्पत्त्यैव तादृशेच्छाविषयसिद्धेरिति भावः । **अनुमितिविषयकेच्छाविरहस्य**— अनुमितित्वाप्रकारकतादृशेच्छासाधा रणानुगतरूपावच्छिन्नविरहस्य । तादृशं च रूपं प्रागेवावेदितम् । **अनुमि त्यनुत्पादा** दिति । प्रत्यक्षोत्पत्त्यापि तादृशेच्छाविषयसिद्धेरिति भावः । **अनुमितित्वादिप्रकारकेच्छाविरहस्य**– अनुमितित्वप्रत्यक्षान्यज्ञानत्वादि प्रकारकेच्छात्वावच्छिन्नाभावस्य । **पृथगेव**— यथायोगं सिद्धित्वप्रत्यक्षसाम ग्रीत्वाद्यवच्छिन्न एव । नन्वनुमितित्वादिप्रकारकतदप्रकारकेच्छानामनुगत रूपावच्छिन्नाभाव एवान्यतरत्वावच्छिन्ने विशेषणं वाच्यम् , प्रत्यक्ष सामग्रीदशायामुक्तेच्छाबलादनुमितेर्वारणाय चानुमितिभिन्नालौकिकप्रत्यक्षा न्यस्वविषयतावच्छेदकावच्छिन्नसामग्रीसमवहितान्यत्वेनेच्छा विशेषणीया,

[दी] स्वनिवर्तकप्रत्यक्षादिसामग्रीसमवहितान्यत्वादिना च तादृशे च्छयोरनुगमेऽतीव गौरवम् । अन्यतरत्वघटकयोरन्योन्याभावयोः

अनुमितिसामग्र्या उपनीतभानसामग्र्या च समवहिताया इच्छायाः संग्रहाय भेदद्वयमवच्छिन्नान्तविशेषणम् , अनुमितित्वादिप्रकारिकायाः प्रत्यक्षादिसामग्रीसमवहितेच्छायाः संग्रहायावच्छिन्नान्तम् , एवं चोक्तलाघवमक्षुण्णमेवेत्यत आह— स्वनिवर्तके ति । निवर्तकत्वं विषयतया बोध्यम् । अतीवगौरवमि ति । अतिगुरुशरीरत्वादृशेच्छाविशेषणस्याधिक्यस्य निवेशादिति भावः । नन्वेवमपि प्रतिबन्धकैक्यनिबन्धनलाघवं दुर्वारमेव , प्रतिबन्धकत्वान्तराकल्पने एकत्रावच्छेदकगौरवस्यार्किंचित्करत्वात् , अनेकत्र पक्षतायामेकैकविधबहून्यभावादिनिश्चयानां अन्तर्भावे अनन्तस्थलेऽवच्छेदकगौरवात् , स्वातन्त्र्येणैव तत्प्रतिबन्धकताकल्पनस्योचिततया बाधादेः पक्षतान्तर्भावप्रतिबन्देरनवकाशात् , प्रतिबन्देरनुत्तरत्वाच्च, इत्याशयेन अन्यतरत्वेन प्रतिबन्धकतामतेपि विनिगमनाविरहेण प्रतिबन्धकताद्वयमापादयति- अन्यतरत्वे ति । अन्योन्याभावयोः- सिद्धिभेदसामग्रीभेदयोः । तथा च सिद्धिभेदविशिष्टसामग्रीभेदादवच्छिन्नभेदः सामग्रीभेदविशिष्टसिद्धिभेदावच्छिन्नभेदश्च विनिगमनाविरहात् प्रतिबन्धकतावच्छेदक इत्यवच्छेदकभेदात्प्रतिबन्धकताभेद आवश्यकः । न च तादृशभेदयोः समनियततया अभेदान्नावच्छेदकभेद इति वाच्यम्; तादृशभेदाभेदेपि तस्य सिद्धिभेदविशिष्टसामग्रीभेदावच्छिन्नभेदत्वेन सामग्रीभेदविशिष्टसिद्धिभेदावच्छिन्नभेदत्वेन च विनिगमनाविरहेण अवच्छेदकतायाः स्वीकरणीयतया विशिष्टस्यावच्छेदकत्वस्य अवश्यं भेदात् । न चाखण्डस्य तस्य स्वरूपत एवावच्छेदकतासम्भवादुक्तविशेषणपुरस्कारेण नावच्छेदकत्वमिति कथं विनिगमनाविरह इति

[दी] मिथो विशेषणविशेष्यभावे विनिगमकाभावश्च । आत्मनिष्ठश्च

वाच्यम्, अभावस्याखण्डत्वेपि स्वरूपतोऽवच्छेदकतायाः सिद्धान्तविरुद्धत्वात्, यस्य स्वरूपतो भानं तस्यैव तथावच्छेदकतयाः सिद्धान्तसिद्धत्वात् । विशेषणपुरस्कारेणोपस्थितेऽवच्छेदकत्वग्रहस्य विशेषणावच्छिन्नेऽवच्छेदकत्वावगाहित्वनियमात् । किंचिद्रूपेण भासमाने स्वरूपतोऽवच्छेदकत्वस्य प्रमाणेनास्पर्शाच्च । न च तद्व्यक्तित्वेनैव भेदस्यावच्छेदकत्वं स्वीकरणीम्; न तु स्वरूपतः; तथा च नोपदर्शितविनिगमनाविरह इति वाच्यम्; भेदनिष्ठतद्व्यक्तित्वस्य भेदस्वरूपातिरिक्तस्य दुर्वचत्वात्, भेदस्वरूपस्य च तस्य स्वरूपतो निवेशासम्भवात् । एते नाखण्डस्यान्यतरस्यावच्छिन्नाभावस्य तद्व्यक्तित्वेनैव हेतुत्वमित्यपि परास्तम्।

यत्तु सिद्धिभेदसामग्रीभेदयोस्सामानाधिकरण्येन मिथो विशेष्यविशेषणभावापन्नयोर्न भेदप्रतियोगितावच्छेदकत्वम्; येन विनिगमनाविरहः स्यात्; अपि तु धर्मिविशेषणतापन्नयोरेव व्यासज्यवृत्त्यवच्छेदकत्वं, तथाविधयोरप्यवच्छेदकतापर्याप्तसमहानसीयवह्निर्नास्तीत्यादिप्रतीत्यावगाहनादिति; तदपि न; महानसीयवह्निर्नास्तीत्यादिबुद्धौ वह्नित्वाद्येक धर्मितावच्छेदकावच्छिन्न एव महानसीयत्वाद्यपरविशेषणभाननियम इत्येकत्रानेकेषामवच्छेदकत्वे ग्राह्ये धर्मितावच्छेदकावच्छिन्नविशेषणतापन्नस्यैवावच्छेदकताग्रहः, न तु धर्मितावच्छेदकावच्छिन्नविशेषणतानापन्नस्यावच्छेदकताग्रह इति नियमेन प्रकृते कस्य धर्मितावच्छेदकतापन्नस्य कस्य वा तदवच्छिन्नविशेषणतानापन्नस्यावच्छेदकत्वमित्यत्र विनिगमनाविरहेणावच्छेदकताभेदस्यावश्यकत्वात्, अवच्छेदकविषयतावैलक्षण्यस्यावच्छेदकतावैलक्षण्यनियतत्वादित्यन्यत्र विस्तरः । अन्यतरत्वेनोभयोरनुगमेपि प्रतियोगितावच्छेदकसम्बन्धाननुगमात् न तयोरेकाभवस्य कारणतासम्भव इत्याह· आत्मनिष्ठ इति । समवायसम्बन्धावच्छिन्नप्रतियोगि

[दी] समवायेन सिद्धेरभावः कारणं; भिन्नभिन्नेन च सम्बन्धेन तत्तदसाधारणकारणरूपायास्तत्सामग्र्याः मणिविशिष्टस्य वह्नेरिवेतरेतरविशिष्टस्य मनोयोगादेः प्रतिबन्धकत्वायोगात् । तथा च कथ

ताकः सिद्ध्यभावः आत्मप्रत्यासन्नतया कारणं प्रत्यक्षासाधारणकारण चक्षुस्संयोगादिरूपानानुग्र्यास्तु स्वाश्रयसंयुक्तमनस्संयोगादिरूपपरम्परात्मकभिन्नसम्बन्धावच्छिन्नाभाव एवात्मप्रत्यासन्नतया कारणं वाच्यमित्यर्थः। विषयचक्षुस्संयोगादेस्समवायेनाभावस्य सर्वदैवात्मनि सत्वात्तादृशाभाव कारणताया अतिप्रसङ्गावारकत्वादितिभावः । ननु विषयचक्षुस्संयोगादेर्न प्रतिबन्धकत्वं स्वीक्रियते; येन सम्बन्धाननुगमस्स्यात्, किं तु चक्षुस्संयोगादिविशिष्टस्य मनोयोगस्यैव समवायेन प्रतिबन्धकत्वं वाच्यमित्यत आह- मणी ति। वह्नेरित्यनन्तरं दाहं प्रतीति मनोयोगादेरित्यनन्तरं प्रकृत इति पूरणीयम् । प्रतिबन्धकत्वायोगा दिति । मनोयोगस्यानुमितावपि हेतुत्वात् कारणस्यप्रतिबन्धकत्वायोगादितिभावः। यद्यपि कारणस्यापि रूपान्तरेण प्रतिबन्धकत्वे क्षतिविरहः दाहप्रतिबन्धकत्वे च वह्नेः प्रयोजनविरहादेवानिवेशः, प्रकृते तु सम्बन्धैक्यानुरोधेनैव मनोयोगादेरनुप्रवेश इत्यकिंचित्करमेतत्; तथापि मनोयोगस्याधिकस्य निवेशनीयतया गौरवमेव बाधकं बोध्यम् । न च सामग्र्यास्स्वतन्त्रप्रतिबन्धकत्वमतेपि आत्मनिष्ठतासम्पत्तये चक्षुस्संयोगादेः सम्बन्धतया मनोयोगादिप्रवेशस्यावश्यकत्वान्नाधिक्यमेतन्मतेपि कालनिष्ठतया सामग्र्याभावहेतुत्वे तत्तत्पुरुषीयत्वनिवेशस्यावश्यकतया गौरवा दिति वाच्यम्; तथापि मनोयोगादिसम्बन्धस्याधिकस्य निवेशनीयतया गौरवस्य दुर्वारत्वात् । विषयभेदेन प्रतिबन्धकताभेदविरहानुरोधेन विषयप्रत्यासन्नतया चक्षुस्संयोगादिप्रतिबन्धकतापक्षस्यैव स्वतन्त्रसामग्रीप्रतिबन्धकतावादिभिराश्रयणीयतया तत्र मनोयोगादिनिवेशाभावाच्च । तथाचेति।

[दी]मनुगतरूपेण तयोरभावः कारणं एवं सिद्धेः सिषाधयिषाविरहेण वैशिष्ट्यमेककालावच्छेदेनैकात्मवृत्तित्वं प्रत्यक्षादिकारणचक्षुस्संयो-

---

एवंरीत्या प्रतिबन्धकतावच्छेदकसम्बन्धभेदस्यावश्यकत्वे चेत्यर्थः । पूर्वं प्रतियोगितावच्छेदकभेदेन सिद्धिसामग्रीविशेषणयोः सिषाधयिषाविरहपदार्थयोर्भेदात्तद्विशेषणप्रवेशपार्थक्य व्यवस्थापितं इदानीं सम्बन्धभेदेन तद्विशेषणतां भेदं व्यवस्थापयति- एव मिति । एककाले ति । एकक्षणावच्छिन्नमेकात्मसमवेतत्वमित्यर्थः । यद्यपि सम्बन्धमध्ये एकक्षणावच्छिन्नत्वानन्तर्भावेपि सिषाधयिषाकाले तद्विरहरूपविशेषणाभावायत्तो विशिष्टाभावोक्षत एव; न च कालानन्तर्भावे सिषाधयिषाकालेपि सिद्धौ कालान्तरावच्छिन्नतद्विरहवत्यात्मनि वृत्तित्वरूपवैशिष्ट्यं वर्तते; अन्यात्मनि घटादौ च तादृशविशेषणं चेति विशिष्टसिद्धिसत्त्वगव्याहतमिति कथं विशिष्टाभावेन बर्तितव्यं? तत्कालान्तर्भावे तु तादृशकालाभावान्न तदानीं तद्घटितवैशिष्ट्यमिति विशिष्टासत्त्वाद्विशिष्टाभावोऽक्षत इति वाच्यम् ; सिषाधयिषाकालस्य तदधिकरणनिष्ठतदभावाधिकरणतानवच्छेदकतया तादृशाधिकरणताघटितसामानाधिकरण्यरूपतदिच्छासमानाधिकरणसिद्धिनिष्ठवैशिष्ट्येप्यनवच्छेदकत्वात् तत्कालावच्छेदेन सिद्धिमत्यपि तदिच्छाधिकरणे इच्छाविरहविशिष्टसिद्धिसत्त्वानुपपत्तेः, अन्यथा स्वाधिकरणकालावच्छिन्नत्वस्य स्वाधिकरणवृत्तितावि़शेषणत्वेपि तत्कालस्याप्यन्याधिकरणावच्छिन्नस्वाधिकरणतया कालविरहप्रयुक्तवैशिष्ट्यविरहस्यानिर्वाहात् विशेष्यीभूततत्सिद्ध्यधिकरणावच्छिन्नस्वाधिकरणकालत्वेन कालस्य सम्बन्धघटकत्वे चाननुगमादिति; तथापि विभिन्नकाले विशेषणविशेष्ययोः सामानाधिकरण्यसत्वेपि एकक्षणावच्छेदेन सामानाधिकरण्यस्यैव विशिष्टसत्वनिर्वाहकत्वमित्येतत्सूचनायैव एककालावच्छिन्नत्वकथनम् । केचित्तु कालस्य विशिष्टाभाव

[दी] गादेस्त्वन्यादृशमिति सामग्रीविशेषाभावस्य हेतुत्वेपि लाघवात्सिद्ध्यभाव एव पक्षव्यवहारनिमित्तम् । एतदेवाभिसंधाय प्रवृत्तिनिमित्तमुक्तमिति वक्ष्यति । फलानुपहितसिद्धीच्छाविरहविशिष्टसिद्ध्यभावापेक्षया बाधाभावस्य लघुत्वेपि सिद्धसाधनस्थले पक्षव्यवहारविरहेण तादृशसिद्ध्यभावस्यावश्यकत्वे बाधाभावो न

प्रतियोगितावच्छेदकतावच्छेदकसम्बन्धघटकत्वे तदुपलक्षितताभावात् तद्विशिष्टाभाववैलक्षण्यानिर्वाहः; प्रतियोगितावच्छेदकावैलक्षण्यात्, सर्वदा दण्डरहितपुरुषाधिकरणे दण्डोपलक्षितपुरुषाभावस्य सत्वे शुद्धपुरुषत्वादिमात्रस्य तत्प्रतियोगितावच्छेदकत्वासम्भवात्, तादृशपुरुषान्तरव्यावर्तकानुगतधर्मान्तरविरहेण सत्वे वा प्रतियोगिकोटौ तस्याप्रवेशेन प्रतियोगितावच्छेदके तदन्तर्भावासम्भवादित्याहुः; तच्चिन्त्यम् । अन्यादृश मिति । स्वाश्रयीभूतात्मन्युक्तपरम्परासम्बन्धेन सम्बन्धत्वरूपमित्यर्थः । ननु पक्षताशरीरे प्रत्यक्षादिसामग्र्यनन्तर्भावे तदभावस्यानुमितौ स्वतन्त्रहेतुताकल्पनमावश्यकम्, तथा च तस्यैव पक्षपदप्रवृत्तिनिमित्तता स्वीक्रियताम्; न तु सिद्ध्यभावस्य, तथा च पक्षपदप्रवृत्तिनिमित्तमिदमिति मूलविरोध इत्यत आह- सामग्री ति । हेतुत्वेपि- अनुमित्यसाधारणकारणत्वेपि । लाघवात्- लघुशरीरत्वात् । ननु लाघवस्य पक्षपदप्रवृत्तिनिमित्तत्वोपष्टम्भकत्वे बाधाभावस्यैव तथात्वमुचितम्; सिषाधयिषाविरहाप्रवेशात्, यदि च सिद्धसाधनस्थले पक्षव्यवहारो नास्तीति सिद्ध्यभावस्य तथात्वमित्युच्यते; तदा बाधदशायामपि तद्विरहात् सोपि निवेश्यतामित्यत आह- फलानुपहिते ति । स्वविषयसिद्ध्यनुपहितेत्यर्थः । एतच्चातिगौरवसूचनाय । सिद्धसाधनस्थले- साध्यनिश्चयदशायाम् । पक्षव्यवहारविरहेण- पक्षव्यवहारविर

निविशते गौरवात् । विशिष्टसिद्धयभावस्य चात्मनिष्ठस्यैवानु
मितिहेतुत्वेपि तस्य परम्परासम्बन्धादेव पर्वतादौ पक्षव्यवहार

हस्य सर्ववादिसिद्धत्वेन । गौरवादिति । बाधस्थले पक्षव्यवहारविरहस्य सविवादतया गौरवसहिष्णुताया अन्याय्यत्वादिति भावः । ननु समवाय सम्बन्धावच्छिन्नसिद्धयभावस्यात्मप्रत्यासन्नतयैव अत्रानुमितिहेतुतया तस्य पक्षपदप्रवृत्तिनिमित्तत्वे आत्मन्येव पक्षव्यवहारप्रसङ्ग इत्यत आह- विशिष्टेति । सिषाधयिषाविरहविशिष्टेत्यर्थः । एतदभिधानं च सिद्धेः पक्षनिष्ठाया उद्देश्यतासम्बन्धेनानुमितिप्रतिबन्धकत्वसम्भवप्रदर्शनाय । पर्वते वह्निमनुमिनुयांमहानसेवह्निमनुमिनुयामित्याद्याकारकानुमित्सानामेकत्रोत्तेजकत्वेऽतिप्रसङ्गेन पृथगेषोत्तेजकतया पक्षभेदेन कारणताभेदस्यावश्यकतयात्मनिष्ठप्रत्यासत्तेरेवोचितत्वात् । अन्यथा पुरुषविशेषणामन्तर्भावनीयतया गौरवात् । समानप्रकारिकाया असमानविशेष्यकसिद्धेरनुमितिप्रतिबन्धकतयापि पक्षनिष्ठप्रत्यासत्त्यसम्भवो बोध्यः । परम्परासम्बन्धादिति । स्वप्रतियोगितावच्छेदककोटिप्रविष्टविशेष्यतावच्छेदकवत्त्वरूपादित्यादिः । न च सिद्धिकालेपि पक्षे एतादृशसम्बन्धेन सिद्धयभावो वर्तते; अत्यन्ताभावस्य नित्यत्वादित्यतिप्रसङ्ग इति वाच्यम्; तत्तदात्मवृत्तित्वविशिष्टस्यैव सिद्धयभावस्य तादृशसम्बन्धेन तत्पुरुषं प्रति पक्षव्यवहारनियामकत्वात् ।

ननु विषयचक्षुस्संयोगादिरूपायाः प्रत्यक्षसामग्र्याः आत्मनिष्ठप्रत्यासत्त्या न प्रतिबन्धकतासम्भवः; उक्तपरम्परायाः अतिप्रसक्तत्वात् सम्बन्धत्वे मानाभावाच्च, तथा च यदा तादृशसामग्री तदुत्तरक्षणे नानुमितिरिति कालिकप्रत्यासत्त्यैव प्रतिबन्धकत्वं कल्पनीयम्; तथा च पुरुषान्तरीयप्रत्यक्षसामग्र्यापि पुरुषान्तरीयानुमितिप्रतिबन्धः स्यात्, एवं कालिकसम्बन्धावच्छिन्नानुमित्साविरहस्यैव दैशिकसम्बन्धघटितसामा

[दी] इति ध्येयम् । एकस्य पुंसोऽनुमित्सासत्त्वेपि अन्यस्य तद्विरहिणः प्रत्यक्षादिसामग्रीसत्त्वेऽनुमित्यनुत्पादात् तत्पुरुषीयानुमितिं प्रति तत्तत्पुरुषीयानुमित्साविरहकालीनतत्तत्पुरुषीयसिद्धिसामग्रीविशेषविरहोऽनन्यगतिकत्वेन हेतुरुपेतव्य इति वदन्ति ।

नाधिकरण्यसम्बन्धेन सामग्र्यां विशेषणत्वं स्वीकार्यम् ; तथा च पुरुषान्तरीयानुमित्साकालीनाया अपि पुरुषान्तरीयप्रत्यक्षसामग्र्यास्तदनुमित्यप्रतिबन्धकत्वापत्तिरित्याशंकां चक्षुस्संयोगादौ , तत्पुरुषीयत्वमन्तर्भाव्य निराकरोति- **एकस्ये** ति । **अनुमित्यनुत्पादा**दित्यन्तमुपलक्षणम् । अन्यस्य प्रत्यक्षसामग्रीसत्त्वे अन्यस्य तद्विरहिणोऽनुमित्युत्पादाच्चेत्यपि द्रष्टव्यम् । तत्पुरुषीयानुमित्सायाः कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य दैशिकसम्बन्धेनाधिकरणं यः क्षणः तत्र कालिकसम्बन्धेन वर्तमानत्वं कालीनान्तार्थः सामग्रीविशेषणम् । अथ वा समवायावच्छिन्नप्रतियोगिताकतदात्मवृत्तित्वविशिष्टानुमित्साभावाधिकरणतावच्छेदकक्षणे कालिकसम्बन्धेन वृत्तित्वमेव तदर्थः; तेन तत्पुरुषीयानुमित्साक्षणस्यापि अन्यदेशावच्छेदेन दैशिकसम्बन्धेन कालिकसम्बन्धावच्छिन्नतदिच्छाभाववत्त्वेपि न क्षतिः । **तत्पुरुषीयसिद्धिसामग्रीविशेषविरह** इति। कालिकसम्बन्धावच्छिन्नप्रतियोगिताकः पक्षनिष्ठतदीयेन्द्रियसन्निकर्षादिविशिष्टसाध्यनिष्ठतदीयेन्द्रियादिसन्निकर्षादिविरह इत्यर्थः । विशिष्टत्वमेककालीनत्वमेव । विशेष्यविशेषणभावे विनिगमनाविरहान्नानाकारणताकल्पनमगत्या न दोषाय । यावत्त्वेन तदसाधारणकारणसमुदायस्य प्रतिबन्धकत्वं पुनरनुपादेयमेव ; यावत्त्वस्यदुर्निर्वचत्वात् । पर्वतो वह्निमानित्याद्यनुमिति समानविषयकचाक्षुषादिसामग्र्याः प्रतिबन्धकतायां रूपादिकं नान्तर्भावनीयम् । तत्र साध्यपक्षयोरूपादिमत्त्वनियमेन तन्निवेशे प्रयोजनाभावात् । किं तु पर्वतो द्रव्यवान द्रव्यं वह्निमत् द्रव्यं द्रव्यवदित्याद्यनु

मितौ वाय्वादीन्द्रियसन्निकर्षस्याविरोधित्वोपपत्तये यथायोगं साध्यपक्षादौ रूपादिमत्त्वं निवेशनीयम् । अथ प्रतिबन्धकसामग्रीमत्यपि काले तदनधिकरणदेशावच्छेदेन तदभावस्य सौलभ्यात् अनुमित्यापत्तिः । न च प्रतिबन्धकसत्तायाः कार्यानुत्पादप्रयोजकत्वात् तत्सत्वे कथं कार्योत्पत्तिरिति वाच्यम् ; सामग्र्याः कार्योत्पत्तिप्रयोजिकायाः प्रतिबन्धकसत्त्वेपि तदभावस्वाक्षतत्वेनाक्षतत्वेन कार्योत्पत्तेर्दुर्वारत्वादितिचेत् ; न, यादृशकारणतावच्छेदकनियमे देशान्तरावच्छेदेन कार्यसमानाधिकरणकरणाभावव्यावर्तकं देशभेदानवच्छिन्नत्वं अन्यद्वा विशेषणमावे निविशते, यथा समवायादिसंसर्गावच्छिन्नसंयोगज्ञानादिनिष्ठकारणतावच्छेदकनियमे तदन्यकारणतावच्छेदकावच्छिन्नस्य देशभेदानवच्छिन्नवृत्तेरेव अधिकरणे कार्योत्पत्तिप्रयोजिका उक्तप्रतिबन्धकाभावस्य च कारणता न तादृशी , किंचिदवच्छेदेन प्रतिबन्धकसत्त्व एव तत्र कार्यानुत्पत्त्या तादृशाभावविशेषणप्रवेशे प्रयोजनाभावात्, तथा च देशभेदावच्छिन्नप्रतिबन्धकाभावसत्त्वेनानुमित्यापत्तिः । एतेनात्मनि शरीरविशेषावच्छेदेन सिद्ध्यादिरूपप्रतिबन्धकसत्वे घटाद्यवच्छिन्नतदभावबलादनुमित्यापत्तिरपि निरस्ता । न च सिद्ध्यादिमत्यात्मनि तत्काले वा घटाद्यवच्छिन्ना या तदभाववृत्तिस्तदन्यदेशभेदानवच्छिन्नतद्वृत्तेरप्रामाणिकत्वेन सिद्धयाद्यसत्वेप्यनुमित्याद्यनुपपत्तिरिति वाच्यम् ; तादृशवृत्त्यनभ्युपगमे सिद्धयाद्यसत्त्वदशायां तदभावस्यात्मनि दैशिकव्याप्यवृत्तितायास्सर्वानुभवसिद्धाया अनुपपत्तेः । यदि च कार्यव्यूहस्थले एकत्रात्मनि शरीरान्तरावच्छेदेन सिद्धयभावाद्यभावस्य सिद्धयादेः सत्वेप्यन्यशरीरावच्छेदनानुमित्याद्युत्पादः प्रामाणिकः, तदा सिद्धयभावविशिष्टकारणतावच्छेदकनियमशरीरेऽभावांशे उक्तविशेषणप्रवेशस्यावश्यकत्वात् घटाद्यवच्छिन्नसिद्धयाद्यभावबलात्सिद्ध्यादिदेशायामनुमित्यापत्तेर्वारणाय गत्यन्तरमेवानुसरणीयमिति दिक् ।

[दी] अथ सिद्ध्यनन्तरानुमितौ सिषाधयिषा हेतुरस्तु, नचैवं मण्यादिस्थलीयदाहं प्रत्युत्तेजकस्य हेतुत्वापत्तिः; उत्तेजकानामनुगतत्वात्, तावदभावविशिष्टमण्याद्यभावस्यानुगतत्वादिति चेत्; इहाप्युपदर्शितोननुगमः सिषाधयिषायाः सिध्युत्तरानुमितित्वं चानु

उत्तेजकत्वाभिमतसिषाधयिषाकारणतां स्वीकृत्य सिद्ध्यभावकारणतां माक्षिपति- **अथेत्यादिना चेदित्यन्तेन** । एतावतैव विना सिषाधयिषां सिद्ध्यनन्तरमनुमितेर्वारणसम्भवादिति भावः । प्रतिबन्दिमाशंकते- **नचैवमिति** । **उत्तेजकस्य**- मन्त्रौषधविशेषादेः । प्रतिबन्दिमुद्धरति- **उत्तेजकानामिति** । मण्यादिस्थलीयोत्तेजकमन्त्रौषधविशेषादीनामित्यर्थः । **अननुगतत्वादिति** । तथा चानुगतकार्यप्रति व्यभिचारेण कारणत्वासम्भवादिति भावः । **इहापि**- सिद्धिस्थलेपि । **दर्शित इति**- यादृश यादृशेच्छासत्व इत्यादिनेत्यादिः । **सिषाधयेषायाः**- उत्तेजकीभूताया इत्यादिः । तथा च तुल्ययुक्त्या उत्तेजकाभावकूटविशिष्टायास्सिद्धेरभाव एव दाहादौ मण्याद्यभाववद्धेतुर्भविष्यतीति भावः । ननु तावदभावकूट विशिष्टसाध्यनिश्चयाभावत्वापेक्षया लघीयसा अन्ततस्तावदन्यान्यत्वेनैवानुगमसम्भवः सिषाधयिषाणामित्यत आह- **सिध्युत्तरानुमितित्वं चेति** । अनुगतस्य तस्य सिद्धिसमानकालीनप्रागभावप्रतियोगित्वरूपस्य, अनतिप्रसक्तस्य च तत्सिद्धिनाशकालीनप्रागभावप्रतियोगित्वे सति तत्सिद्धि-समानकालीनप्रागभावप्रतियोगित्वात्मकस्यैव सम्भवात् अनुगतानतिप्रसक्ते त्युभयमुपात्तम्; तथा च प्रथमधर्मस्य कार्यतावच्छेदकत्वे सिषाधयिषा नन्तरेण सिद्धिनाशोत्तरकाले जायमानायामनुमितौ सिषाधयिषाया व्यभिचारः, उत्तरस्य तथात्वे चानन्तकार्यकारणभावप्रसङ्ग इति भावः ।

[दी] गतानतिप्रसक्तं दुर्वचम् । सिद्धिःस्थितिकालीनां स्वेतरसिद्धिकालीनां वानुमितिं प्रति हेतुत्वकल्पने विना सिषाधयिषां सिद्धिनाशकालेऽनुमित्युत्पादो दुर्वारः । एकस्य पुंसः सिद्धिसत्वे अन्यस्य सिषाधयिषाशून्यस्यानुमित्यनुत्पादप्रसङ्गः ।

सिद्धिस्थितिकालीना मिति । स्वक्षणवृत्तिप्रागभावप्रतियोगित्वस्वक्षणवृत्तित्वोभयसम्बन्धेन सिद्धयवच्छिन्नामित्यर्थः । लाघवायाह- **स्वेतरे** ति । स्वभिन्नत्वस्वक्षणवृत्तित्वोभयसम्बन्धेन सिद्धयवच्छिन्नामित्यर्थः । पक्षद्वये दलद्वयव्यावृत्तिश्च स्फुटैव । सम्बन्धविधया स्वक्षणवृत्तित्वादीनां निवेशान्न स्वत्वाननुगमनिबन्धनो दोषः, सम्बन्धमध्ये स्वपदार्थानिवेशेप्यन्याधिकरणवृत्तित्वादेरन्यसम्बन्धत्वाभावेनातिप्रसंगविरहात् । **नाशकाले** नाशोत्पत्तिक्षणे । **अनुमित्युत्पादो दुर्वार** इति । सिद्धिनाशसमयात्पन्नाया अनुमितेः उक्तसिषाधयिषाकार्यतावच्छेदकानाक्रान्तत्वादिति भावः । ननु स्वक्षणवृत्तिप्रागभावप्रतियोगित्वस्वनाशक्षणवृत्तिप्रागभावाप्रतियोगित्वोभयसम्बन्धेन सिद्धयवच्छिन्नानुमितित्वमेव सिषाधयिषाजन्यतावच्छेदकं वाच्यम् ; एतच्च सिद्धिनाशकालोत्पन्नानुमितिसाधारणमेवेति नातिप्रसङ्गः, न च सामान्यतो नाशक्षणवृत्तिप्रागभावाप्रतियोगित्वं जन्यमात्रस्यैव न सम्भवतीति यदधिकरणक्षणवृत्ति प्रागभावप्रतियोगित्वं तद्व्यक्तिनाश एव विशिष्य निवेश्य इत्यननुगमतादवस्थ्यमिति वाच्यम् ; सम्बन्धाननुगमस्यादोषत्वात् , कथंचिदननुगमस्यापि सम्भवाच्चेत्यतो दोषान्तरमाह- **एकस्ये** ति । **सिद्धिसत्व** इति- अव्यवहितपूर्वकाल इत्यादिः । **अनुमित्यनुत्पादप्रसङ्ग** इति पुरुषान्तरीयसिद्धयव्यवहितोत्तरोत्पन्नपुरुषान्तरीयानुमितेरपि उक्तसिषाधयिषाजन्यतावच्छेदकधर्माक्रान्तत्वादिति भावः । सामानाधिकरण्यस्याप्यधिकार्य दर्शितकार्यतावच्छेदकघटकसम्बन्धमध्ये निवेशेन पुरुषान्तरीयसिद्धयन

अपि च सिद्धौ सत्यां विनापि सिषाधयिषां सामान्यसामग्रीतोऽनुमितिसामान्योत्पत्तिप्रसङ्गः । न हीदृशविशेषसामग्रीं विना सामान्यसामग्र्या अनुमितिजनकत्वं नास्ति । न चान्यत्रापि तद्विशेषसामग्र्यन्तरमस्ति ।

न्तरोत्पन्नानुमितौ सिषाधयिषाया व्यभिचारवारणसम्भवाद्दोषान्तरमाह— अपिचे ति । सामान्यसामग्रीतः- अनुमितिसामान्यहेतुभूतपरामर्शादितः। ननु विशेषसामग्रीसहिताया एव सामान्यसामग्र्याः कार्योत्पादकत्वान्ना पत्तिसम्भव इत्याशङ्कायामाह— नहीं ति । ईदृशे ति । सिषाधयिषारूपे त्यर्थः । जनकत्वमुपधायकत्वम् । नास्ती ति- नहीत्यन्वयः । सिद्धयसत्वे सिषाधयिषां विनापि परामर्शादेरनुमित्युत्पादकत्वादिति भावः । तथा च तत्रैव सिद्धिदशायामपि परामर्शादिसत्वे सिषाधयिषाविरहो नानुमित्यनुत्पादप्रयोजको भवेदिति पर्यवसितम् ; ननु विशेषसामग्रीविरहकूट एव सामान्यसामग्रीदशायां सामान्यकार्यानुत्पादप्रयोजकः सिद्धयसत्व स्थलीयविशेषसामग्रीविरहघटितस्याभावकूटस्य च सिषाधयिषाविरहसहकृत सिद्धिस्थल एव सत्वं न तु सिद्धयसत्वस्थल इति न दोष इत्यत आह— न चे ति । अन्यत्रापि- सिद्धयसत्वस्थलेपि । विशेषसामग्र्यन्तर मिति । सिद्धयभावस्यैतन्मतेऽहेतुत्वादिति भावः। तत्तदनुमितिव्यक्त्युत्पादकतत्तत्परामर्शव्यक्तीनां विशेषसामग्रीत्वेपि अनुमित्युत्पत्तिकालेपि तत्सत्वेन तदनन्तरमनुमित्यनुत्पादप्रयोजकविरहः तत्तद्व्यक्तिविरहाणामनन्तानां सामान्यकार्यानुत्पादप्रयोजकत्वे गौरवम्। अन्यथा बहुतरसामान्यकारणताया उच्छेदप्रसंगादित्याशयः ।

अत्राहुः—सिद्धयनुत्तरानुमितौ सिद्धयभावस्य • हेतुत्वान्तरकल्पनयैव तादृशातिप्रसंगवारणसम्भवाद्विशिष्टाभावस्य हेतुत्वमयुक्तम्; सिद्धि-सिषाधयिषाविरहयोर्विशेषणविशेष्यभावे विनिगमनाविरहेण प्रतिबन्धकता

[दी] तत्कल्पने चातिगौरवम् , इह जायमाना सा सिध्युत्तरमेव स्यात् सा च न जायते तत्कारणाभावादिति चेत् सा माजनिष्ट, अनुमिति सामान्यं तु स्यादेव कार्यानुत्पादस्य विना कारणाभावमसम्भवात् ।

द्वयस्य त्वन्मतेऽप्यावश्यकत्वात् , प्रतिबन्धकतावच्छेदकगौरवस्याधिक्यात्, न च सिषाधयिषाहेतुतापक्षेपि कार्यतावच्छेदककोटावव्यवहितोत्तरत्वादिनिवेशाधिक्येन गौरवमित्याशङ्क्यम् ; तल्लिंगकेच्छाविरहविशिष्टसिद्धत्वाभावस्य पूर्वोपदर्शितसमूहालम्बनजन्यानुमितौ व्यभिचारवारणायान्यवहितोत्तरत्व सम्बन्धेन तादृशसिद्धत्वावच्छिन्नानुमितिं प्रत्येव हेतुतायां भवतापि वाच्यत्वादिति । सिद्धिस्थले विना सिषाधयिषां सामान्यकार्योत्पत्तावपि तादृश कार्यस्योक्तविशेषसामग्रीकार्यतावच्छेदकाक्रान्तता स्यात् ; तथा च विशेष सामग्रीं विना तदुत्पत्तौ तत्र तस्य व्यभिचारात् कारणतैव व्याहन्यत इति न तत्र तदुत्पत्त्यापत्तिरित्याशङ्कते **इह** ति । कार्योत्पादप्रयोजकसामग्रीसत्वे प्रयोजनक्षतिः न कार्योत्पत्तिं विरुणद्धि; तथा च प्रकृते[1] सिषाधयिषाऽघटितायाः सामान्यकार्यप्रयोजकसामग्र्याः सिद्धिकालेपि सत्वे विशेषसामग्रीविरहात् तत्कार्यतावच्छेदकावच्छिन्नापत्त्यसम्भवेपि सामान्यधर्मावच्छिन्नापत्तिदुर्वारैवेत्याह— **सा माजनिष्टे** ति । **सा**—सिध्युत्तरानुमितिः । **कार्यानुत्पादस्य**- तद्धर्मावच्छिन्नानुत्पादस्य । **विना कारणविरहम्**- तद्धर्मावच्छिन्नप्रयोजकसामग्र्याविरह विना । अनुमितिं प्रति पक्षतासहितपरामर्शत्वेनैव हेतुता ; न तु पक्षतापरामर्शयोः पृथक्कारणतादयं गौरवात् ; न च विशेष्यविशेषण भावे विनिगमनाविरहः ; परामर्शस्यानुमित्यहेतुत्वे तस्य व्याप्तिज्ञान रूपकरणव्यापारत्वासम्भवात् व्यापारतायाः फलजनकतागर्भत्वादित्यस्यैव

[दी] करणव्यापारत्वेन आवश्यककारणाभावस्य परामर्शस्य कारणतावच्छेदिका पक्षता न कारणमिति तु भ्रमः । प्रतिबन्धकान्तराभाववदन्वयव्यतिरेकशालित्वेन हेतुत्वात् । अन्यथा यथासम्भवं निमित्तकारणस्य समवायिकारणत्वाद्यवच्छेदकत्वप्रसंगात् । अथानुमितिसाधारणसिद्धेः प्रतिबन्धकत्वे तदभावस्य मण्याद्यभाववत् प्रतिबन्धकाभावत्वेन कार्यकालवृत्तेरेव हेतुत्वात् अनुमितिकाले तद

विनिगमकस्य सम्भवादिति केषांचिन्मतं दूषयति– **करणेत्यादिना** । **परामर्शस्ये** ति । षष्ठ्यन्तार्थो वृत्तिः तस्याः, कारणतायामन्वयः । **निमित्तकारणस्य**– दण्डादेः । **समवायकारणत्वे** ति । कपालादिनिष्ठघटत्वाद्यवच्छिन्नकारणतेत्यर्थः । समवायनियमाय तत्कारणताया आवश्यकत्वादिति भावः । जन्यसत्त्वाद्यवच्छिन्ननिरूपितायां समवायिकारणतायां दण्डादेर्व्यभिचारेण प्रवेशासम्भवात् यथासम्भवमित्युक्तम् । कारणत्व तदवच्छेदकत्वयोरुक्तविनिगमकेन नियतत्वेपि सिद्ध्यभावसाहित्यपरामर्शयोरेकविशिष्टस्यैव एकविशेष्यतावच्छेदकतापन्नस्यैव वाऽपरस्यावच्छेदकत्वं वाच्यम् ; तत्र विनिगमनाविरहो दुर्वार एवेति तत्वम् । ननु सिद्ध्यभावस्यानुमितिहेतुत्वेऽनुमित्सां विना कदाप्यनुमितिर्नोत्पद्येत ; मणिसमवधानोत्पत्तिकाले दाहानुत्पत्त्या प्रतिबन्धकाभावस्य कार्यकालसत्तायाः फलोपधानप्रयोजकत्वादनुमितिकाले च सिद्ध्यभावासत्वादित्यगत्या तस्य कारणतावच्छेदकत्वमेव ; न तु कारणत्वमितिशंकते– **अथे** ति । कार्योत्पत्तिक्षणावच्छेदेनापि कार्याधिकरणे नियतसत्वं यत्कारणताघटकं तत्कारणताश्रयस्यैव कार्योत्पत्तिक्षणे सत्त्वं कार्योत्पत्तिप्रयोजकम् ; यथा मण्यभावादेः , सिद्ध्यभावस्य प्रतिबन्धकाभावरूपत्वेपि नियतप्राक्सत्व मेव कारणताघटकं न तूक्तमपीति तस्य प्राक्सत्वमात्रं फलोत्पत्तौ तन्त्र

[दी] सम्भवात्सा नोत्पद्येतेति चेन्न; यस्य मण्यभावादेः कार्यसमकाल तयान्वयव्यतिरेकित्वं तस्यैव तथात्वेन हेतुत्वं न तु सर्वस्य, गौरवात् । अन्यथा समवायिकारणस्य कार्यसहवृत्तित्वेन हेतुत्वा त्कारणमात्रस्य तथात्वप्रसक्तौ प्राभाकरा एव विजयेरन्निति । प्राभाकरास्तु विनाप्यनुमित्सां क्वचित्परामर्शानुमितिप्रवाहस्य

मिति नानुपपत्तिरिति समाधत्ते-- यस्ये ति । अन्यथे ति । सहचारदर्शन मात्रेणैव प्रतिबन्धकाभावे कार्यसहभावेन हेतुतानियमसिद्धावित्यर्थः । प्राभाकरा इति । सहभावनिरूपकस्यैव कारणतावादिन इत्यादिः । यत्तु अनुमितौ प्रत्यक्षादिसामग्र्याः प्रतिबन्धकतान्तरकल्पने गौरवात्तत्सामग्री दशायां अनुमित्यापत्तिवारणायानुमित्यन्यसिद्ध्यभावस्य कार्यकालवृत्ति तया हेतुत्वमेव युक्तम् ; अनुमित्यभावस्य च प्राक्सत्वमात्रेण हेतु-त्वान्तरं कल्प्यतामिति, तदसत् ; सिषाधयिषानन्तरजातासिद्धिद्वितीय क्षणेऽनुमित्यनुत्पादप्रसङ्गात् , कार्यकालेऽनुमित्सानाशेन तदभावविशिष्ट सिद्धिसत्वात् , प्रत्यक्षादिसिद्धिसत्वेऽसत्वां च तत्सामग्र्यां वह्निज्ञानान्तरं जायतामेतीच्छाबलादनुमित्युत्पत्याऽनुमित्यन्यसिद्धौ तादृशेच्छाया उत्तेज कत्वात्तादृशेच्छाबलात् प्रत्यक्षादिसामग्र्यनन्तरं प्रत्यक्षाद्युत्पादसमयेप्यनु मित्यापत्तिः , सिद्धावप्रामाण्यग्रहसत्वे प्रत्यक्षाद्युत्पादसमयेऽनुमित्यापत्ति श्चेति ।

पक्षताया हेतुतामनङ्गीकुर्वतां गुरूणां मतमाह- प्राभाकरास्त्विति । अनुमित्सायोग्यताया उत्तेजकत्वे द्वित्वत्रित्वादिप्रकारकेच्छाबलात् अनुमितिद्वितीयक्षणोत्पन्नपरामर्शतृतीयक्षणेऽनुमित्यन्तरोत्पादस्य पक्षताहेतु तामतेप्युपपत्तेः । विनानुमित्सा मिति । क्वचित्-- प्रतिबन्धकान्तरा सत्वस्थले । परामर्शानुमितिप्रवाहस्य- क्रमोत्पन्नपरामर्शानुमितिसमूहस्य ।

[दी] अविरलस्यानुभाविकत्वात् कालभेदकल्पनायां मानाभावाच्च पक्षता नानुमिति हेतुः, परार्थानुमितिं प्रति तु सिद्धसाधनमर्थान्तरविषया दूषणमित्याहुः ।

इति श्रीमहामहोपाध्याय श्रीरघुनाथशिरोमणिभट्टाचार्यविरचितायां अनुमानमणिदीधितौ पक्षता ।

अपलापस्य निराकरणाय समूहपर्यन्तानुसरणम् । पूर्वपूर्वानुमितिनाशे द्वितीयादिपरामर्शादनुमित्यन्तरोत्पत्तौ बाधकाभावादाह- **अविरलस्ये** ति । ननु तत्रागत्या एकैकक्षणविलम्बेनैवानुमितयः स्वीकार्या इत्यत आह— **कालभेदे** ति । **मानाभावात्**- युक्त्यभावात । पक्षताहेतुत्वस्यापि सिद्ध्या गत्यन्तरविरहस्यैवासिद्धेरिति भावः । नन्वेवं सिद्धसाधनस्यादूषणतया परार्थस्थले तदुद्भावनानुपपत्तिरित्यत आह- **परार्थे** ति । **अर्थान्तरे** ति । सिद्धे अर्थे आकांक्षाविरहादिति भावः । न च पक्षतायाः अनुमित्यहेतुत्वेऽनुमित्यनन्तरं जाता व्यक्तिरेव कथं नोत्पद्यते? तद्वारणाय तत्तद्व्यक्तौ तत्तत्प्रागभावव्यक्तीनां विशिष्यानन्तहेतुकल्पने गौरवमिति वाच्यम् ; तत्तदनुमितिव्यक्तीनां पूर्वं तन्नाशात् परतो वा कदाचित् समानविषयकानुमित्यन्तरोत्पादसमये तत्तद्व्यक्त्यापत्तिवारणाय तत्तत्परामर्शव्यक्तीनां विशिष्य हेतुतायाः आवश्यकत्वात् तत एव तद्व्यक्तीनां पुनरुत्पादवारणसम्भवात् ।

न च परामर्शानां तत्तद्व्यक्तित्वेन तत्तदनुमितिव्यक्तिहेतुत्वेपि विनश्यदवस्थात्तदव्यवहितपूर्वोत्पन्नपरामर्शात्पुनस्तदनुमितिप्रसङ्ग इति वाच्यम् · एतन्मते कार्यासहवर्तिनः फलाजनकत्वात् अनुमितित्वावच्छिन्नाभावहेतु

त्तयापि तादृशापत्तिवारणसम्भवात् तदनुरोधेन गुरूणां प्रत्यक्षादिसाधारणनिश्चयत्वेन प्रतिबन्धकत्वासिद्धेः । अत्र केचित्— पक्षतायां अनुमित्यं हेतुत्वमते विनापि वह्न्यादिलिङ्गकवह्न्याद्यनुमितीच्छां तादृशानुमित्युत्पत्त्या तादृशानुमितौ तादृशानुमितीच्छाविरहविशिष्टप्रत्यक्षादिसामग्र्याः भावस्य कारणताधिक्याद्गौरवम् , पक्षताहेतुतामते तादृशानुमितेरिच्छानियततया तत्रेच्छाया लघीयस्या हेतुतयैवोपपत्तेः पक्षतापि तत्रैवेच्छैवेत्याहुः ।

इति श्रीमहामहोपाध्यायगदाधरभट्टाचार्यचक्रवर्तिविरचिता
पक्षतादीधितिटिप्पणी ।
